पूर्णत्रयीशं भजतां जनानाम् ।
कथं भवेद् भोगविहीनतेति
स्मरन् नमस्यामि विभो भवन्तम् ॥

---

## ॥ दक्षिणामूर्तिस्तवः ॥

### No. 359 F. DAKṢIṆĀMŪRTISTAVA.

C. O. L. No. 591.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—2. 7 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—28.

Owner—Same as No. 359 A.

Subject etc.—Same as No. 1160 H, DCSMMPL.

---

## ॥ वेदान्तप्रकरणम् ॥

### No. 360 A. VEDĀNTAPRAKARAṆAM.

C. O. L. No. 2468 A.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—25. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—250. Complete.

Owner—Valia Rāja Avl., Eḍappaḷḷy.

Subject etc.—Same as No. 359 A.

---

## ॥ वेदान्तसारः ॥

### No. 360 B. VEDĀṆTASĀRA.

C. O. L. No. 2468 B.

Substance—Palm leaf. Size—8½"×1½". Leaves—25. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner—Same as No. 360 A.

Subject etc.—Same as No. 633, DCSMMPL.

Remarks—After colophon seven leaves contain a certain number of verses in Malayāḷam, formulating the methods of preparing medicines. But that portion contains neither the beginning nor the end.

---

## ॥ वेदान्तप्रकरणश्लोकसंग्रहः ॥

### No. 361 A. VEDĀNTAPRAKARAṆA-ŚLOKASAṄGRAHA.

C. O. L. No. 2407 A.

Substance—Palm leaf. Size—9"×1½". Leaves—23. 7—9 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—360. Incomplete.

Owner—Gopāla Śāstri, Shencottah.

Subject—Exposition of the reality of the supreme spirit.

Beginning :

अतः स्वसंसारविनाशने मतं
श्रुतिप्रमाणेन च तर्कवर्त्मना ।
प्रबोधमासाद्य शिवस्य तत् पुनः
सदैव ... ... ... ... ॥

सर्वं न च किञ्चिदन्यन्न निरूपणाय ।
... ...वेदस्य परा हि निष्ठा
महानुभूतिश्च ... संशयश्च ।
अहं स मम रूपतः ... ...
किञ्चिदस्तीह सुनिश्चयः कृतः ॥

End :

हिताय लोकस्य ... स सदा महेशः ।
उवाच सत्यं करुणा ... श्रुतिप्रमाणैकविनिश्चितार्थम् ॥
हरेहम ... परे सुरासुराद्याः (?)
परमशिवप्रभया ... स्तुताश्च ।
रविकिरणैरखिलानि भानि कश्चित्
परमशिवस्तत एव बोधकारी ॥
नाद्ये ... जनात् तत्त्वभावाद्
भूयश्चान्ते विश्वमायानिवृत्तिः ।

Colophon :

Author :

Remarks—A compendium of all the Vedāntic treatises, a portion of Muṇḍakopaniṣad and a panegyric of Śiva are embodied herein. The

Ms. has been eaten away by worms here and there.

---

## ॥ उपदेशसाहस्री ॥

### No. 361 B. UPADEŚASĀHASRĪ.

C. O. L. No. 2407 B.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—40. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—750. Incomplete.

Owner—Same as No. 361 A.

Subject etc.—Same as No. 650, DCSMMPL.

Remarks—The leaves are much worm-eaten and the last two are missing. 16 verses on medicine are also seen here. Altogether eighteen *prakaraṇas* are embodied herein extending from the portion dealing with the knowledge of self-realisation up to that of the practice of medicine. The work is available in print.

---

## ॥ वेदान्तमननम् ॥

### No. 362. VEDĀNTAMANANAM.

C. O. L. No. 1598.

Substance—Palm leaf. Size—16½″ × 1½″. Leaves—41, 7 lines per page and 64 letters per line.

Script—Malayāḷam. No. of Granthas—1150. Complete.

Owner—Muttukuṭṭi Śāstrī, Bhūtappāṇḍi.

Subject etc.—Same as No. 331 B.

Remarks—The work is also known as Vāsudeva-mananam. The last two leaves contain a fragment of the Gṛhyatātparyadarśana.

---

## ॥ वेदान्तमननम् ॥

## No. 363. VEDĀNTAMANANAM.

C. O. L. No. 56.

Substance—Paper. Size—13¼" × 8½". Pages—22. 20 lines per page and 24 letters per line. Script—Devanāgari. No. of Granthas—300. Complete.

Owner—C. O.

Subject—Description of the objects of life, the conception of jīvātmā and Paramātmā and the reality of substances.

Beginning:

श्रीकरं श्रितभक्तानां निःश्रेयसफलप्रदम् ।
वन्दे श्रीरामचन्द्रेन्द्रगुरुस्वामिपदाम्बुजम् ॥

श्रीनीलकण्ठमतिसुन्दरशुभ्रमूर्तिं
तत्त्वं निजं मुनिगणान् प्रतिबोधयन्तम् ।

विश्वेश्वरं विमलचिद्घनमादिदेवं
न्यग्रोधमूलतलमन्दिरमाश्रयामि ॥

भाति विश्वं यदज्ञानाद् यज्ज्ञानाच्च निवर्तते ।
तस्मै बोधस्वरूपाय नमः शुद्धाय साक्षिणे ॥
श्रीरामरामचन्द्रेन्द्रनारायणगुरूनहम् ।
नत्वा तदीयवाक्येन मननं कर्तुमारभे ॥

नन्वस्मिन् वेदान्तप्रकरणे कोऽधिकारी । को विषयः । किं प्रयोजनम् । कः । सम्बन्धः । इति चेदुच्यते । साधनचतुष्टयसम्पन्नोऽधिकारी । साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, दमशमादिषट्कसम्पत्तिर्मुमुक्षुत्वं च । मुमुक्षुत्वं नाम श्रवणप्रवृत्तिपर्यन्ता मोक्षेच्छा । श्रवणं नाम सर्वेषां वेदान्तवाक्यादीनामद्वितीये ब्रह्मणि तात्पर्यम् ।

End :

स्नातं येन समस्ततीर्थनिचये दत्तं महीमण्डलं
विप्रेभ्यः पितृदेवतासुरगणाः सर्वे च सन्तर्पिताः ।
जप्ता मन्त्रसहस्रकोटिरमुना तप्तं च तीव्रं तपो
यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः ॥

इति ।

श्रीरामानन्दतीर्थाख्यं गुरुं तत्त्वविदां वरम् ।
नमाम्याश्रितमन्दारं सच्चिदानन्दसागरम् ॥
इयं कृतिर्भगवतः शङ्करस्य चिदात्मनः ।
दक्षिणामूर्तिरूपस्य प्रीतयेऽस्तु दयानिधेः ॥
अन्नाद्यानन्दमयान्तकोशानां कारणं च यत् ।
अधिष्ठानं च तेषां यद्विनान्नादि च नास्ति यत् ॥

स्वरूपं चैव तेषां यत् सत्यज्ञानादिलक्षणम् ।
अद्वितीयं स्वप्रकाशं तद् ब्रह्माहं न संशयः ॥
देहा(दिनाज्ञः?)दीनामसत्त्वेन तत्प्रवृत्त्यन्यथात्मनः ।
चिद्रूपस्याप्यसङ्गस्य सत्यब्रह्मत्वमाह गीः ॥

Colophon :

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे तृतीये तृतीयं प्रकरणं समाप्तम् ।

इति वेदान्तमननं समाप्तम् । शुभमस्तु ।

Author :

Remarks—This is a pre-eminent work. No internal evidence is extant to determine its author. Some of his preceptors are referred to both in the beginning and end. The work is given the title, Vedāntamanana and seems to come to a close with the dedicatory verse beginning with "श्रीरामानन्दतीर्थाह्वय". The lines thereafter and the colophon embody a portion of the Avadhūtagītā as the colophon clearly points out. Their inclusion might have been due to some error unnoticed by the scribe

---

## ॥ वेदान्तरत्नमाला ॥

No. 364. VEDĀNTARATNAMĀLĀ.

C. O. L. No. 607.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—

160. 6 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2640.

Owner—Mitran Nambūri, Cempakaśśeri, Kuḍamāḷūr.

Subject—Explication of the first verse in the Bhāgavata with authoritative citations from Śruti and Smṛti in the light of Vedāntic philosophy.

Beginning:

हरिः। श्रीगणपतये नमः । अविघ्नमस्तु।

अविघ्नायाद्यविघ्नाय नमस्कुर्वे परात्मने ।
अशुभापहगात्राय शुभावहनिजाङ्घ्रये ॥
यन्माया कार्यधीवृत्तिरूपिणी वरदा नृणाम् ।
वाणी परात्परा विद्या तां वन्दे निखिलात्मिकाम् ॥
नीलकण्ठाभिधांस्तद्वन्नारायणसमाह्वयान् ।
अन्यांश्च कृष्णकलया संभूतान् नौमि देशिकान् ॥
यद्गोत्रजो यत्प्रसादाद् वेदान्तानां प्रकाशकम् ।
कुर्वे शास्त्रप्लवं भक्त्या तं व्यासं नौमि चक्रिणम् ॥
देवनारायणप्राप्यं देवनारायणाश्रयम् ।
देवनारायणकृतं देवनारायणाभिधम् ॥
वेदान्तरत्नापरनामधेयं कालाहिकाकोलविनाशहेतुम् ।
शृण्वन्तु जीवा विवशा नितान्तं सञ्चिन्त्य सञ्चिन्त्य भवाब्धिखेदम् ॥
वेदान्तरत्नमालेति व्याख्यातं विश्वमुक्तिदम् ।
वेदान्तवाक्यरत्नौघैर्निर्मितं कृष्णभक्तिदम् ॥
जीवाभयप्रदाने दक्षं ह्येतद् विमुक्तिदं जगताम् ।
स्मरतां गृणतां नित्यं निशमयतां वल्लवीसुतैकरसम् ॥

श्रीमद्भागवतश्लोके प्रथमो योज्यतेऽधुना ।
वेदान्तरत्नमालेयं तत्परस्मृतिभिः सह ॥

पूर्वं तावत् परमात्मानं श्रीकृष्णम् उपनिषद्भिरेव देवनारायणः स्तौति—अत्र श्रुतयः—

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे प्रभविष्णवे ॥

जगतो गुरुकन्दाय सच्चिदानन्दमायिने ।
गलिताखिलभेदाय नमः शान्ताय वेधसे ॥

ज्ञानं सुसूक्ष्मं चिन्मात्रं ज्ञातृज्ञेयविवर्जितम् ।
पूर्णं शून्यमनाभासं सर्वाभासं नमाम्यहम् ॥

यो देवानामधिपो यस्मिन् लोका अ.........
...ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ।

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

श्रीकृष्णाभिधं तं परमानन्दचिद्घनं भूमानं परमात्मानं धीमहि । श्रीकृष्णाभिधमित्यत्र श्रुतयः—

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

कृष्णं सन्तं विप्रा बहुधा भजन्ति । कृष्णो विभाति । परमानन्देत्यत्र श्रुतयः... .... ।

End :

य एतां ब्राह्मणोऽधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । स आदित्यपूतो भवति । स सोमपूतो भवति । स सर्वपूतो भवति । सर्वेषु तीर्थेषु स्नातो भवति । स सर्वेषु वेदेष्वधीतो भवति । स सर्ववेदव्रतचर्यासु चरितो भवति । स सर्वदेवैर्ज्ञातो भवति । स सर्वयज्ञक्रतुभिरिष्टवान् भवति । तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति । गायत्र्याः शतसहस्रं जप्तं भवति । प्रणवानामयुतं जप्तं भवति । रूपे रूपे दश पूर्वान् पुनाति दशोत्तरान् । आचक्षुषः पङ्क्तिं पुनाति । सकृज्जप्त्वा शुचिः पूतः कर्मण्यो भवति । द्वितीयं जप्त्वा गाणपत्यमवाप्नोति । तृतीयं जप्त्वा देवमेवानुप्रविशति । य इममधीते ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा समस्तमहापातकोपपातकेभ्यः पूतो भवति । सर्वेषु तीर्थेषु स्नातो भवति । सकलभोगभुग् भवति । देहं त्यक्त्वा विष्णुसायुज्यमाप्नोति । न च पुनरावर्तते न च पुनरावर्तते । ओं श्रीकृष्णाय नमः । श्रीकृष्णाय नमः ।

Colophon :

Author—Devanārāyaṇa.

Remarks—The last fourteen leaves embody an index to the Vedic and legal citations given in the text.

## ॥ वेदान्तविवेकः (न्यायरत्नदीपावलीव्याख्यानम्) ॥

## No. 365. VEDĀNTAVIVEKA (NYĀYARATNADĪPĀVALĪVYĀKHYĀNAM).

C. O. L. No. 58.

Substance—Paper. Size—14″ × 9″. Pages — 484. 20 lines per page and 20—22 letters per line. Script—Devanāgarī. No. of Granthas—6000. Incomplete.

Owner—C. O.

Subject—Elaborate exposition of the Nyāyaratnadīpāvalī.

Beginning:

श्रीः

श्रीमदानन्दज्ञानकृतवेदान्तविवेकाख्यन्यायरत्नदीपावलीव्याख्यानप्रारम्भः ।

... ...नन्यमोहमहिमप्रत्युद्यदाधिद्वय-
मत्रादिद्वयमद्वयेन वपुषा विभ्रन्नदभ्रत्विषा (?) ।
वेदप्रौढमतिप्रविष्टमखिलं प्लुष्ट... ...
... ...ये स्वेनैव वस्वात्मना ॥

नमस्त्रय्यन्तसन्दोहसरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥

प्रारिप्सितप्रकरणाविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टदेवतानुस्मरणपूर्वकं तन्नमस्काररूपं मङ्गलाचरणं मुखतः सम्पादयन्नर्थाद्विषयादि चाचक्षाणश्चिकीर्षितं प्रतिजानीते—हरिमित्यादि ।

End :

आचार्येति । स्वरूपतो निर्दोपत्वं निर्दिशति—सन्न्यायेति । विषयतो विदोषतामाभाषते—उद्योतयन्तीति । तस्या निरतिशय-पुरुषार्थहेतुभूतसम्यग्ज्ञानजनकतया तत्र श्रोतॄणां प्रवृत्तिं प्रार्थयते—दीपावलीति—

शुद्धानन्दमुनीश्वरं सुविशदं ज्ञानामृताम्भोनिधिं
संसेव्य प्रतिलब्धबुद्धिविभवं सद्बुद्धिसंवर्धनम् ।
वेदान्तार्थविवेकमर्थगहनं स्वार्थप्रवाहावहं
चक्रे वक्रविलक्षणेन सुपथेनानन्दपूर्वो गिरिः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते न्यायरत्नदीपावलीव्याख्याने वेदान्तविवेके चतुर्थोऽध्यायः ।

ओं नमो ब्रह्मणे ।
वन्दे वन्दारुगीर्वाणशिखामणिशिखारुणम् ।
नारायणपदाम्भोजद्वन्द्वं लोकैकमङ्गलम् ॥
सम्पूर्णोऽयं ग्रन्थः ।

Author—Ānandajñāna.

Remarks—This work aims at the establishment of Advaita by refuting other systems. The author has written a commentary on Śaṅkarabhāṣya. This work is noticed as No. 3604, TCM. Vol. IV, Part I B. Nyāyaratnadīpāvalī has been referred to in the Citsukha.

## ॥ वेदान्तशास्त्रसिद्धान्तसारसंग्रहः ॥

## No. 366. VEDĀNTAŚĀSTRASIDDHĀNTA-SĀRASAṄGRAHA.

C. O. L. No. 521.

Substance—Paper. Size—13″ × 8″. Pages — 145. 18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1232.

Owner—Harihara Śāstrī, Shencottah.

Subject—Same as No. 633. DCSMMPL.

Beginning :

श्रीः ।

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रये ऽभीष्टसिद्धये ॥
यदालम्बो दरं हन्ति सतां प्रत्यूहसम्भवम् ।
तदालम्बे दयालम्बं लम्बोदरपदाम्बुजम् ॥
अर्थतोऽप्यद्वयानन्दमतीतद्वैतलक्षणम् ।
आत्मारामम्हं वन्दे श्रीगुरुं शिवविग्रहम् ॥
वेदान्तशास्त्रसिद्धान्तसारसङ्ग्रह उच्यते ।
प्रेक्षावतां मुमुक्षूणां सुखबोधोपपत्तये ॥
अस्य शास्त्रानुसारित्वादनुबन्धचतुष्टयम् ।
यदेव मूलशास्त्रस्य निर्दिष्टं तदिहोच्यते ॥

End :

इत्युक्त्वा स्वगुरुं नत्वा भूयो भूयः पुनः पुनः ।
कृतार्थोऽस्मीति शिष्योऽसौ सुखं तस्थौ समाहितः ॥

मुक्तं शिष्यं परित्यज्य गुरुः सन्तुष्टमानसः ।
वृत्तिं प्रत्यङ्मुखीं कृत्वा रमयामास निर्गुणे ॥
इति वेदान्तशास्त्रस्य तात्पर्यं गुरुशिष्ययोः ।
संवादेन विनिर्णीतं साधुना मुक्तिसाधनम् ॥
श्रीगुरूनद्वयानन्दं सदानन्दं च तद्गुरुम् ।
तद्गुरुं शङ्करानन्दं प्रणमामि पुनः पुनः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदद्वयानन्दसरस्वती-शिष्यसदानन्दसरस्वतीकृतो वेदान्तशास्त्रसिद्धान्तसारसंग्रहः समाप्तः ।

Author—Sadānanda Sarasvatī.

Remarks—The closing lines disclose that Advayānanda was the preceptor of Sadānanda Sarasvatī. The latter may be identified with Sadānanda, the author of Vedāntasāra for both pay their respects to the preceptor, Advayānanda. Advayānanda was a disciple of Śaṅkarānanda.

---

## ॥ वेदान्तसारः ॥

### No. 367 A. VEDĀNTASĀRA.

C. O. L. No. 2203 A.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—31. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 372. Complete.

Owner—Kuñjan Nambūripād, Cittūr Manakkal, Corpu.

Subject etc.—Same as No. 633, DCSMMPL.

Remarks—After colophon the following portion occurs :

൯൫൰—ാമാണ്ടു മകരമാസം ൨൭—ാന്തു എഴുതിയ വേദാന്ത സാരഗ്രന്ഥം.

---

## ॥ पराशरस्मृतिः ॥

## No. 367 B. PARĀŚARASMṚTI.

C. O. L. No. 2203 B.

Substance—Palm leaf. Size—7½" × 1¾". Leaves—50. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 600.

Owner—Same as No. 367 A.

Subject—The expiatory rites prescribed in the Dharma Śāstra.

Author—Parāśara.

Remarks—This work is available in print. It contains a greater number of Granthas than the printed edition. The following portion occurs after the colophon:

൯൫൰—ാമതു കുംഭമാസം ൧൧—ന്തു തൃക്കേട്ടയും ശനിയാഴ്ച്ചയും അപരപക്ഷത്തു നവമിയും കൂടി യോഗമായ സമയെ നാലുനാഴികപുലരുമ്പോൾ എഴുതി തീൎന്ന പരാശരസ്മൃതി. ചെമ്പിൽ ഭഗവതി പ്രസാദിക്കണമെ.

## ॥ विष्णुसहस्रनामव्याख्यानम् ॥

## No. 367 C. VIṢṆUSAHASRANĀMA-VYĀKHYĀNAM.

C. O. L. No. 2203 C.

Substance—Palm leaf. Size—7½" × 1¾". Leaves—42. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—504. Complete.

Owner—Same as No. 367 A.

Subject—A commentary on Viṣṇusahasranāma.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ॥

प्रणम्य देवं यदुसिंहमच्युतं
जगज्जनिस्थाननिरोधसाक्षिणम् ।
करोमि भक्त्या लघुवृत्तिमादरात्
सहस्रनामाख्यमनोविमुक्तये ॥

तत्र युधिष्ठिरस्य भीष्मं प्रति नामसहस्रप्रशंसावसरः प्रतिपाद्यते—श्रुत्वा धर्मानित्यादिना । पावनानि पवित्रीकरणानि कर्माणि । प्रश्नप्रकारमाह—किमेकमिति द्वाभ्याम् । किमेकं दैवतं प्रधानदेवः कः इति प्रथमः प्रश्नः । अस्मिन् लोके पुरुषार्थेप्सूनां प्रधानाश्रयः क इति द्वितीयः । स्तुवन्तः कमर्चयित्वा च मानवाः शुभं प्राप्नुवन्तीति तृतीयः । चतुर्थः सर्वधर्माणां श्रेष्ठ इति । भवतः को धर्मोऽभिप्रेत इति पञ्चमः । कं मन्त्रं ब्रुवन्

पुरुषः संसारबन्धनान्मुच्यते इति षष्ठः । एवमेते युधिष्ठिरस्य षट् प्रश्नाः ।

End :

पुनरपि नामसहस्रफलमभिधायोपसंहरति- इमं स्तवमिति द्वाभ्याम् । यः पुरुषः श्रेयः सुखानि च प्राप्तुमिच्छेत्, स विष्णोरिमं स्तवं पठेद् इति सम्बन्धः । श्रेयो मोक्षः । व्यासेन कीर्तितमित्यस्य महत्त्वं द्योतयति—विश्वेश्वरमिति । ये एवम्भूतं विष्णुं नामसहस्रेण भजन्ति ते पराभवं न यान्ति बाह्यैराभ्यन्तरैश्च शत्रुभिः अजिताः सन्तोऽमृतत्वमाप्नुवन्तीत्यर्थः ।

Colophon :

सहस्रनामव्याख्यानं समाप्तम् ।

Author :

Remarks— Unlike Śrī Śaṅkarācārya, the author does not give the origin and etymology of words. The synonyms in conformity with Śaṅkarācārya's view form the theme of this work. The identity of the author is not discernible from the text.

---

## ॥ वेदान्तसारतत्त्वदीपिका ॥

No. 368. VEDĀNTASĀRATATTVADĪPIKA:

. O. L. No. 106.

Substance—Paper. Size—13″ × 9″. Pages — 68.

21 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—850.

Owner—C. O.

Subject—A commentary on the Vedāntasāra.

Beginning:

अनन्तगुणसम्पन्नमनन्तमजनप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥

आपदेवेन वेदान्तसारतत्त्वस्य दीपिका ।
सिद्धान्तसम्प्रदायानुसारेण क्रियते शुभा ॥

प्रतिज्ञातं वेदान्तपदं व्याचष्टे---वेदान्तेति । उपनिषद्रूपमात्मनः प्रमाणमित्यर्थः । यद्वा उपनिषच्छब्देनात्मज्ञानमुच्यते । तस्य प्रमाणं कारणमित्यर्थः ।

End:

जीवन्मुक्तस्य नाशुभे प्रवृत्तिरित्याह---अस्येति । तत्त्वज्ञानस्य तथैव स्वभाव इति भावः । तदानीमिति । ज्ञानस्य सिद्धत्वादिति भावः । उपसंहरति---किं बहुनेति । आपादने वेदान्तज्ञान इति । प्रारब्धक्षये सतीत्यर्थः ॥

अनन्ताङ्घ्रियुगं स्मृत्वा रचिता बालबोधिनी ।
आपदेवेन वेदान्तसारतत्त्वस्य दीपिका ॥

Colophon:

इति वेदान्तसारतत्त्वदीपिका समाप्ता ॥

Author---A disciple of Anantadeva. He is also credited with the Mīmāmsānyāyaprakāśa. He was

well-versed in the Mīmāmsā philosophy. A different treatise known as Dīpikā on Uttaramīmāmsā has been composed by him. He was born in the 17th century in Devopa family.

Remarks—This is identical with No. 1908, TCM. Vol. II, Part I C.

---

## ॥ वेदान्तसारसंग्रहः ॥

## No. 369 A. VEDĀNTASĀRASAṄGRAHA.

C. O. L. No. 131 A.

Substance — Paper. Size—11" x 9". Pages — 5. 20 lines per page and 18 letters per line. Script —Malayālam. No. of Granthas — 50. Complete.

Owner—C. O.

Subject—A compendium of the Advaita philosophy.

Beginning :

नत्वा हरिहरव्यासभाष्यकारादिदेशिकान् ।
बालबोधाय वेदान्तसारः संगृह्यते स्फुटम् ॥

इह कश्चित् पुरुषधौरेयः कुतश्चिद् भाग्योदयाद् अनुष्ठितनिष्कामकर्मकलापः सन् समाराधितपरमेश्वरानुग्रहात् परिशुद्धान्तःकरणः स्वयमेव नित्यानित्यवस्तु च विवेचयति ।

End :

मुमुक्षुकाङ्क्षितो ग्रन्थः शिवराममनीषिणा ।
कृतो वेदान्तसाराख्यस्तेन तुष्यतु शङ्करः ॥

य इमं ग्रन्थमालोच्य प्रमेयं दधते हृदि ।
आविर्भूतं भवेद् ब्रह्म सत्यज्ञानसुखात्मकम् ॥

Colophon :

इति शिवरामभट्टाचार्यकृतवेदान्तसारसंग्रहः ।

Author--Sivaramabhattacarya.

Remarks--This is a manual pertaining to the Advaita school. Its title is based on the colophon.

---

## ॥ वेदान्तसारसंग्रहव्याख्यानम् (आत्मबोधामृतम्) ॥

### No. 369 B. VEDĀNTASĀRASAṄGRAHA-VYĀKHYĀNAM.

(Ātmabodhāmṛtam.)

C. O. L. No. 131 B.

Substance—Paper. Size—11″ × 9″. Pages — 35. 20 lines per page and 18 letters per line. Script--Malayāḷam. No. of Granthas--350.

Owner--C. O.

Subject—A commentary on the Vedāntasāra-saṅgraha.

Beginning :

यत्प्रसादप्रकाशेन ममाज्ञानं निराकृतम् ।
तं सर्वेश्वरतीर्थाख्यगुरुं ध्यायामि सर्वदा ॥
हरिब्रह्ममहेशानव्यासशङ्करदेशिकान् ।
नत्वा स्वकृतवेदान्तसारव्याकृतिमारभे ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय स्वानुष्ठितमङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेति ।

End :

तावत्कीर्तिर्मनुष्यस्य लोके तिष्ठति शाश्वती ।
तावत् पुण्यकृतान् लोकाननन्तान् पुरुषोऽश्नुते ॥

इति शास्त्रार्थमनुसन्दधानः स्वनाम प्रकटयन् स्वग्रन्थं मोक्षसु-
खप्रदं परमेश्वरायार्पयति- -मुमुक्षिवति ।

प्रमथ्य शास्त्रक्षीराब्धिं युक्तिमन्थाद्रिणोद्धृतम् ।
मयात्मज्ञानममृतं स्वीकुरुध्वं बुधोत्तमाः ॥

Colophon :

इति शिवरामभट्टाचार्यविरचितस्वकृतवेदान्तसारसङ्ग्रह-
व्याख्या आत्मबोधामृताख्या समाप्ता ।

प्रत्यगभिन्नसच्चिदानन्दपरिपूर्णब्रह्मैवाहमस्मि । श्रीमत्सर्वेश्वरती-
र्थगुरुचरणारविन्दाभ्यां नमः ।

Author—Śivarāmabhaṭṭa.

Remarks—This work contains a compendious explanation of certain philosophic subjects.

---

## ॥ गोविन्दाष्टकम् ( सव्याख्यम् ) ॥

## No. 369 C. GOVINDĀṢṬAKAM

with commentary.

Substance — Paper. Size—11″ × 9″. Pages — 5. 20 lines per page and 20 letters per line. Script—Devanagarī. No. of Granthas — 60. Incomplete.

Owner—C. O.

Subject—The nature of Nondual Brahma.

Beginning :

इह खलु सकललोकहितावतारो भगवान् महाविष्णुर्भूवनिताभ्यर्थितो भूभारपरिजिहीर्षया यदुकुलेऽवतीर्णः सनकादिमुनिजनैरनुदिनमनुगीयमानसच्चरितो भगवान् नन्दगोपवेश्मनि विजहार । तमेव विहारमष्टभिः श्लोकैः सत्यमित्यादिभिरुपवर्णयन् भगवान् पूज्यपादमुनिः निरस्तसमस्तविशेषं सच्चिदानन्दाद्वयं परमात्मानमभिष्टौति ---

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठप्राङ्गणरिङ्खणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारं
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥

End :

मातृमान् पितृमानाचार्यवान् ब्रूयाद् 'आचार्यवान् पुरुषो वेदे'ति श्रुतेरस्यापि मातृशिक्षितत्वं प्रदर्शयति- --

मृत्स्नामत्सीहेति यशोदाताडनशैशवसन्त्रासं
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम् ।
लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकं
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ॥

मृत्स्नेति । हे कृष्ण इहास्मिन् मन्दिरे क्षीरनवनीतादिभिराढ्ये । मृत्स्ना... ... ... ... ...

Colophon :

Author—Text : Śaṅkarācārya.

Remarks—After the text are noticed the following verses :

तथा तु तेषां वसतां (भृ?ऋ)क्षवानरक्षसाम् ।
राघवस्तु महातेजाः सुग्रीवमिदमब्रवीत् ॥

गम्यतां सौम्य किष्किन्धां दुराधर्षां सुरासुरैः ।
पालयस्व महामात्यै राज्यं निहतकण्टकम् ॥

असन्निधौ संस्मरणं स्वसन्निधौ
गतोपलब्धस्य मणेरिवेक्षणम् ।
यथोचितायाचितदानमित्यमी
त्रयः प्रभोराश्रयणीयतागुणाः ॥

## ॥ अद्वैतमकरन्दव्याख्या (रसाभिव्यञ्जिका) ॥

No. 369 D. ADVAITAMAKARANDAVYĀKHYĀ (RASĀBHIVYAÑJIKĀ).

C. O. L. No. 131 D.

Substance—Paper. Size — 11" × 9". Pages — 50. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas — 500. Incomplete.

Owner—C. O.

Subject—A commentary on the Advaitamakaranda.

Beginning :

पूर्णचन्द्रमसि बोधविग्रहे मोहराहुमुषितात्मतेजसि ।
स्नानदानयजनादिका क्रिया मोचनावधि मुदावतिष्ठते ॥

अज्ञानमात्मा चेत्युभयमेव शबलम् । अज्ञानद्वारात्मैवोपादानं निमित्तं च । शबल एवाद्वितीयादिपदव्युत्पत्तिरित्यस्मन्मतम् ।

मतान्तरे अज्ञानविशिष्टात्मा। शबलं विशिष्टं च। विशेषणविशेष्याभ्यामन्यत्। विशिष्टस्य जडतया ईक्षणाद्यसम्भवात्प्रतिबिम्बिताधिष्ठानचैतन्यस्य निमित्तत्वं विशिष्टस्योपादानत्वमित्युपाधिप्राधान्येनोपादानत्वम् उपहितप्राधान्येन निमित्तत्वम्।

End—Colophon: Same as No. 541. DCSMMPL.

Author—Svayamprakāśa.

Remarks—Same as No. 248 B.

---

## ॥ वेदान्तसारसंग्रहः (सव्याख्यः) ॥

### No. 370. VEDĀNTASĀRASAṄGRAHA with commentary.

C. O. L. No. 146.

Substance—Paper. Size—14″ × 9″. Pages—48. 18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—450. Complete.

Owner—C. O.

Subject etc.—Same as No. 369 B.

Remarks—The Ms. contains also the text.

---

## ॥ वेदान्तसारसंग्रहः (सव्याख्यः) ॥

### No. 371 A. VEDĀNTASĀRASAṄGRAHA with commentary.

C. O. L. No. 913 A.

Substance—Palm leaf. Size—16″ × 2″. Leaves—19.

9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Owner—Muñcira Maṭham.

Subject etc.—Same as No. 369 B.

Remarks—Three more Mss. are found in this codex. They are catalogued separately. The work is identical with No. 4749 DCSM. Madras Vol. IX. After colophon occurs the following verse :

हरिगीतपुराधीश करुणाकर कामद ।
समुद्धर जगद्धातः पतितं भवसागरे ॥

---

## ॥ आचारनिर्णयः ॥

### No. 371 B. ĀCĀRANIRṆAYA.

C. O. L. No. 913 P.

Substance—Palm leaf. Size—16″ × 9″. Leaf—1. 9 lines per page and 60 letters per line. Script — Malayāḷam. No. of Granthas—35. Complete.

Owner—Same as No. 371 A.

Subject—Enumeration of 64 religious customs prevalent in Kerala.

Beginning :

हरिः । श्रीगणपतये नमः ।

चतुःषष्टिमनाचारान् केरलेषु वदन्ति हि ।
अन्यत्राचरणाभावादनाचारास्त ईरिताः ॥

धर्मशास्त्राणि सकलान्यालोच्य श्रेयसे नृणाम् ।
श्रीशङ्कराचार्यपादश्चक्रे तान् कृपयान्वितः ॥

वर्जयेद्दन्तकाष्ठानि नित्यस्नाने सचेलताम् ।
स्नानवस्त्रेणाङ्गमार्ष्टिं सन्ध्याप्राङ्मज्जनं तथा ॥

पचनादिक्रमस्नात्वा नैकरात्रोषितं जलम् ।
स्नानादौ फलसंकल्पं पात्रोच्छिष्टस्थितोदकम् ॥

End :

आशीर्वादो न कर्तव्यो नमस्कारश्च भूसुरैः ।
वार्षिकीं पशुहिंसां च न कुर्यान्मोक्षमिच्छुभिः ॥

शैववैष्णवतन्त्रोक्तमतिनान्यांश्च वर्जयेत् (?) ।
एकयज्ञोपवीतः स्याज्ज्येष्ठो भ्राता गृही भवेत् ॥

अन्नश्राद्धं च क्षत्राद्यैः कार्यं मातुलपैतृकम् ।
दायं तु भागिनेयेषु संन्यासाश्रमवर्जनम् ॥

मृते भर्तरि तद्योषित् कुर्यात्सहमृतिं न च ।

Colophon :

इत्याचारनिर्णयः समाप्तः ।

Author :

Remarks—This Ms. is small. Nevertheless the 64 customs prevalent in Kerala are expressed in 28 verses in Anuṣṭup metre.

## ॥ पञ्चीकरणविवरणम् ॥

### No. 371 C. PAÑCĪKARAṆAVIVARAṆAM.

C. O. L. No. 913 C.

Substance—Palm leaf. Size—16″ × 9″. Leaves—7. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas — 182. Complete.

Owner—Same as No. 371 A.

Subject etc.—Same as No. 586, DCSMMPL.

Remarks—This is noticed as No. 4637 in DCSM. Madras Vol. IX. After the colophon occurs the following verse in praise of Kumāra, the presiding deity of the temple at Harippād in central Travancore:

हरिगीतपुराधिवासलोलं
गिरिजाकान्तमुखारविन्दसूर्यम् ।
अखिलार्तिविनाशनाय नित्यं
कलये तारकमारकं कुमारम् ॥

ഉയന്ന മഠത്തിൽ പെരിയ തിരുമുൽപ്പാട്ട്.

---

## ॥ विश्वेश्वरस्मृतिः ॥

### No. 371 D. VIŚVEŚVARASMṚTI.

C. O. L. No. 913 D.

Substance—Palm leaf, Size—16″ × 9″. Leaves—53

10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1722. Complete.

Owner—Same as No. 371 A.

Subject—Laws appertaining to the Sanyāsāśrama.

Author—Viśveśvarasarasvatī.

Remarks—This work in the main deals with the explanation of the laws pertaining to Sanyāsāśrama and the expiatory rites to be observed on their violation. It is printed in the Ānandāśrama series, Poona, under the title, Yatidharmasamuccaya.

---

## ॥ वैयासिकसूत्रोपन्यासः ॥

## No. 372. VAIYĀSIKASŪTROPANYĀSA.

C. O. L. No. 2461.

Substance——Palm leaf. Size—14½" × 2". Leaves—11. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—3100. Complete.

Owner—Valia Rāja, Edappally.

Subject—A descriptive essay on Brahmasūtras.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

बोधानन्दगणाध्यक्षं कालमूषिकवाहनम् ।
जन्मादिविघ्नहर्तारं भजे निजगुरुं सदा ॥ १ ॥
विद्याशङ्करपादाब्जपरागाः पान्तु पावनाः ।
निस्तमस्कसदानन्दसाक्षात्करणहेतवः ॥ २ ॥
नमामि शुद्धविज्ञानमात्मभारतिसद्गुरुम् ।
यस्यावलोकनान्मूको वावदूकत्वमाप्नुयात् ॥ ३ ॥
आचार्यभाष्यतट्टीकातन्निबन्धनसागरात् ।
सदर्थरत्नान्युद्धृत्य सूत्रेषु ग्रथयाम्यहम् ॥ ४ ॥

अथातो ब्रह्मजिज्ञासा । इह खलु सूत्रे सर्वज्ञबादरायणप्रणीतत्वादानर्थक्यानुपपत्तेर्निरर्थकसिद्धबोधकत्वानुपपत्तेश्च शास्त्रे पुरुषप्रवृत्त्युपयोगितया कर्तव्येति पदमध्याहर्तव्यम् ।

End :

अर्चिरादिमार्गेण ब्रह्मलोकं गतानामनावृत्तिः । पुनश्चन्द्रलोकं गतानामिव पुनरावृत्तिः(?) । कुतः । न स पुनरावर्तते, एवं न प्रतिपद्यमाना, इमं मानवमावर्तन्नावर्तन्ते इत्यादिशब्दात् । अनुमानस्य तु क्रममुक्तिप्रतिपादकशब्दविरोधादनुत्थानमिति । सूत्राभ्यासः शास्त्रपरिसमाप्तौ ।

Colophon :

वैयासिकानां सूत्राणामुपन्यासः कृतो मया ।
अलसानां नृणामीषत्प्रतीतिर्जायतामिति ॥
टीका स्नेहविहीनापि व्याससूत्रार्थदीपिका ।
इत्थं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

इति वैयासिकसूत्रोपन्यासे चतुर्थाध्यायस्य चतुर्थः पादः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरभारतीविरचितो वैयासिकसूत्रोपन्यासः समाप्तः ।

ज्ञानार्जनार्थिमेध्या वृत्तिः शारीरकाख्यसूत्राणाम् ।
केरळलिप्या लिखिता चोळलिपिं वीक्ष्य शङ्करेणेयम् ॥

Author—Rāmesvara Bhāratī.

Remarks—The Ms. is in very tidy and clean and the script is faultless and legible. The author makes respectful reference to Bodhānanda and Ātmabhāratī in the beginning of the work and hence he was probably their disciple.

---

## ॥ वैयासिकसूत्रोपन्यासः ॥

### No. 373. VAIYĀSIKASŪTROPANYĀSA.

C. O. L. No. 121.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—285. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3565. Complete.

Owner—C. O.

Subject etc.—Same as No. 372.

Remarks—The author attempts to bring to light the important and noteworthy portions occurring in Śaṅkarācārya's Brahmasūtrabhāṣya and its Ṭīkā. Nyāya, Vaiśeṣika and Mīmāmsā are also referred to and refuted here and there. (vide page 5247, DCSM Tanjore Vol. XII.)

## ॥ शाङ्करभाष्यविवरणम् ॥

## No. 374. ŚAṄKARABHĀṢYAVYĀKHYĀ.

C. O. L. No. 304.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—76. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas — 950. Incomplete.

Owner—C. O.

Subject—Beginning: Same as No. 605, DCSMMPL.

End :

एवं सूत्रस्यादित्वेन कारणेन सूत्रतया च विषयप्रयोजनं तत्सिद्धिकारं(?) च विद्याख्यं ग्रन्थं सामर्थ्यावगतमापाद्य तत्र सूत्रस्य सामर्थ्यं दर्शयितुं प्रतिपदं व्याख्यामारभते ।

Colophon :

Author :

Remarks—Another title of this work is Pañcapādikā (Vide p. 5196 No. 7048 DCSM. Tanjore Vol. XII.) The author of the one noticed in the Tanjore Catalogue is Padmapādācārya. The commentary is lucid and simple. It sets at naught the *Mahāyānamata*, and *Buddhamata*. Only a portion of the first Brahmasūtrabhāṣya is commented upon here. The work is printed in CSSB.

---

## ॥ शाङ्करभाष्यविवरणम् (प्रकटार्थम्) ॥

No. 375. ŚAṄKARABHĀṢYAVIVARAṆAM.
(Prakaṭārtham)

C. O. L. No. 446.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—615. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—9500. Complete.

Owner—C. O.

Subject—Elaborate exposition of the Śaṅkara Brahmasūtrabhāṣya.

Beginning :

सत्यं ज्ञानमनन्तं यत् कूटस्थं सुखविग्रहम् ।
नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ॥

ज्ञात्वापि यस्य बहुकालमचिन्तनेन
व्याख्यातुमक्षमतया परितापि चेतः ।
तस्योपतापहरणाय मयेह भाष्ये
प्रारभ्यते विवरणं प्रकटार्थमेतत् ॥

श्रीमच्छारीरकं व्याचिख्यासुर्भगवान् भाष्यकारो विषयाद्यसंभवेनाव्याख्येयत्वमाशङ्क्य बन्धमिथ्यात्वाङ्गीकारेण विषयादिकं सम्भावयन् व्याख्येयत्वं प्रतिजज्ञे—युष्मदस्मदित्यादिना ।

End :

ब्रह्मात्मैक्यसाक्षात्कारप्रसूताविद्यानिवृत्त्या विद्याश्रयणेनैवानावृत्तिरित्यर्थः । सूत्राभ्यासस्यार्थमाह—अनावृत्तिरिति ।

शुद्धं ब्रह्मास्म्यहं नित्यमक्षरं परमं पदम् ।
तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया ॥

Colophon :

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे चतुर्थोऽध्यायः समाप्तः ।

सर्वेषु भूतेषु चतुर्विधेषु
स्थितो हरिस्तत्र हरौ च तानि ।
सोऽहं हरिः सर्वमिदं.......
त्युत्पद्यते यस्य मतिः स मुक्तः ॥

Author :

Remarks—Each topic is exhaustively discussed herein.

---

## ॥ शाब्दनिर्णयः ॥

### No. 376. ŚABDANIRṆAYA.

C. O. L. No. 134.

Substance—Paper. Size—$13\frac{1}{4}'' \times 8\frac{1}{2}''$. Pages—82. 18 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—1000. Incomplete.

Owner—C. O.

Subject—Explication of *Śabdapramāṇa* according to the Vedāntic school.

Author—Prakāśātmayati.

Remarks—Page 80 of the transcript is blank and the loss of one leaf in the original is noted herein. This work has been published in TSS. as No. 53.

---

## ॥ शाब्दनिर्णयदीपिका ॥

No. 377. ŚĀBDANIRṆAYADĪPIKĀ.

C. O. L. No. 849.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—127. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—2300. Incomplete.

Owner—Sūryanbhaṭṭatiri.

Subject—Explication of the Śābdanirṇaya.

Beginning :

......रम्येदार्नीम् इत्यतः प्राक्तनेन ग्रन्थ... ... ...अत्र केचिदाहुः—वक्तुर्वाक्यार्थविषये विवक्षां प्रमाणान्तरं वा समधिगमयन्ति शब्दाः न त्वर्थमात्रमिति । स्यादेतत् । विवक्षामूलप्रमाणयोरन्यतरस्यैव शब्दबोध्यत्वे कथं पदकदम्बकश्रवणसमनन्तरं श्रोतुरर्थे व्यवहार इति । तत्राह—

End :

किन्त्वाशुतरविनाशितालक्षणवाम्यां द्वित्रिक्षणावस्थायिन्यामाश्रीयत इति भावः । ततश्चैतत्सिद्धमित्याह—

ततो निःश्रेयसप्राप्तिस्तादृश्यच्छिन्नाब्दनिर्णयः ।
विशिष्टफलसम्बन्धी श्रोतव्योऽयं मुमुक्षुणा ॥

सम्प्रति सविनयं सज्जनान् प्रार्थयते—

विदितसकलवेद्यैर्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः
स्वमतिविम्रताये क्षन्तुमर्हन्ति सन्तः ॥

इति । गुरून् नमस्यति—

वन्दे तमात्मसम्बुद्धस्फुरद्ब्रह्मावबोधतः ।
अर्थतोऽपि न नाम्नैव यो ......त्मभावतः ॥

Colophon :

Author :

Remarks—Both the beginning and close of this Ms. are missing. The Ms. is much worn away. Authoritative citations from *Advaitamata* are given in profusion.

---

## ॥ शाब्दनिर्णयदीपिका ॥

No. 378. ŚABDANIRṆAYADĪPIKĀ.

C. O. L. No. 437.

Substance—Paper. Size—13½" × 8½". Pages—205. 20 lines per page and 21 letters per line. Script—Devanāgarī. No. of Granthas—2700.

Owner—C. O.

Subject—Same as No. 377.

Beginning:

यद्भासा निखिलं विभाति विषये यो न स्वयं ज्योतिषां
यस्याहुर्भुवनोद्भवस्थितिलयान् लीलामयान् सूरयः ।
यं चागोचरमामनन्ति मनसां वाचां च विश्वात्मने
तस्मै शुद्धसुखाद्वितीयवपुषे शश्वन्नमो विष्णवे ॥

श्रोतृमोहतिमिरापहारिणी
शुद्धनीतिनिकुरुम्बदीधितिः ।
शाब्दनिर्णयमदर्थभासिका
दीपिकेयममला विधीयते ॥

इह हि ग्रन्थमारभमाणाः शिष्टाः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये मङ्गलाचरणं कुर्वन्तो दृश्यन्ते ।

End—Same as No. 377.

Remarks—In the transcript it is observed that 20 pages after the 185th and 5 after the 202nd are missing in the original.

---

## ॥ शारीरकमीमांसाविवृतिः ॥

## No. 379. ŚĀRĪRAKAMĪMĀMSĀVIVṚTI.

C. O. L. No. 266.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—322. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3975. Complete.

Owner—C. O.

Subject—A simple commentary on Śaṅkara-bhāṣya on Brahmasūtra.

Beginning:

श्रुतिस्मृतिपुराणानामालयं करुणानिधिम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥
शङ्करं शङ्कराचार्यं केशवं बादरायणिम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
"मन्नियोगाद्धरिः साक्षादतीव श्रद्धयान्वितः ।
कृष्णद्वैपायनो भूत्वा ब्रह्मचारी जितेन्द्रियः ॥
वेदान्तानां प्रतिष्ठार्थं मुने सूत्रं करिष्यति" ।

इति वचनाच्छिवाज्ञयावतीर्णसूत्रकृत् सूत्रितप्रथमसूत्रस्थया जिज्ञासेति प्रकृत्या सूत्रितमार्थिकार्थं ज्ञाननिवर्त्यम्--

"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ॥"

इति वचनाद् अवश्यवक्तव्यत्वावगतप्रयोजनादिसिद्धिहेतुं कर्तृत्वाद्यनर्थात्मकबन्धस्य अन्यत्र अन्यधर्मावभासलक्षणमध्यासं सदृष्टान्तं वदन्नादौ स्वरूपानुसन्धानलक्षणं मङ्गलमाचरति—

पञ्चकोशाधिवासं यत् तित्तिरिश्रुतिबोधितम् ।
सत्यज्ञानसुखानन्दं परं ब्रह्म तदस्म्यहम् ॥

End:

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

नाडीरश्मिसमन्वितेन अर्चिरादिपर्वणा देवयानेन पथा ये शास्त्रोक्तविशेषणं ब्रह्मलोकं गच्छन्ति, ते ब्रह्मलोकं प्राप्य चन्द्र-

लोकादिवद् भुक्तभोगा नावर्तन्ते । कुतः । 'एतेन प्रतिपद्यमानाः इमं मानवमावर्तं नावर्तन्त' इति ब्रह्मलोकमभिसम्पद्यन्ते । 'न च पुनरावर्तते न च पुनरावर्तते' इत्येवमादिभ्यः शब्देभ्यः अनावृत्तिरवगम्यते । अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः सूत्रसमाप्तिं द्योतयति ।

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्पादकृतौ शारीरकमीमांसाविवृतौ चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

शारीरकमीमांसाविवृतिः समाप्ता ।

Author :

Remarks—A work with the title Brahmasūtravivṛti attributed to Śaṅkarācārya is noticed on p. 133, DCSM. Adyar, Vol. II. But this work inspite of the colophon cannot be attributed to Śaṅkara for in the introductory verses the author propitiates Śrī Śaṅkara. The passage "ब्रह्मसूत्राणि व्याचिख्यासुर्भगवान् भाष्यकारः" occurring on p. 4 bears out that the author is some other person than Śaṅkara.

॥ शास्त्रसंग्रहः ॥

No. 380. ŚĀSTRASAṄGRAHA.

C. O. L. No. 764.

Substance—Palm leaf. Size—12" × 1½". Leaves—30. 8 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Owner—Tirunakkara Svāmiyār Maṭhom, Kottayam.

Subject—A discussion on the union of Jīva and Brahma.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गीर्वाणेन्द्रसरस्वत्याः पादाब्जं हृदि बिभ्रतः ।
श्रीधरस्य मुदे भूयात् सूत्रभाष्यार्थसङ्ग्रहः ॥

हेरम्बं च सदाशिवं वटगतं वागीश्वरीं शाश्वतीं
व्यासं शङ्करनामधेयगुरुमप्यस्मद्गुरुं षण्मुखम् ।
गोविन्दं च जगद्गुरुं शमनिधिं विद्यागुरुं गोपतिं
वन्दे सर्वनिदानमेकममलं ब्रह्मापि सच्चित्सुखम् ॥

कृष्णानुस्मृतियानिभिः क्रियते शास्त्रसङ्ग्रहः ।
निर्मत्सरैर्जनैर्नित्यं क्रियतामस्य सङ्ग्रहः ॥

अस्पष्टसङ्गतिपदार्थमिदं हि सूत्रं
वैयासिकं तदहमद्य निरीक्ष्य भाष्यम् ।
विस्पष्टसङ्गतिपदार्थयुतं विधास्ये
पद्यत्रयानुगतगद्यमयैर्वचोभिः ॥

भाष्यार्थमात्रमिदमस्य न कोऽपि भेदः
सङ्गृह्य किञ्चिदुदितं किमनेन पद्यैः ।
इत्येवमादि यदि दूषयतीह कश्चि-
द्धन्ताधुनाभिलषितं फलितं मदीयम् ॥

End :

अत्र मृद्दारुमयस्य सेतोरसम्भवात् । अतो विधारकत्वं लक्ष्यते । तच्च ब्रह्मणः सम्भवति 'एष सेतुर्विधृतिरेषां लोकानामसम्भेदाये'त्यादिश्रुतेः । तस्माद् द्युभ्वाद्यायतनं ब्रह्म नार्थान्तरमिति सिद्धम् ।

त्रैलोक्यायतनत्वात्परममहत् सूचितं ब्रह्म पूर्वम् ।
तदिदं विशदीकर्तुं श्रुतिमुखतोऽथ प्रवर्तते सूत्रम् ॥
यद्वा, द्युपृथिवीजगदाश्रयम् ।

Colophon :

कृष्णानुभूतियतिभी रचित शास्त्रसङ्ग्रहे ।
द्वितीयपादः सम्पूर्णः प्रथमाध्यायसंश्रितः ॥

Author—Kṛṣṇānubhūtiyati.

Remarks—This Ms. contains the commentary on two *Pādas* only and the 1st *Adhikaraṇa* of the 3rd *Pāda* in the 1st chapter. The author succinctly expounds the meaning of Brahmasūtra. The work is noticed under No. 2905, TCM. Vol. IV. Part I A, wherein it is designated, Śārīrakamīmāṃsāsaṅgraha. Kṛṣṇānubhūtiyati *alias* Vibudhendratīrtha was a disciple of Ānandānubhūti whose patrons were Rājarāja and Ravivarman, kings of Kerala as evinced by the following portion occurring therein :

"श्रीराजराजरविवर्ममहीश्वराभ्यां
राजन्वती वसुमती सकलापि याभ्याम् ।

संशासतोरिह सतोस्तु नयोर्धरित्रीं
कृष्णानुभूतिभिरयं रचितो निबन्धः ॥

इति श्रीमदानन्दानुभूतिपूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमत्कृष्णानुभूतेः विबुधेन्द्रतीर्थापरनामधेयस्य कृतौ श्रीमच्छारीरकमीमांसाशास्त्रसङ्ग्रहे चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः । "

---

## ॥ शिवगीता (तात्पर्यप्रकाशिकोपेता) ॥

### No. 381. ŚIVAGĪTĀ

with the commentary, Tātparyaprakāśika.

C. O. L. No. 1709.

Substance—Palm leaf. Size—20″ × 1¾″. Leaves—91. 8—10 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—5450. Incomplete.

Owner—Pāṇḍikkaḍavattu Svamiarmaṭhom, Tirunakkara.

Subject etc.—Same as No. 480, DCSMMPL.

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमत्परमशिवेन्द्रसरस्वतीविरचितायां शिवगीतातात्पर्यप्रकाशिकायाम् एकादशोऽध्यायः ।

Author—Paramaśivendrasarasvatī.

Remarks—The colophon shows that the author's preceptor was Abhinavanārāyaṇendrasarasvatī. He has been referred to on page 325, CC. Other works of his are Vedasārasahasranāmavyākhya and Śivasahasranāmabhāṣyam wherein the greatness of Śiva is extolled. The work lends support to the philosophic doctrines. It is in the form of a dialogue between Rāma and Sītā. Again it attempts at the description of philosophic truths and establishment of Śivādvaita, rufuting the other systems in the preface. It has been catalogued in CSMAL. (Vide page 175, Part II).

---

॥ शिवगीताव्याख्या (तात्पर्यप्रकाशिका) ॥

No. 382. ŚIVAGĪTĀVYĀKHYĀ.

(Tātparyaprakāśikā.)

C. O. L. No 318.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—303. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3788. Incomplete.

Owner—C. O.

Subject etc.—Same as No. 480, DCSMMPL.

Remarks—The Ms. extends from the 9th chapter to 16th.

---

## ॥ श्रुतप्रकाशिकासंग्रहः ॥

## No. 383. ŚRUTAPRAKĀŚIKĀSAṄGRAHA.

C. O. L. No. 573.

Substance—Paper. Size—13″ × 9″. Pages—394. 24 lines per page and 20 letters per line. Script—Devanāgari. No. of Granthas—6000.

Owner—C. O.

Subject—Explanation of Brahma from Rāmānujacarya's point of view.

Beginning:

श्रुतप्रकाशिकासंग्रहः । हरिः ओम् ।

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥

बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसङ्कल्पं वस्तु लक्ष्मीधरं विदुः ॥

सम्यङ् न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद् यः सञ्जीवयति मामपि ॥

प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते ॥

* * * * * *

सर्वेषां पुरुषाणां प्रमाणाधीनप्रमेयनिश्चयानाम् उपादित्सितजिहासितेष्टानिष्टतत्साधनानामलौकिकपुरुषार्थे तत्साधकरूपे च वस्तुनि शब्दैकसमधिगम्ये तत्राप्यपुरुषशेमुषीदोषमपीमालिन्यस्य वेदाख्याक्षरराशेरेव प्रधानतः प्रमाणतयाश्रयणीयत्वे सिद्धे तत्र च पशुपुत्रवृष्टयन्नस्वर्गाद्यैहिकामुष्मिकार्वाचीनफलतत्साधनपरे ऽवगते पूर्वभागे परमपुरुषार्थतत्साधनाववोधके च तदुपरिभागे पूर्वाचार्याभिमतमुक्तिघण्टापथकण्टकायमानविपयकुदृष्टिजनदुर्वन्धनव्रातोपप्लुते

End :

उक्तार्थवोधकत्वेन ये प्रमाणतर्काः परैः प्रयुक्ताः, तेषां सर्वेषां परिहारोऽस्त्येव । एतदनन्तर्भूतार्थो नास्ति । तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसन्धेय इत्यभिप्रायेणेति सर्वं समञ्जसमित्युक्तम् ।

Colophon :

इति श्रीशैलपूर्णकुलतिलकावतारतातदेशिकसूनुना श्रीनिवाससूरिणा सङ्गृहीते श्रुतप्रकाशिकासङ्ग्रहे चतुर्थाध्यायस्य चतुर्थः पादः ।

तिरु – तातदेशिकताताचार्येण लिखितोऽयं ग्रन्थः । समाप्तश्चायं कोशः । सुन्दरवरदा(चा)र्येण यथामातृकं परिशोधितम् ।

सुन्दरवरदाचार्यः ।

५ - १ - २२

Author—Śrīnivāsasūri.

Remarks—The author was a follower of Rāmānujācārya's religious views. His father belonged to Kāñcīpura and he was a contem-

porary of Śaṭhakoparāmānuja. He was the son of Tātādeśika of Śrīśailapūrṇa family. This work is noticed under No. 1600, TCM, Vol. II, Part I C.

---

## ॥ श्रुतितात्पर्यनिर्णयः ॥

### No. 384. ŚRUTITĀTPARYANIRṆAYA.

C. O. L. No. 168.

Substance—Paper. Size—$13\frac{1}{2}'' \times 3\frac{1}{2}''$. Pages—76. 16 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—760. Incomplete.

Owner—C. O.

Subject—Investigation upon the Vedic purport from six-fold stand-points.

Beginning:

श्रीः ।

श्रीदेशिकशममलं नत्वा शिष्यमुदावहम् ।
तात्पर्यनिर्णयं वक्ष्ये श्रुतेः षड्विधलिङ्गतः ॥
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

उपक्रमो नाम "सदेव सोम्येदमग्र आसीत्" 'एकमेवाद्वितीय-मि'ति छान्दोग्यषष्ठद्वितीयखण्डादावुक्तः । उपसंहारश्च तत्रैव खण्डान्ते "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा श्वेतकेतो" इत्युक्तः ।

End :

"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत" इत्यादि-स्मृतिसहस्रेभ्यश्च । न्यायश्च । यस्त्वभिमानिदेहादौ ब्राह्मणत्वादिविशिष्टोऽहमिति सन्दृश्यते न तु तद्रहितः परिच्छिन्नत्वाद्यभिमानिनः एवं कर्मण्यनधिकारः, न तु तद्विपरीतस्य । नहि निरवयवस्याकाशस्य कस्मिंश्चित् कर्मण्यधिकारो दृश्यते ॥

Colophon :

Author :

Remarks—The Vedic purport is discussed here from six view-points such as *Upakarma, Upasamhāra, Adhyāsa* etc. The colophon is missing since the Ms. is incomplete. The author's identity is not discernible. (See page 676, CC.)

---

## ॥ श्रुतिसारसमुद्धरणटीका ॥

No. 385. ŚRUTISĀRASAMUDDHARAṆAṬĪKĀ.

C. O. L. No. 183.

Substance—Paper. Size—13½" × 8½". Pages—92. 20 lines per page and 17 letters per line. Script—Devanāgari. No. of Granthas — 950.

Owner—C. O.

Subject—Explication of the Śrutisārasamuddharaṇa.

Beginning:

श्रीः ।

श्रुतिसारसमुद्धरणटीका ।

श्रुतिसारसमुद्धरणाख्यस्य प्रकरणस्य सम्बन्धोक्तिं चिकीर्षुराचार्यः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाय शिष्टाचारपरिपालननिमित्तादृष्टप्रयोजनाय चाशीर्वादलक्षणमङ्गलाचरणं करोति विलसदिति श्लोकेन । विलसदिति पदस्यायमर्थः यस्य—परमात्मनः स्वयंज्योतिषा भासाखिलं जगत् स्फुरति स विलसत् चितिचलतः स्फुरदखिल... । एतदुक्तं भवति—अन्वयव्यतिरेकाभावपरिहारेणाखिलं जगत् स्वस्मिन्नध्यस्ततया स्फुरतीत्यर्थः ।

End:

अत्र यस्य विष्णोरनिद्रया जाग्रदाद्यवस्थात्रयशरीरसूक्ष्मशरीराविद्याशरीरोपाधित्रयमकारोकारमकाराख्यं वाचकत्रयं विश्वतैजसप्राज्ञवाच्यत्रयं येन परमात्मना भिन्नं तज्ज्ञानैकविग्रहमुक्तमद्वयप्रमेयं विष्णुमहं प्रणतोऽस्मि । अथवा यस्य त्रयं त्रयमथ त्रयमित्यनेन लोकत्रयं च वेदत्रयं च व्याहृतित्र(यो?यं चो)च्यन्ते । वाच्यत्रयेणापि लोकादय एवोच्यन्ते इति ।

तत्त्वंपदाभ्यां लक्ष्याय तद्रूपैक्याय विष्णवे ।
नमोऽभ्यस्य तुरीयाय पूर्णसच्चित्सुखात्मने ॥

Colophon:

Author:

Remarks—Iṣṭasiddhikāra, Draviḍācārya, and Gauḍapādācārya are referred to herein.

## ॥ षट्त्रिंशदद्वैततत्त्वमालिका ॥

### No. 386. ṢAṬTRIṂŚADADVAITA-TATTVAMĀLIKĀ.

C. O. L. No. 810.

Substance—Paper. Size—11″ × $8\frac{1}{2}$″. Pages—18. 20 lines per page and 28 letters per line. Script—Devanāgarī. No. of Granthas—315.

Owner—C. O.

Subject—A compendium of Advaita Vedānta.

Beginning :

अथ षट्त्रिंशदद्वैततत्त्वमालिका ।

यल्लीनशक्तिकं ब्रह्म शुद्धब्रह्म तदुच्यते ।
तदेव चेत् क्षुब्धशक्ति परब्रह्म तदा भवेत् ।
गुणत्रयं निर्विकारं तस्यान्तस्य सकाशतः ।
शुद्धशान्तरजश्शुद्धतमोगुण इति त्रिधा ।
शान्त आनन्दशक्तिः स्याद् रजश्चिद्रूपरामिका (?) ।
तमः सद्रूपशक्तिः स्यात् तेषामेवान्यनाम च ।
सर्वानन्दसुषुप्ते तु परब्रह्म यदा भवेत् ।
साकमानन्दशक्त्या तत् परमानन्द उच्यते ॥

End :

अष्टाविंशतितत्त्वविषयाण्यपि नाहं भुञ्जामीत्येवंप्रकारकदृढतरनिश्चयवानेवाष्टाविंशतितत्त्वकृतपुण्यपापेभ्यो विमुक्त एव सन् निष्कर्मी भूत्वा जननमरणादिसंसारमपि त्यक्त्वैव मुक्तो भूत्वा च ब्रह्मैव भवति । स एव जीवन्मुक्तः अतीतप्रज्ञः अतीतवर्णाश्रमी गुणातीतः भगवद्भक्तः । एवमेव भगवद्गीतादिषु स्पष्टं भवति । ओम् तत्सत् ब्रह्मार्पणम् ।

Colophon :

षट्त्रिंशत्तत्त्वमुक्ताभिर्गुम्फिताद्वैतमालिका ।
गद्यपद्यमयीमेतां पश्यतः शृण्वतोऽन्वहम् ॥
अनन्तेनैव वक्तव्यं फलं तस्य यथामति ।
ब्रवीम्युत्तरपद्येन श्रुत्वा तन्मोदतां बुधः ॥
वेदान्तागमसागरोन्मथनजैरद्वैततत्त्वात्मकै-
    र्मालामुत्तममौक्तिकैर्विरचितामीशस्य कण्ठेऽर्पिताम् ।
ये पश्यन्ति भवाब्धिमग्नकलुषाः शृण्वन्ति ये चान्वहं
    ते सर्वे च विमुक्तबन्धहृदया मुक्ता भवेयुर्ध्रुवम् ॥
कल्याणाचलकोदण्डः कल्याणाचलमन्दिरः ।
कल्याणवेषधारीशः कल्याणं कुरुतान्मम ॥
पालपायसं मे घृतपायसं च कोरिद्वयं प्रत्यहमत्तुमाज्ञाम् ।
वार्धक्यहेतोरहमप्ययाचे राजाधिराजः कृपया करोतु ॥
षट्त्रिंशत्तत्त्वमालादिनारायणमता कृता ।
तां तुष्यन्तु बुधा दृष्ट्वा बालभाषामिवोदिताम् ॥
इति षट्त्रिंशदद्वैततत्त्वमालिका समाप्ता ।

Author—Ādinārāyaṇa.

Remarks—The author seems to have flourished recently as evinced by the colophon.

---

## ॥ संक्षेपशारीरकव्याख्या (तत्त्वबोधिनी) ॥

No. 387. SAMKṢEPAŚĀRĪRAKAVYĀKHYĀ. (Tattvabodhinī).

C. O. L. No. 1968.

Substance—Palm leaf. Size—18″ × 2″. Leaves—

236. 13 lines per page and 84 letters per line. Script—Malayāḷam. No. of Granthas—1600. Incomplete.

Owner—Parameśvaranpotti, Caṁmarapaḷḷimaṭhom.

Subject—Beginning : Same as No. 573, DCSMMPL.

End :

प्रत्यक्त्वमात्रेति । प्रत्यक्त्वमात्मस्वरूपम् । शेष उक्तार्थः । अयं भावः — यत्र हि नित्यवत्प्रकाशप्रसक्तिस्तद्विपर्ययश्च दृश्यते, तत्रैव तदुपपादनायावरणं कल्पनीयम् । न च घटादेः स्वतः प्रकाशप्रसक्तिरस्ति । अतः स्वत एवावृतस्वरूपतया तत्रावरणकल्पने साधनं न्यायातिपातः स्यात् । ननु घटादेः स्वतो जडत्वेऽपि स्वप्रकाशसाक्षिण्यध्यस्ततया नित्यवत्प्रकाशप्रसक्तिरित्यावरणप्रयोजनमस्तीति चेन्न । अधिष्ठानावरणेनैवास्याप्यावरणोपपत्तेः । अत एव घटं न जानामीत्यनुभवोऽपि सङ्गच्छते । तस्मादात्मन एव स्वप्रकाशरूपस्य स्वरूपविपरीतव्यवहारविषयतयानुभवानुरोधेन चा...... ।

Colophon:

संक्षेपपूर्वकस्येयं व्याख्या शारीरकस्य तु ।
नृसिंहयतिवर्येण रचिता तत्त्वबोधिनी ॥

शुभम् ।

ओम् । जीवो ब्रह्म विशुद्धा चित् तस्यां भेदस्तयोर्द्वयोः
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।
नान्यत्र कारणात्कार्यं न च तत्र क्व तद् भवेत् ।

सर्वव्याख्याविकल्पानां द्वयमेव प्रयोजकम् ।
पूर्वत्रापरितोषो वा विषयव्याप्तिरेव वा ॥
संक्षेपपूर्वकस्येयं व्याख्या शारीरकस्य तु ।
लिखिता वासुदेवेन प्रथमाध्यायगोचरा ॥
समस्तसम्पत्समवाप्तिहेतवः
समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः
पुनन्तु मां ब्राह्मणपादपांसवः ॥
अस्ति चेल्लिखितेऽस्माभिर्यत्किञ्चिदसमञ्जसम् ।
अनुग्रहेण साधूनां सर्वं भवतु मङ्गलम् ॥
हरिगीतपुराधिवासलोलं
गिरिजाकान्तमुखारविन्दसूर्यम् ।
अखिलार्तिविनाशनाय नित्यं
कलये तारकमारकं कुमारम् ॥

Author—Same as No. 573, DCSMMPL.

Remarks—This Ms. contains a portion of the 2nd chapter. Some leaves after that chapter are very much damaged. The work is identical with No. 475, DCSM. Vol. IX. Some verses omitted in the introductory portion herein are seen under No. 573, DCSMMPL.

---

## ॥ संक्षेपशारीरकव्याख्या (तत्त्वबोधिनी) ॥

No. 388. SAMKṢEPAŚĀRĪRAKAVYĀKHYĀ.

(Tattvabodhinī.)

C. O. L. No. 315.

Substance—Paper. Size—11″ × 8½″. Pages—504.

20 lines per page and 25—28 letters per line. Script—Devanāgarī. No. of Granthas—11000. Incomplete.

Owner—C. O.

Subject etc.—Same as No. 573, DCSMMPL.

## ॥ संक्षेपशारीरकव्याख्या (सिद्धान्तदीपः) ॥

No. 389. SAMKṢEPAŚĀRĪRAKAVYĀKHYĀ.
(Siddhāntadīpa.)

C. O. L. No. 927.

Substance—Palm leaf. Size—12″ × 2″. Leaves—121. 12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas — 600. Complete.

Owner—Śūran Kaṇḍan Nampūri, Udyamperūr.

Subject etc.—Same as No. 654, DCSMMPL.

Author—Viśvaveda, disciple of Ānandadeva. Another work of his is Sarvanyāyatilaka.

Remarks—The author attempts to explain each verse in the text lucidly with an exordium. No order has been observed in the arrangement of leaves This work is identical with No. 1558 b, TCM Vol. II, Part I C. but the invocatory verses in this Ms. are missing therein. The following lines occur after the colophon :

"बोधानन्दमुनीन्द्रस्य बौधायनमुनेरिव ।
श्रीमान् जयति सन्दर्भः श्रीरामं प्रति संप्रति ॥
रामेण लिखितमिदम् ॥

## ॥ संक्षेपशारीरकसम्बन्धोक्तिः ॥

## No. 390. SAMKṢEPAŚĀRĪRAKA-SAMBANDHOKTI.

C. O. L. No. 1785.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—226. 8—9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—8136. Complete.

Subject—Same as No. 654, DCSMMPL.

Beginning:

..........श्रीवेदव्यासाय नमः । श्रीगुरुभ्यो नमः ।
यदिच्छातो विश्वं विकलमपि कर्मेष्टफलदं
विना स्याद्यस्येच्छां सकलमपि धातुश्च विफलम् ।
स विश्वेशः शम्भोः पितुरखिलसंभावितपदे
प्रविष्टोऽभीष्टं वो दिशतु युवराजो गणपतिः ॥
नृसिंहाय जगज्जन्मस्थितिभङ्गपटीयसे ।
सत्यानन्तपरानन्दबोधैकवपुषे नमः ॥
विष्णुं नत्वात्ममायाविरचितविविधद्वैतमद्वैतबोधं
जातश्च व्यासनाम्ना जगदुपकृतये भाष्यकारात्मना च ।
नत्वा भूयश्च तं मुनीन्द्रं हरिमिव कमला यं प्रपेदे स्वयोग्यं
सर्वज्ञात्मेति वाणी परमवनितलेऽन्विष्य सर्वज्ञमुच्चैः ॥

यं ब्रह्मानुभवं प्राप्य समुद्रमिव सिन्धवः ।
ययुस्तद्रूपतामन्ये मुनयः प्रणमामि तम् ॥
यं सर्गे कर्त्तारं यत इत्याद्या जगाद्युगेकर्तारम् ।
यं तं वेदाध्यक्षं साक्षाज्जगतस्तमेमि वेदाध्यक्षम् ॥

या माया परमात्मनो मुररिपोः पद्मेति संगीयते
गौरी चन्द्रशिखामणेर्भगवतः पद्मोद्भवस्यापि वाक् ।
तां वन्दे लिपिदेवतां निजपदन्यासैर्जगन्मातरं
नृत्यन्तीं बुधचित्तनृत्तभुवि श्रीभाविमत्रयीमातरम् ॥

सत्यानन्दामृतास्वादे नित्यबोधपयोनिधौ ।
स्नानादुपनिषन्मन्त्रैर्वीतमोहमलो मुनिः ॥
तत्पयोमृतमास्वाद्य परानास्वादयन्निव ।
संक्षेपतो यदकरोत् स शास्त्रार्थतत्त्ववित् ॥
शारीरकप्रकरणं विद्वज्जनमनोहरम् ।
तस्य वक्ष्ये प्रतिश्लोकं गुरुदीरितसङ्गतिम् ॥

अथातो ब्रह्मजिज्ञासेति शारीरकशास्त्रमारब्धम् । तस्य प्रकरणं चिकीर्षुस्तत्प्रतिपाद्यं वस्तु श्लोकत्रयेणादौ तस्य विषयसम्बन्धप्रयोजनवत्त्वसिद्धये संक्षेपतो नि(र्दि)शति । तत्राद्येन तावदिष्टदेवतानुस्मरणव्याजेन वाक्यार्थप्रति... ...

अनृतजडविरोधिरूपमनन्तत्रयमलबन्धनदुःखतानिरुद्धम् ।
अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमि ॥

End:

गुरोः प्रभावतो ममायं प्रभाव इति तदनुस्मरणपूर्वकमात्मनो नाम निर्दिश्य ग्रन्थकरणकालोपलक्षणार्थं तत्कालीनस्य राज्ञो नाम निर्दिशन्नाह---

श्रीदेवेश्वरपादपङ्कजरजःसम्पर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरः संक्षेपशारीरकम् ।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥

आदिमध्यान्तमङ्गलानि शास्त्राणि प्रचयं गच्छन्तीति मनसि निधायान्तेऽपीष्टदेवतां प्रणमति—

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ।
सुरासुरात्मसङ्घयोः सुखेतरप्रदं हरे-
र्वपुर्नृसिंहमद्भुतं नमामि सर्वसाक्षिणम् ॥

Colophon :

इति श्रीमद्वेदाध्यक्षपूज्यपादशिष्येण वेदानन्देन विरचितायां संक्षेपशारीरकसम्बन्धोक्त्यां चतुर्थोऽध्यायः समाप्तः ।

कृष्णो वेदविदां पटुः पटुधियां माणिक्कदेवी च यं
मातुलया सुषुवे सुतं स्वकमितुः शुश्रूषणे तत्परा ।
सर्वज्ञात्ममुनेः कृतेर्गुरुधियो माधुर्यपद्यावलेः
सम्बन्धोक्तिरलेखि तेन वसता क्षेत्रे हरेः शम्बरे ॥

परमहंसपरिव्राड्व्रातप्रणतचरणकमलयुगळनिगळितजलप्रपूतसदाचारयुक्तगृहमेधिगृहाङ्गणसस्पृहश्रीमद्ब्रह्मामृतयतीन्द्रः सकललोकानुग्रहोन्मुखः करुणार्द्रहृदयः सकलशास्त्राम्बुधिपारङ्गतो विजितदुस्तार्किकनिकरः स्थिरमतिर्वेदान्तशास्त्रे यं प्रति कृपां कुरुते, स वासुदेवः संक्षेपशारीरकसम्बन्धोक्तिमखिलामलिखत् ।

Author—Vedānanda, disciple of Śrīmat Vedādhyakṣapūjyapāda.

Remarks—The work is noticed under No. 2919, TCM Vol. IV, Part I A. The verses occurring after the colophon disclose that the scribe copied it while residing in the temple at Śambara (Cemmara in Malabar).

---

## ॥ संक्षेपशारीरकसम्बन्धोक्तिः ॥

## No. 391. SAMKṢEPAŚĀRĪRAKA-SAMBANDHOKTI.

C. O. L. No. 708.

Substance—Paper. Size—11″ × 8¾″. Pages—124. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1860. Incomplete.

Owner—C. O.

Subject—Beginning: Same as No. 390.

End:

“नयनिपुणधीर्बालश्चेष्टां समीक्ष्य समीहितुः
कृततदुचितव्याप्तिज्ञानः पुरैव निजात्मनि ।
परमतगतं श्रेयोहेतुं प्रतीत्युदयोत्थितं
त्वरितविषयो रागं तस्य प्रवर्तकमिच्छति” ॥

इति श्रेयोहेतुप्रतीत्युदयोत्थितं रागं स्वप्रवृत्तिहेतुतया स्वसाक्षिकमाकलयन् प्रवृत्तिलिङ्गेन तादृशमेव रागमन्यत्रापि... ...

... .... ... ... ...

Colophon :

Author—Same as No. 390.

Remarks—Same as No. 359 B.

---

## ॥ सरस्वतीरहस्योपनिषत् ॥

No. 392. SARASVATĪRAHASYOPANIṢAT.

C. O. L. No. 355.

Substance—Paper. Size—13½" × 8½". Pages—9. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—100. Complete.

Owner—C. O.

Subject—Attainment of salvation by propitiating Sarasvatī.

Beginning :

श्रीगणपतये नमः ।

ओं सहनाववतु शान्तिः । ऋषयो हवै भगवन्तमाश्वलायनं सम्पूज्य पप्रच्छुः ।

केनोपायेन तज्ज्ञानं तत्पदार्थावभासकम् ।
यदुपासनया तत्त्वं जानासि भगवन् वद ॥
सरस्वतीं दशश्लोक्या सऋचा बीजमिश्रया ।
श्रुत्वा जप्त्वा परां सिद्धिमलभन् मुनिपुङ्गवाः ॥

ऋषय ऊचुः—

End :

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

मया जीवत्वमीशत्वं कल्पितं वस्तुतो नहि ।
इति यस्तु विजानाति स मुक्तो नात्र संशयः ॥

Colophon :

इति सरस्वतीरहस्योपनिषत् समाप्ता ।

Author :

Remarks—The work is noticed in p. 699, in CC. Vol. I.

---

## ॥ सर्वदर्शनकौमुदी ॥

No. 393 A. SARVADARŚANAKAUMUDĪ.

C. O. L. No. 1866 A.

Substance—Palm leaf. Size—12″ x 2″. Leaves—132. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4700.

Subject—The theories relating to different schools of philosophy.

Author—Mādhavakarmandī.

Remarks—The work is published as No. 135 in TSS.

---

## ॥ वेदान्तसारसर्वस्वम् ॥

No. 393 B. VEDĀNTASĀRASARVASVAM.

C. O. L. No. 1866 B.

Substance—Palm leaf. Size—12″ x 2″. Leaves—4.

10 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas — 100.

Owner—Same as No. 393 A.

Subject—A critical note on the Advaita philosophy.

Beginning :

वेदान्तविज्ञानसुनिश्चितार्थै-
योगीश्वरैर्ध्येयमजं विशुद्धम् ।
उमानुमाभ्यामधिगम्यमानं
वन्दे महेशं मदनुग्रहाशम् ॥

पदवाक्यप्रमाणज्ञो माधवाख्यसरस्वती ।
वेदान्तसारसर्वस्वं कुरुते बुद्धिशुद्धये ॥

वेदा ऋगादयो ज्ञेयास्तदन्तस्तच्छिरो मतम् ।
तस्य सारो महावाक्यं तत्त्वमस्यादिरूपकम् ॥

End :

एवं वेदान्तसिद्धान्तसंग्रहो लेशतः कृतः ।
गुरुशास्त्रोक्तमार्गेण वर्ततां सत्सु सर्वदा ॥

Colophon :

Author—Mādhavasarasvatī.

Remarks—The following portion occurs after the end :

चण्डिकाख्यनदीतीरे विद्येन्द्रवननामकः ।
यतिवर्यस्तपोमूर्तिर्विद्वदग्रेसरः स्थितः ॥

तच्छिष्यः करुणारसार्द्रहृदयो विद्यानिधिः सन्ततं
व्याकर्ता निखिलस्य शास्त्रनिवहस्यैको गुरुश्चाभवत् ।
नाम्ना माधवशारदेति विदितो वादी(न्द्रेभ)पञ्चाननो
भक्तानामवलोकनेन दुरितं येनैव संक्षीयते ॥

सोऽयं शास्त्रनिबन्धकृद् यतिवरो ब्रह्मानुसन्धानतो
नीत्वा हायनमाश्रमे चिरमुमानाथप्रिये कापिले ।
सोदार्यां पुरि संनिकृष्टममलं निश्चित्य देहावधिं
पम्पाक्षेत्रमगात् तदत्र स गुरुः पुण्यं सुमुक्तिप्रदम् ॥

सौम्याब्दे प्रयतोत्तरायणयुते मासे च चैत्रोदिते
पक्षे बाहुलके तिथौ दिनकरे मध्ये चतुर्थ्यामसौ ।
सत्यज्ञानसुखात्मको यतिवरो मुक्तो वसिष्ठाश्रमे
तं पम्पाधिपतिं स्मरन् हृदि शुचौ श्रीतुङ्गभद्रातटे ॥

तं वन्द्यं गुरुमद्वयं सदमलानन्दं जगद्व्यापिनं
भक्तानामनुचिन्तितार्थकरणे चिन्तामणिं देहिनाम् ।
नित्यं निष्कलमेकमेव मनसा वाचा शरीरेण च
श्रीमन्माधवशारदाख्ययतिमेवाहं भजे सन्ततम् ॥

आसीन्माधवभारतीति विदितः संन्यासिवर्यः पुरा
तेनेयं किल सर्वदर्शनपदोपेता कृता कौमुदी ।
आनीता च महाबलेश्वरयतिश्रेष्ठैरिमां केरलान्
.....तां मिलिता वयं लिखितवन्तोऽमी यथापौरुषम् ॥

शुभमस्तु । श्रीमद्गुरुपादेभ्यो नमः ।

......ചലാത്തകണ്ടു കൈയ്യെഴുത്തു്

---

## ॥ सर्वमतसंग्रहः ॥

## No. 394. SARVAMATASAṄGRAHA.

C. O. L. No. 2310.

Substance—Palm leaf. Size—7½" × 1½". Leaves—69. 7—8 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—650.

Owner—Puṇartam Tirunāl Elaya Tampurān. Pūñjār.

Subject—The principles of Vedāntic philosophy.

Beginning :

हरिः । एवं ज्ञानविज्ञाने निरूप्य वैराग्यं निरूपयति श्रुति- गिति द्वाभ्याम् ।

इह सम्यगनुभवः प्रमाणम् । सम्यग्ग्रहणं संशयविपर्यया- पोहार्थम् । तत्रानवधारणज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वायमित्यादि । मिथ्याध्यवसायो विपर्ययः । यथा द्वौ चन्द्रमा- वित्यादि । स्मृतिव्यवच्छेदार्थमनुभवग्रहणम् ।

End :

अयथार्थानुभवं विभजते- -अयथार्थेति । स्वप्नस्य मानसविपर्यय- रूपत्वान्न त्रैविध्यविरोधः । संशयस्य लक्षणमाह---एकेति । घटपटा- विति । समूहालम्बनेऽतिव्याप्तिवारणाय एकेति । घटो द्रव्यमित्या- दावतिव्याप्तिवा... ... .... ।

Colophon :

Author :

||

Remarks—This has been published as No. 62 in TSS. The two introductory lines additionally seen in this Ms. bear out that the text is borrowed from a ponderous treatise on Advaita Vedānta. A large number of leaves are missing at the beginning and end.

---

## ॥ सर्वसिद्धान्तसंग्रहः ॥

No. 395. SARVASIDDHĀNTASAṄGRAHA.

C. O. L. No. 2130.

Substance—Palm leaf. Size—$8\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—34. Script—Malayāḷam. No. of Granthas — 602. Incomplete.

Owner — Puruṣottaman Śaṅkaran Nambūripād, Kuttalakkada Manakkal, Kunnattunād.

Subject etc.—Same as No. 645. DCSMMPL.

Author—Śrī Śaṅkarācārya.

Remarks—This work is printed in V. V. Press, Śrīraṅgam. The last two leaves contain some verses from the 148th chapter on Mokṣadharma in the Mahābhārata relating to the reality of Vedic and Non-Vedic principles. This is identical with No. 4760, DCSM. Vol. IX.

## ॥ सर्वार्थसिद्धिव्याख्या (आनन्ददायिनी) ॥

## No. 396. SARVĀRTHASIDDHIVYĀKHYĀ.

(Ānandadāyinī.)

C. O. L. No. 433.

Substance—Paper. Size—13½" × 8½". Pages—1000. 20 lines per page and 20—24 letters per line. Script—Devanāgarī. No. of Granthas—13750.

Owner—C. O.

Subject—An elaborate commentary on the Sarvārthasiddhi of Vedāntācārya.

Beginning :

श्रीः ।

प्रथमसरः ।

श्रीमान् वेदान्तवेद्यः शुभगुणनिलयो निस्ममः सर्वदोष-
प्रत्यर्थीभूतमूर्तिश्चिदचित(?)महिमानन्दसत्यस्वरूपः ।
सृष्टिस्थित्यन्तलीलः सकलचिदचितां मोक्षदः सर्वविद्या-
वेद्यो वागीशमूर्तिर्वृषभगिरिपतिर्जायतां श्रेयसे नः ॥

जरीजृम्भन् स्तम्भादुदयगिरिशृङ्गादिव रवि-
र्विभिन्दन् रक्षोघं तिमिरपटलं स्वैः कररुहैः ।
वितन्वन्नानन्दं मृगपतिनराकारघटितः
स नः श्रेयो देयादमृतफलवल्लीसहचरः ॥

आराधनार्थं वृषशैलभर्तु-
र्घण्टा हरेः पद्मभुवा प्रयुक्ता ।

यद्रूपमास्थाय जनानरक्षत्
तमेव वेदान्तगुरुं नमामि ॥

प्रतिमतकथकधुरन्धरविद्याहङ्कारतूलवातूलः ।
सकलजनवन्दनीयो भवतु मुदे मे महागुरुर्नित्यम् ॥
कुशिककुलजलधिचन्द्रो निगमान्तगुरुः श्रीनिवासो नः ।
जयति यतिराजदर्शितसिद्धान्ताम्भोजतोपकरभानुः ॥
आत्रेयवंशदुग्धाब्धिप्रालेयांशुं कलानिधिम् ।
अप्पलाचार्यवर्यं तं भजे विद्यागुरुं मम ॥

श्रीवत्सवंशाम्बुधिमध्यदेशाद्
बभूव चन्द्रो नरसिंहनामा ।
तस्यात्मजः साधुजनैकसेवी
स सिंहदेवः प्रथितो धरायाम् ॥

तोनारम्बातनयः पौत्रः श्रीदेवराजगुरोः ।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासगुरोः ॥
अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम् ।
सर्वार्थसिद्धिसट्टीकां करोत्यानन्ददायिनीम् ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्यापरनामा वेङ्कटनाथाचार्यः स्वहितपुरुषार्थज्ञानशून्यान् जनानवलोक्य सञ्जातकारुण्यः तदनुजिघृक्षया प्राचीनप्रबन्धेषु संक्षिप्तान् विप्रकीर्णांश्चाकलय्य तत्त्वमुक्ताकलापाख्यपद्यरूपप्रबन्धेन निरूप्य तस्यागाधतया दुरधिगमतामवलोक्य व्याचिख्यासुरविघ्नपरिसमाप्तिप्रचयगमनादिप्रयोजकं शिष्टाचारपरिप्राप्तमिष्टगुरुप्रकाशनरूपं मङ्गलमाचरय्य शिष्यशिक्षार्थं पद्येन निबध्नाति—जयतीति ।

End :

ननु मानतः सिद्ध एवार्थो ज्यायान्। प्रत्यक्षावगतस्यापि गगननीलिम्नो ज्वालैक्यस्यागमस्यापि अनुमानविरुद्धस्य उत्तानादिवाक्यस्य प्रमापकत्वाभावात् तादृशार्थबहुलस्य प्रत्यक्षश्रुतिविरुद्धस्य दुर्बलत्वमेवेति प्रागेवोक्तमिति भावः। लौकिकजयादिपुरुषार्थनिष्ठानामपि अयमुपादेय इत्याह — इत्थमित्यादिना। "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि (शास्त्राणि) प्रथन्ते वीरपुरुषाणि भवन्ति। आयुष्मत्पुरुषाणि चे"ति न्यायेन प्रबन्धान्ते प्रथमं गुरुं प्रकाशनात्मकमङ्गलं निबध्नाति इत्याह सर्वमङ्गलसिद्ध्यर्थं इति।

इत्थं वेङ्कटदेशिकस्य निगमान्ताचार्यचूडामणे-
र्वाणीं वासवलोकसिन्धुलहरीसन्दोहसन्देहदाम्।
दुर्वादिव्रजदर्पणकसरणिं सर्वार्थसिद्धिं सुधी-
र्व्याचख्यावनुकम्पितो नरहरिर्व्यक्तं महादेशिकैः॥

Colophon :

इति श्रीवात्स्यनृसिंहगुरुसुतेन महादेशिककटाक्षितेन नृसिंहदेवेन विरचितायां सर्वार्थसिद्धिव्याख्यायाम् अद्रव्यसरः पञ्चमः। श्रीसर्वार्थसिद्धिव्याख्या नरसिंहराजीया सम्पूर्णा।

श्रीमते निगमान्तमहादेशिकाय नमः। श्रीमते रामानुजाय नमः।

Author—Nṛsiṃhadeva.

Remarks—The whole book falls into five *saras*. The first *sara* discusses the uses of the objects of senses raising and refuting objections from

a logical point of view. The second is a regular refutation of contrary views preparatory to the establishment of Viśiṣṭādvaita. Hence it is entitled *Jīvasara*. The third is a confirmation of the Omnipotence. The next is appropriately called ***Buddhisara*** since it treats of the intellect and the last is known as *Adravyasara* after its theme. Its style is elegant. (For further information see page 703 CC. Vol. I.)

---

## ॥ सारसंग्रहः (सुरेश्वरवार्त्तिकसारव्याख्या) ॥

No. 397. SĀRASAṄGRAHA.
(Commentary on Sureśvaravārtikasāra.)

C. O. L. No. 123.

Substance—Paper. Size—13″ × 9″. Pages — 642. 18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—6000. Incomplete.

Owner—C. O.

Subject—Same as No. 354 C.

Beginning:

॥ श्रीः ॥

यतो जगत उद्भूतिसम्भूतिपरिभूतयः ।
तं वन्दे राममात्मानं चिदानन्दमयं घनम् ॥

येनोद्धृतो वार्त्तिकाब्धेः सारो विबुधतुष्टिदः ।
अविद्यातज्जतापघ्नं विद्यारण्यं हरिं भजे ॥
पूर्वाचार्यान् लोकवन्द्यान् नत्वा नन्दगरीयतः (?) ।
व्याख्या वार्त्तिकसारस्य लघु सङ्गृह्य लिख्यते ॥
मणयो मणितत्त्वज्ञैः सञ्चितास्तत्र केचन ।
बालिशेन समानीताः किं न ग्राह्यास्तदर्थिभिः ॥

इह खलु लोकानुग्रहकसारतया सम्यग्ज्ञानप्रवर्तनप्रयोजनकृतशरीरपरिग्रहा विद्यारण्यश्रीचरणाः श्रीमत्सुरेश्वरवार्त्तिके सारं सञ्जिघृक्षवः तत्राधिकारिविषयप्रयोजनानि निर्दिशन्ति—श्रीमदिति ।

End :

फलितमाह—विषयमिति । ब्रह्मानन्दस्यावेद्यत्वे हेत्वन्तरमाह—तादृगिति । प्रमात्रा......प्रतीचः सुखात्मत्वमिद्धिरित्यर्थः । विदुषा अहं धन्योऽस्मीति सुखस्यानुभूयमानत्वात् । ... .... ... ... ...पत्वं तच्छब्दार्थः । एवं ब्रह्मानन्दस्यावेद्यत्वं प्रसाध्य तारतम्येन श्रूयमाण... ... ...आरभ्येति । आत्मनो निरतिशयानन्दचिदेकतानत्वमुक्तमुपसंहरन् शिष्यविश्रामाय स्वा

Colophon :

इति वार्त्तिकसारव्याख्याने सारसङ्ग्रहे पञ्चमाध्यायस्य नवमं ब्राह्मणम् । ... ... ... ... ...

Author :

Remarks—This work extends up to the 9th Brāhmaṇa in the 5th chapter. The work is attri-

buted to Suresvara himself. (See p. 565 CC. Vol. I.)

---

## ॥ सुरेश्वरवार्त्तिकसम्बन्धोक्तिः ॥

### No. 398. SUREŚVARAVĀRTIKA-SAMBANDHOKTI.

Substance—Paper. Size—11′ × 8½″. Pages—1200. 18—19 lines per page and 10—23 letters per line. Script—Devanāgarī. No. of Granthas—11400. Complete.

Owner—C. O.

Subject etc.—Same as No. 596, DCSMMPL.

Remarks—After colophon occurs the following verse:

"रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्" ॥

---

## ॥ सुरेश्वरवार्त्तिकसम्बन्धोक्तिः ॥

### No. 399. SUREŚVARAVĀRTIKA-SAMBANDHOKTI.

Substance—Palm leaf. Size—22″ × 2″. Leaves—243. 7—10 lines per page and 92 letters per line. Script—Malayāḷam. No. of Granthas—12500.

Owner—Swamiarmaṭhom, Muncira.

Subject etc.—Same as No. 596, DCSMMPL.

Remarks—This Ms. extends from the third Brāhmaṇa of the 4th chapter up to the end 4th Brāhmaṇa of the 8th chapter. It is very old.

## ॥ स्वात्मयोगप्रदीपप्रबोधिनी ॥

### No. 400. SVĀTMAYOGAPRADĪPA-PRABODHINĪ.

C. O. L. No. 640.

Substance—Paper. Size—11″ × 8½″. Pages—215. 18 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3200. Complete.

Owner—C. O.

Subject etc.—Same as No. 260 D.

Remarks—The work is identical with No. 3428 C TCM. Vol, IV. Part I B.

---

## ॥ हठयोगप्रदीपिका ॥

### No. 401 A. HAṬHAYOGAPRADĪPIKĀ.

C. O. L. No. 52 A.

Substance—Paper. Size—11″ × 8½″. Pages—46. 20 lines per page and 16 letters per line.

Script—Malayalam. No. of Granthas—460. Incomplete.

Subject etc.—Same as No. 343 E.

Remarks—The following verses are seen additionally in the beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

अथादिनाथाय नमोऽस्तु तस्मै
येनोपदिष्टा हठयोगविद्या ।
विराजते योन्नतराजयोग-
मारोढुमिच्छोरधिरोहणीव ॥

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठविद्योपदिश्यते ॥

भ्रान्त्या बहुमतध्वान्ते राजमार्गमजानतः ।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥

हठविद्यां हि मत्स्येन्द्रः स्वात्माराममबोधयत् ।
स्वात्मारामो महायोगी जानीते तत्प्रसादतः ॥

आदिनाथश्च मत्स्येन्द्रः सागरानन्दभैरवः ।
गौरङ्गीमिनगोरक्षो विरूपाक्षो विलेशयः ॥

मन्थानभैरवो योगी सिद्धबुद्धस्तु कन्थडिः ।
घेरण्डः पूज्यपादश्च नित्यनाथो निरञ्जनः ॥

कपाली बिन्दुनाथश्च काकचण्डीश्वराह्वयः ।
ह्याडमः प्रभुदेवश्च घोडोचोलिञ्चडण्डिणी ॥

वासुकिर्नागबोधश्च खण्डः कापालिकस्तथा ।
इत्यादयो महासिद्धा हठयोगप्रभावतः ।
खण्डयित्वा कालदमां? ब्रह्माण्डे विचरन्ति ते ॥

---

## ॥ योगसारः ॥

### No. 401 B. YOGASĀRA.

C. O. L. No. 52 B.

Substance—Paper. Size—11″ × 8½″. Pages — 15. 20 lines per page and 16 letters per line. Script—Malayālam. No. of Granthas—150.

Owner—C. O.

Subject—Beginning : Same as No. 620. DCSMMPL.

End :

पूजयेत् परया भक्त्या सत्यज्ञानं न लङ्घयेत् ।
यथा गुरुस्तथैवेशो यथैवेशस्तथा गुरुः ॥

पूजनीयावुभौ भक्त्या गुरोरीशस्य चात्मनः ।
योगसारमिदं शास्त्रं यो जानाति महामतिः ॥

न तस्य किञ्चिद् ज्ञातव्यं त्रिषु लोकेषु विद्यते ।
न चास्ति पुण्यं पापं च तस्य स्थाने पराजयः ॥

न चास्ति पुनरावृत्तिरास्मिन् योगे सुनिश्चले ।

Colophon :

इति योगसारे उमामहेश्वरसंवादे चतुर्थोऽध्यायः ।

Author :

Remarks—This work is noticed under No. 2831 r TCM, Vol. III, Part I C. The only difference is that therein the chapters are called *paṭalas* and herein, *Adhyāya*. The following isolated verses are noticed after the colophon under the fourth chapter :

मृता मोहमयी माता जातो बोधमयः सुतः ।
सूतकद्वितयं प्राप्तं कथं सन्ध्यामुपास्महे ॥

हृदाकाशे चिदादित्यः सदा भाति निरन्तरम् ।
उदयास्तमयौ नष्टौ कथं सन्ध्यामुपास्महे ॥

नाहं देवो नेन्द्रियाण्यन्तरङ्गं
दारापत्यक्षेत्रवित्तानि दूरम् ।
ब्रह्मैवाहं निर्गुणं निर्विकारं
साक्षी नित्यं प्रत्यगात्मा शिवोऽहम् ॥

रज्ज्वज्ञानाद्भाति रज्जुर्यथाहिः
स्वात्माज्ञानादात्मनो जीवभावः ।
आलोक्याहिभ्रान्तिनाशे स रज्जु-
र्जीवो नाहं देशिकोक्त्या शिवोऽहम् ॥

---

॥ तत्त्वोपदेशः ॥

No. 401 C. TATTVOPADEŚA.

C. O. L. No. 52 C.

Substance—Paper. Size—11" x 8½". Pages—20.

20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—290. Complete.

Owner—C. O.

Subject etc.—Same as No. 575, DCSMMPL.

Remarks—In CC it is stated that the work is taken from the Adhyātmarāmāyaṇa but in fact it is otherwise. It may be conjectured that it is the result of an honest attempt of an eminent personage to group together the teachings embodied in several other works. It is identical with No. 3046, TCM. Vol. IV, Part I A.

---

## ॥ वेदान्तदर्शनम् ॥

### No. 401 D. VEDĀNTADARŚANAM.

C. O. L. No. 52 D.

Substance—Paper. Size—11″ × 8½″. Pages — 22. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—200. Complete.

Owner—C. O.

Subject—Exposition of philosophic truths in the form of a dialogue.

Beginning :

यत्कृपालव एवात्मभक्तान् संसारसागरात् ।
उत्तारयति तं वन्दे श्रीगुरुं करुणामयम् ॥

यदज्ञानादुदेती(तीदं) यज्ज्ञानाल्लीयते क्षणात् ।
तत्पदार्थावगम्यं यत्तन्महाव्र... ... .... ॥

सत्याद्विवर्णकं तुर्यं त्रयातीतं त्रयीमयम् ।
तत्त्वमस्यादिलक्ष्यं यत्तद्धाम समुपास्महे ॥

शान्तो मुमुक्षुर्मेधावी विरागी वीतकल्मषः ।
एकान्तस्थं गुरुमिदं शिष्योऽपृच्छत्कृताञ्जलिः ॥

भगवन् करुणासिन्धो गुरो तद्वक्तुमर्हसि ।
यज्ज्ञा(नं?नात्) तत्क्षणादेव मुच्येत मृतिसंकटात् ॥

इति शिष्येण पृष्टोऽसौ गुरुरव्यग्रमानसः ।
कृपयाविष्टचित्तस्तमुवाचाभिननन्द च ॥

साधु पृष्टं महाबुद्धे रहस्यमतिदुर्लभम् ।
यत्त्वं पृच्छसि मां वत्स तच्छृणुष्व वदाम्यहम् ॥

वेदान्तदर्शनमिदं सारं सूर्यप्रकाशकम् ।
अन्यान्यखिलशास्त्राणि खद्योताभानि सुव्रत ॥

तस्मादिदं प्रवक्ष्यामि गुह्यं वेदान्तदर्शनम् ।
समाहितेन मनसा श्रृणु वत्स यथातथम् ॥

End :

तदेकं वाङ्मनोऽतीतमखण्डातीतमच्युतम् ।
स्वयंप्रकाशं तद् ब्रह्म मौनमुद्रेति पश्यताम् ॥

हित्वेदं मौनमुद्रेति भावनामप्यभावना ? ।
यथास्थितं स्थितिः सैव परा मुक्तिः प्रकीर्तिता ॥

इति वाक्यं गुरोः श्रुत्वा शिष्यः परमभक्तिमान् ।
दीर्घदण्डनमस्कारं कृत्वेदमवदत् सुधीः ॥

नमोऽस्तु ते महायोगिन् श्रीगुरो करुणालय ।
ब्रह्मानुभवसिद्धोऽसि भवत्कारुण्यलेशतः ॥

अहं ब्रह्मास्मि विमलो ब्रह्मैवास्म्यहमच्युतः ।
परिपूर्णचिदानन्दस्वरूपोऽस्म्यमृतोऽस्म्यहम् ॥

Colophon :

इति वेदान्तदर्शने आत्मोल्लासे असिपदानिदिध्यासनं नाम दशमोल्लासः ।

Author :

Remarks—This small work on Vedānta philosophy comprises 10 Ullāsas. It is in the form of a dialogue between a teacher and his disciple. It is identical with No. 3132 C, TCM, Vol. IV, Part I A.

---

## ॥ वेदान्तप्रकरणम् ॥

## No. 401 E. VEDĀNTAPRAKARAṆAM.

C. O. L. No. 52 E.

Substance—Paper. Size — 11″ × 8½″. Pages — 6. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—60.

Subject—Vedāntic philosophy.

Beginning :

वक्ष्ये रहस्यमत्यन्तं साक्षाद् ब्रह्मप्रकाशकम् ।
सर्वोपनिषदामर्थं सर्वलोकेषु दुर्लभम् ॥
प्रज्ञानं ब्रह्म ऋग्वेदपदद्वयसमन्वितम् ।
महावाक्यं चतुर्वाक्यमृग्यजुस्सामसम्भवम् ॥
मम प्रज्ञैव ब्रह्माहं ज्ञानमात्रमिदं जगत् ।
ज्ञातमेव जगत्सर्वं ज्ञानादन्यन्न विद्यते ॥
जीवः प्रज्ञानशब्दस्य ब्रह्मशब्दस्य चेश्वरः ।
अखण्डैकरसं वस्तु विदेहान्मुक्तिरुच्यते ॥

End :

जीवोऽपरोक्षचैतन्यमीश्वरो हि परोक्षतः ।
सर्वशून्यमिति त्याज्यो ब्रह्मास्मीति विनिश्चितम् ॥
अहं ब्रह्म न सन्देहः सच्चिदानन्दविग्रहम् ।
एवमैक्यं परं गत्वा स्वस्वभावो भवोत्तमः ॥

एतत्सर्वमहं मिथ्या नास्ति नास्ति न संशयः ।
एवं नास्ति न सन्देहः सर्वं ब्रह्म न संशयः ॥
ए(का)कारमखण्डं तत् तदेवाहं न संशयः ।
ब्रह्मेदं ब्रूहि ताकारं? तद्ब्रह्माहं न संशयः ॥

Colophon :

इति वेदान्तप्रकरणं समाप्तम् ।

Author :

Remarks—This work succinctly elucidates the primary principles of Advaita Vedānta.

## ॥ हरिहराद्वैतभूषणम् ॥

## No. 402. HARIHARĀDVAITABHŪṢAṆAM.

C. O. L. No. 1599.

Substance—Palm leaf. Size—18″ × 1″. Leaves—164.
7—8 lines per page and 48 letters per line
Script—Grantha. No. of Granthas—4000.

Owner—Muttukuṭṭi Śāstrī, Bhūtapāṇḍi.

Subject—A discussion on the identity Hara and Hari.

Beginning:

हरिहराद्वैतभूषणम् ।

ओम् ।

सदानन्दात्मने सर्वसर्गस्थित्यन्तकारिणे ।
सिद्धान्तायात्मरूपाय श्रीरामायात्मने नमः ॥

श्रीशगौरीश्वराभिन्नरूपं राममहं भजे ।
सकृत्प्रपन्नसन्त्राणे दीक्षितं सीतयाश्रितम् ॥

यस्य नामापि सर्वस्मादुत्कर्षं ख्यापयत्यहो ।
विश्वाधिकगुरोः पादपद्मं वन्दे मुदा सदा ॥

सर्वविघ्नहरं विघ्नराजं वन्दे सरस्वतीम् ।
सर्वशास्त्रमयीं वन्दे सर्वाभीष्टप्रदायिनीम् ॥

वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
यतिरूपधरं वन्दे शङ्करं लोकशङ्करम् ॥

हरेर्हरस्य चाद्वैतभूषणं विद्वदीप्सितम् ।
श्रीरामस्य कृपादृष्ट्या क्रियते शुभया शिवम् ॥

अत्र महाविष्णुपरमशिवयोः श्रीगौरीकान्तयोः सर्वज्ञत्वसर्वशक्तित्वसत्यकामत्वसत्यसङ्कल्पत्वकरुणामृतवारिधित्वादिसकलकल्याणगुणैस्साम्यं, तथा सकलजगदुदयस्थितिलयहेतुभूतमायोपहितपरब्रह्मरूपेणैक्यं तथा तत्साम्यैक्ययोर्ज्ञानं सकलश्रेयोर्थिनामावश्यकमित्येतच्च श्रुतीतिहासपुराणादितात्पर्यविषयभूतमेवेति प्रतिपाद्यते ।

End :

जगदुदयलयादेः कारणं यो हि रामो
मुरपुरहरयोस्तद्रूपयोः सर्वदैक्यम् ।
निरुपमसुखसच्चिन्मूर्तिरूपेण भेदः
सकलगुणसमूहैः सर्वदा साम्यमेव ॥

इति दृढतरबुद्धिः सर्वसौख्यैकहेतुः
सकलनिरयहेतुस्तारतम्यादिबुद्धिः ।
इति निगमपुराणन्यायसंसाधितार्थो
निपुणतरमिहोक्तः पञ्चमे साधुतुष्ट्यै ॥

यतो हरिहराद्वैतविज्ञानादसुखे? नृणाम् ।
सुखाय तद्द्वयाभिन्नं राममेव सदाश्रये ॥

सदानन्दस्वरूपो यः सर्वकर्ता जगत्पतिः ।
विष्ण्वीशानादिरूपेण सर्वोपास्योऽखिलेश्वरः ॥

यः सक्रन्नतरन्यायां ? जागर्ति च कृपानिधिः ।
सोऽस्मान् रक्षतु सीतायाः पती रामः परात्परः ॥

स्वस्मिन्नेव दृढां भक्तिं सर्वाभीष्टप्रदायिनीम् ।
प्रायच्छत् सेवितां सर्वैर्ब्रह्माद्यैः सर्वभूयसीम् ॥

यत्कृपालवतो ज्ञातो मया रामः सुखाम्बुधिः ।
तं देशिकवरं वन्दे ख्यातं विश्वाधिकं शुभम् ॥

हरेर्हरस्य चाद्वैतभूषणाख्योऽयमुत्तमः ।
ग्रन्थो भूयात् मुदा प्रीत्यै श्रीरामस्य कृपाम्बुधेः ।

Colophon:

इति हरिहराद्वैतभूषणाख्यग्रन्थोऽयं सम्पूर्णः । श्रीरामार्पण-मस्तु । शार्वरिनाम संवत्सरे 1075 ௵ दक्षिणायने सिंहमासे पञ्चविंशतिदिवसे भानुवारे प्रथमातिथौ पूर्वप्रोष्ठ-पदानक्षत्रे भूतपाण्डिग्रामवासिनः कृष्णशास्त्रिणः स्वहस्तेन लिखितोऽयं ग्रन्थः । तस्य ग्रन्थोऽयं सम्पूर्णः ।

Author:

Remarks—The author makes passing reference to Appayya Dīkṣita quoting his sentences. The first twelve leaves dwell upon certain philosophic topics.

## ॥ मीमांसा ॥

### ॥ अर्थवादादिविचारः ॥

No. 403. ARTHAVĀDĀDIVICĀRA.

C. O. L. No. 109.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—64.

18 lines per page and 19 letters per line. Script—Devanagarī. No. of Granthas—670. Complete.

Owner—C. O.

Subject—Explication of Arthavāda etc.

Beginning;

॥ श्री ॥

असद्गुरुचरणारविन्दाभ्यां नमः ।

अर्थवादानां स्तुत्यापि विधिपदैनैकवाक्यत्वं सम्भवति न-वेति विचार्यते । न सम्भवतीति पूर्वः पक्षः । एकवाक्यत्वं हि नाम यत्प्रयोजनं तदन्वय्यर्थानामितरेषां च तदन्वितप्रति-पत्तिनिमित्तताप्रयोजनत्वमर्थवादानां तेषामेकवाक्यत्वं तथा ल-ङ्पदकरणेतिकर्तृतानियोज्यपदानाम् । तत्र लङ्पदं करणाद्य-न्वितं नियोगं प्रतिपादयति । करणादिपदानि नियोगान्वि-तकरणादीनीति । तेषामेकमेव नियोगः प्रयोजनम् ।

End :

ननु नाम्नः किंकुर्वतो विधिवेदकवाक्यत्वं विधिसम्बन्धि-कारणबोधोत्पादकत्वात् । नन्वसौ यजिनैव सिद्धः । सत्यम् । सिद्धेऽपि तस्मिन् अनुवादरूपबोधो नाम्ना जायते । न चा-सावनुष्ठानानुपयोगी, किन्तु साभ्यासानुभवसंस्काराधानद्वारेण स्मृतिहेतुत्वादनुष्ठानोपयोगीति विधिप्रयोजनबोधजनकतया विध्ये-कवाक्यत्वं वेद्यमित्यखिलमनवद्यम् ।

Colophon :

इति क्षीरसमुद्रवासिमित्रविरचितं नामधेयनिरूपणं समाप्तम् ।

Author—Kṣīrasamudravāsimitra.

Remarks—This Ms. opens with an inquiry into Arthavāda and ends with the discussion on the significance of *Nāmadheyanirūpaṇam*. Probably it is a fragment of an advanced treatise on Mimāmsā.

---

## ॥ आप्तमीमांसा (सव्याख्या) ॥

## No. 404. ĀPTAMĪMĀMSĀ.
(with commentary.)

C. O. L. No. 527.

Substance—Paper. Size—13″ × 8½″. Pages — 91. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1108. Complete.

Owner—C. O.

Subject—An inquiry into the reliability or otherwise of the Vedas.

Beginning :

प्रथमः परिच्छेदः ।

श्रीगणपतये नमः । अविघ्नमस्तु ।

उद्दीपीकृतधर्मतीर्थमचलज्योतिर्ज्वलत्केवला-
लोकालोकितलोकलोकमखिलैरिन्द्रादिभिर्वन्दितम् ।
वन्दे त्वा परमार्हतां समुदयं गां सप्तभङ्गीविधिं
स्याद्वादामृतगर्भिणीं प्रतिहतैकान्तान्धकारोदयाम् ॥

तीर्थं सर्वपदार्थतत्त्वविषयस्याद्वादपुण्योदधि-
र्भव्यानामकलङ्कभावकृतये प्राभावि काले कलौ ।
येनाचार्यसमन्तभद्रयतिना तस्मै नमः सन्ततं
कृत्वा विवियते स्तवो भगवतां देवागमस्तत्कृतिः ॥

देवागमेत्यादिमङ्गलपुरस्सरं तद्विप(य)परमार्थगुणातिशयपरीक्षामुपक्षिपतेव स्वयं श्रद्धागुणज्ञतालक्षणं प्रयोजनमाक्षिप्तं लक्ष्यते ।

End :

नास्तित्वादिभिरविरुद्धं विधिप्रतिषेधयोरन्योन्याविनाभावलक्षणत्वात् स्वार्थज्ञानवत् तद्विधेयप्रतिषेध्यात्मविशेषात् स्याद्वादः प्रतिक्रियते सप्तभङ्गीममाश्रयात् ।

इतीयमाप्तमीमांसा विहिता हितमिच्छताम् ।
सम्यङ्मिथ्योपदेशार्थं विशेषप्रतिपत्तये ॥

इति स्वक्त?परिच्छेदविहितेयमाप्तमीमांसा सा सर्वज्ञविशेषपरीक्षानिःश्रेयसकामिनामभव्यानां तदनुपयोगात् तत्त्वेतरपरीक्षां प्रति भव्यानामेव हि निदधाति कृतिः ॥

Colophon :

इति दशमः परिच्छेदः ॥

Remarks—The Kārikās and their commentary in prose are embodied in this work in 12 Paricchedas.

---

॥ ऋजुविमला (शावरभाष्यव्याख्या) ॥

No. 405. ṚJUVIMALĀ.
(Commentary on Śābarabhāṣya.)

C. O. L. No. 917.

Substance—Paper. Size—11½″ × 9″. Pages — 583. 20—22 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—7500. Incomplete.

Owner—C. O.

Subject etc.—Same as No. 661, DCSMMPL.

---

॥ काशिका (श्लोकवार्त्तिकव्याख्या) ॥

No. 406. KĀŚIKĀ.
(Commentary on Ślokavārttika.)

C. O. L. No. 766.

Substance--Palm leaf. Size—20″ × 2″. Leaves — 93. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—3000. Incomplete.

Owner—Ittisseri Antarjanam.

Subject—A commentary on the Ślokavārttika of Kumārilabhaṭṭa.

Beginning :

भेदास्तु क्लेशतरेणोपपाद्यन्ते । अत एकमेव द्रव्यादिरूपं ग्राहकभेदाद् रू.ादिभेदभिन्नमाभासते मुखमिवादर्शभेदादिति मन्यन्ते । अतस्तत्राप्यभेद एवोद्भवादिव्यवस्था द्रष्टेति न कश्चिद् विशेषः । अत आह—यदापीति । अयमभिप्रायः—यदि तावदस्मात्सिद्धान्तो रूपाभावादाश्रीयते ततस्ते द्रव्यात् परस्परतश्च भिद्यन्त एव ।

अथ मतान्तरेण तथापि न तावदेकस्योद्भवाभिभवावपि मिध्यतः । अतस्तन्मतेऽपि यथैकमेव मृद्रूपं घटशरावादिपरिणामभेदभिन्नमेवमेकमेव द्रव्यरूपं रूपादिभिः परिणामभेदैर्भिद्यत इत्याश्रयणीयम् ।

End :

अयमर्थः । यथा रज्जुघटादिषु..........देशकालाधिष्ठाने पुनः किञ्चिद्वे.............शादि सममस्ति । एव मनु.......... ....................सम्बन्धोऽपीति । ईदृशी चात्र योगरचना शब्दार्थः । न स्व..............तासङ्गतेन असमदेशकालत्वाद् घटरज्ज्वादि.............अधिष्ठानोपलम्भात् तद्वदेवेति ।

इत्युपाध्यायमुञ्चरिमिश्रकृतौ काशिकाटीकायां सम्बन्धाक्षेपः समाप्तः ।

Colophon :

इत्युपाध्याय.......शून्यवादस .माप्तः (page 40) (सहस्राणि

त्रिनाचम्यां (?) चतुश्शतग्रन्थाः पञ्चसहस्राणि । गद्यं चतुश्शतैः सम्भूय पञ्चशदूनषड्विंशतिसहस्र (?) ।

Author—Sucarita Miśra.

Remarks—This Ms. is much damaged. A good number of leaves are missing. The discussion on Śūnyavāda is dealt with on 40 pages and thence Sambandhavārtika is treated at length. The Ms. is identical with No. 2818, TCM. Vol. III, Part I C. The portion ending with Śūnyavāda of the work is published as Nos. 90 & 99 in TSS.

---

## ॥ काशिका ( श्लोकवार्त्तिकव्याख्या ) ॥

No 407. KĀŚIKĀ.
Commentary on Ślokavārtika.

C. O. L. No. 1333.

Substance—Palm leaf. Size—23½" x 2". Leaves—177. 11 lines per page and 112 letters per line. Script—Malayāḷam. No. of Granthas—12500.

Owner—Maṇalikkara Maṭhom.

Subject—Same as No. 406.

Beginning:

हरिः श्री ।

... ... .... ... ....

पणार्थमथ गौरित्यत्र कः शब्द इति तावदब्रवीत् । परस्ताच्चार्थस्वरूपनिरूपणार्थं कोऽर्थ इति वक्ष्यतीति । एवं च वदता वार्त्तिकका-

कारेणान्तरा चिन्तेयमिति दर्शितम् । तथा हि न तावत् चित्राक्षेपानन्तरं कः शब्द इति शब्दस्वरूपनिरूपण.... ....तु परिहार उक्ते पुनश्चाक्षिप्ते स्थितं तावदपर्यवसितम्, अधुना तदौपयिकमेव चिन्तान्तरं वर्तयिष्याम इति भवति संगतिः ।

End :

.... .... .... .... ....

मातेत्येवमाद्या अपि नानुपपन्नाः। स्तुतयो ह्येताः सत्यस्य । वनस्पतयो नाम चेतना इदं सत्रमुपासितवन्तः । किं पुनर्विद्वांसो ब्राह्मणा इति । तदेतद्वार्त्तिककारो दर्शयति.... .... ....

वनस्पतिसत्रोपासनादिसम्भावितानि तेषामर्थवादतया समाधानं वक्ष्यत इत्यभिप्राय.... ....एवमुपपादितम् । वेदानां प्रामाण्यमिदानीमुपसंहरति.... .... ....

अयमभिप्रायः---परतोऽपि विध्यर्थवादमन्त्रात्मना त्रेधा वेदं विभज्य योऽर्थः प्रवक्ष्यते । विधेः साध्यासाध्यासम्बन्धः अर्थवादमन्त्रयोर्विधेयकारोऽपि (?) प्रमाणान्तर्गत एवेति कृत्स्नस्याध्यायस्य प्रमाणलक्षणोपपत्तिः, आह च चोदनासूत्रनिर्दिष्टो यः प्रमाणपरिग्रहः स प्रकारः स.... .... .... ....

Colophon :

वेदाधिकरणं समाप्तम् ।

इति प्रथमाध्यायस्य प्रथमः पादः ।

Author—Same as No. 406.

Remarks—The Ms. is very old. Both at its beginning and close, a few leaves are missing.

## ॥ काशिका (श्लोकवार्त्तिकव्याख्या) ॥

No. 408. KĀŚIKĀ.

Commentary on Ślokavārtika.

C. O. L. No. 767.

Substance—Palm leaf. Size—19" × 2". Leaves—96. 8 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—3800. Incomplete.

Owner—Iṭṭiśśeri Antarjanam, Kottayam.

Subject etc.—Same as No. 406.

Remarks—Only a portion extending from the 2nd *bodanāsūtra* up to the commentary on the 229th verse of the *Pratyakṣa Sūtra* is extant herein.

---

## ॥ काशिका (श्लोकवार्त्तिकव्याख्या) ॥

No. 409. KĀŚIKĀ.

Commentary on Ślokavārtika.

C. O. L. No. 779.

Substance—Palm leaf. Size—20" × 1½". Leaves—95. 8 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—4000.

Owner—Swāmiyar Maṭhom, Tiruvārpu.

Subject—Same as No. 406.

Beginning :

गणपतये नमः । अविघ्नमस्तु ।

वार्त्तिकारम्भे शिष्टाचारमनुविदधानो मङ्गलं तावत्करोति—विशुद्धेति ।

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥

End :

परिहरति—किं वास्त्यसाधारणबुद्धिरत्र । एवं ह्यसाधारणमपि प्रत्यक्षं भवेत् । तत्रापि हि निर्विकल्पकावस्थायां परव्यावृत्त्यकल्पनादसाधरणोल्लेखो नास्त्येव । यदि तु तादृूप्येणाविकल्पितमपि स्वरूपेण तल्लोकोऽवबुध्यते इति तत्प्रत्यक्षम् । एवं तर्हि ह्याकारमेव सम्मुग्धं वस्तु लोकः प्रतिपद्यत इति परीक्षकैरुभयथापि तच्छक्यत एव वक्तुमिति (?) सिद्धं ह्याकारमेव वस्तु प्रत्यक्षेण गृह्यत इति । सिद्धं च सामान्यतः सम्बन्धदर्शनमित्यभिप्रायेणाह—

यद् वस्तु लोकः प्रतिपद्यतेऽस्मिन्
द्विधापि तच्छक्यत एव वक्तुम् ।

अस्मिन्निति । प्रत्यक्षज्ञान इत्यर्थः ।

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायामनुमानवादः समाप्तः ।

Author—Same as No. 406.

Remarks—The commentary bearing upon *Pratyaksasūtra* is missing and *Anumānavārtika*

is seen instead. In the printed text the date of the author is discussed in detail.

---

## ॥ काशिका (श्लोकवार्त्तिकव्याख्या) ॥

No. 410. KĀŚIKA.
Commentary on Ślokavārtika.

C. O. L. No. 1398.

Substance—Palm leaf. Size—$17\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—186. 11—12 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—10500. Incomplete.

Owner—Rāja of Edappaḷḷy.

Subject—Same as No. 406.

Beginning :

हरिः । श्रीगणपतये नमः ।

ओम् ।

वार्त्तिकारम्भे शिष्टाचारमनुविदधानो मङ्गलं तावत्करोति विशुद्धेति । दृष्टा हि शिष्टानां प्रवृत्तिः... ....लं च देवतास्तुतिनमस्कारादि । अस्य च नियोगतः फलवत्कार्यान्तरारम्भसंयोगात्साक्षादफलत्वाच्च "फलवत्सन्निधावफलं तदङ्ग"मिति न्यायेन कार्यान्तरशेषत्वेऽवधृते सत्यारम्भस्य समाप्तिपर्यन्तत्वादपेक्षिताविघ्नपरिसमाप्तिः फलम् । "अपेक्षितविधेरनपेक्षितविधानं दुर्बलमि"ति न्यायेन फलान्तरकल्पनाया दुर्बलत्वात् । अतो यथा साम्प्रदायिकमध्यायानध्या-

यादि स्वाध्यायाविज्ञार्थम् एवमिदमपि । तदयमर्थः । विशुद्धौ ज्ञान· देहौ यस्य स तथोक्तः । विशुद्धं च भगवतो ज्ञानं रागादिभिज्ञ्ज्ञान- कारणानामदूषितत्वात् । देहश्च अयोनिजत्वाद् विविधगर्भवेदना- विरहाच्च ।

End :

एवञ्च यदैकरूप्यमेवाश्रित्य केचित्प्रलपन्ति तद् वृथैव । यथा नानावर्णोपहिते चित्रे कृष्णाद्येकरूपतेत्याह—तस्मादिति । नन्वेवं भे· दाभेदहेतुबलाबलाविशेषात् तुल्यबलविरोधे विकल्पो भवेत् । नचासौ सिद्धे वस्तुनि सम्भवतीति संशयो भवेत् । एवं च सन्दिग्धार्थगो- चरत्वेनाप्रामाण्यं भवेदत आह—वस्त्वनेकान्तेति । वस्त्वनेकान्त- वादोऽयमस्माभिराश्रितः । अतो न सन्दिग्धत्वेनाप्रमाणता भवतीति । एतदेव स्फुटय.... .... ....

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां निमि- त्तसूत्रं समाप्तम् ।

इत्युपाध्यायसुचरितमिश्रकृता(यां) काशिकाटीकायां वेदाधिकरणं समाप्तम् । हरिः ।

Author—Same as No. 406.

Remarks—The first 20 leaves are numbered alphabetically and thenceforward numerically. A gap of four leaves is marked in the middle.

---

## ॥ काशिका ( श्लोकवार्त्तिकव्याख्या) ॥

No. 411 A. KAŚIKA.

Commentary on Ślokavārtika.

C. O. L. No. 1779 A.

Substance—Palm leaf. Size—20½″ × 2″. Leaves—123.

10—11 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—3600. Incomplete.

Owner—Nārāyaṇan Nambūri, Kiḷimaṅgalam.

Subject—Same as No. 406.

Beginning :

.... .... .... .... .... ....
.... ....साधिता। तत्र च पङ्क्तिवनोपन्यासेन हेतोरनैकान्तिकतोच्यते । अतो मीमांसकोक्तजातिसाधनदूषणोपन्यासे .... .... .... ....न्यासेन वनोपन्यासः संगच्छते। दूषणं त्वेतत्। परेषां जात्यपलापसाधनस्य प्रत्यक्षविरोधाख्यमभिमतम् । तत्र किं वनोपन्यासेनेति मत्वा सम्बन्धत्वमुक्तवानिति । कस्य पुनरिदं दूषणमत आह.... .... ....
.... .... ....तद्वृक्षा अपि न सन्तीति।

End :

कथं तर्हि कृत्स्नोऽध्यायः प्रमाणलक्षणमाख्यायते। अत आह अत इति । अयमभिप्रायः—परतोऽपि विध्यर्थवादमन्त्रात्मना त्रेधा वेदं विभज्य योऽर्थः स वक्ष्यते। विधेः साध्यसाधनसम्बन्धः। अर्थवादमन्त्रयोर्विधेयः स्तुतिस्मृती। अनेन प्रकारेण विध्यर्थवादमन्त्राणां प्रामाण्यमुक्तं भवति। अतः प्रमाणप्रकारोऽपि प्रामाणान्तर्गत एवेति कृत्स्नस्याध्यायस्य प्रमाणलक्षणत्वोपपत्तिः। आह च—

चोदनासूत्रानिर्दिष्टो यः प्रमाणपरिग्रहः।
सप्रकारः स आद्येन लक्षणेन प्रदर्शितः ॥

इति निर्णय इति।

Colophon :

इति महोपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां

प्रथमस्याध्यायस्य प्रथमः पादः । इति काशिकाटीकायां वेदाधि-
करणं समाप्तम् ।

श्रीगणपतये नमः ।

Author—Same as No. 406.

Remarks—The Ms. is much antiquated and most of the leaves are damaged. The page numbers could not be deciphered. The other works in the codex are catalogued separately. The title, Mahopādhyāya, is seen prefixed to the author's name.

---

## ॥ शाबरभाष्यम् ॥

## No. 411 B. SĀBARABHĀṢYAM.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 2''$. Leaves—23. 11 lines per page and 93 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Owner—Same as No. 411 A.

Subject—Exposition of Jaiminisūtras.

Beginning:

ओम् । हरिः ।

एकादशेऽध्याये तन्त्रावापलक्षणं वृत्तम् । अधुना द्वादशे
प्रसङ्गलक्षणं व्याख्यास्यामः । प्रसङ्गशब्दार्थ उक्तः । "एवमेव
प्रसङ्गो स्याद्विद्यमाने स्वके विधावि"ति । अन्यत्र एतस्यार्थस्यापि
प्रसक्तिः । प्रसङ्गा यथा प्रदीपप्रकाशस्य प्रभा.... .... ...
....व्यालोककारणं तदिह प्रसङ्ग एवादौ चिन्त्यते ।

End:

धात्वर्थावसानश्चाख्याताभिधानादवसीयमानो व्यापारस्तदनन्तरभाव्येवाभिधानोपात्तेन रूपेण कर्म गृह्णातीत्यस्य प्राचुर्यं प्रयोगस्य। व्यवहितफलोद्देशेन तु तदवसानता व्यापार..................
....नोपात्ता "विवक्षया त्वग्निं चिनुत" इत्यादौ सम्पद्या। वक्ष्यति हि—एतावानेव वर्तमानकाल इति। तेन तात्पर्याभिधायिन एव भावनाकर्मत्वोपपादनस्यैवं कामशब्दस्य तत्र प्रयोगः प्रचुर इति।

Colophon:

इति शाबरे मीमांसाभाष्ये द्वादशस्य द्वितीयः पादः।

Author—Śabaraswāmi.

Remarks—The commentary extends up to a fragment of the 12th chapter. Many leaves are almost mouldered.

---

## ॥ श्रौतप्रयोगभाषा ॥

### No. 411 C. ŚRAUTAPRAYOGABHĀṢĀ.

C. O. L. No. 1779 C.

Substance—Palm leaf. Size—20⅓" × 2". Leaves—30. 11 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—1100. Complete.

Owner—Same as No. 411 A.

Subject—The sacrificial rituals binding upon the *Hotā* and perfomer.

Beginning :

........ഗണപതയെ നമഃ. അവിഘ്നമസ്തു.

അഗ്നിഷ്ടോമാത്ഥമായിക്കൈപിടിച്ചാൽ ബ്രഹ്മനും ഹോതനും തൈത്തിരീയരോട്ടക്കൂടപ്പോയി ബോധായനീയസ്ഥാനവും ചൈതുപോരു. ബ്രഹ്മൻ കാലും കഴുകി ആചമിച്ചു് ... ...ബ്ബൈഷ്ണ ൻറതിനു തെക്കെ നില്പൂ. തൈത്തിരീയരോട്ടു കൂട വരണൊന്ത മായിച്ചെത്രഗ്നിഹോത്രശാലയിൽച്ചെൻറ തീ കാച്ചുനെടത്ത വിടെയവിടെത്തെക്കിരിപ്പൂ. ശാലയിൽ പോംപോൾ കൂടെ പ്പോയി കാലും കഴുകി ആചമിച്ചു ദേവയജനാദ്യവസ...കുന്ന തെക്കെനിപ്പൂ. ഇരികിലിരിപ്പൂ.

End :

ശാലയിൽ പോരുമ്പോൾക്കൂടപ്പോയിത്തീകാച്ചുമെടുത്തു് അവിയവിടെത്തെക്കിരിപ്പൂ. അകത്തു പോമ്പോൾ കൂടെപ്പോയി കാലു കഴുകി... ...ചമിച്ചുധാഷ്യു ഇഡ ജപിച്ചാൽ ബ്രഹ്മൻ വെട്യൽക്കരമകം പൂകി അയതു നത്തി? അവിടെയവിടെത്തെക്കിരിപ്പൂ. പൂൎണ്ണാഹുതിക്ക് പരിസ്തരിച്ചാൽ മന്ത്രത്താലിരിപ്പൂ. പൂൎണ്ണാഹുതി കഴിഞ്ഞാൽ പ്രദക്ഷിണം വെത്തി നമസ്കരിച്ചു പോവൂ.... .... ....

Colophon :

... .... .... ...ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

हरिः ।

नारायणेन लि...............

Author :

Remarks—The work furnishes a description (in Malayāḷam) of the Vedic rituals. The Vedic sentences are sparingly quoted in the course of the work. No clue is afforded by the text to determine the author's identity.

---

## ॥ सर्वसिद्धान्तसंग्रहः ॥

## No. 411 D. SARVASIDDHĀNTASAṄGRAHA.

C. O. L. No. 1779 D.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 2''$. Leaves—23. 8 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas — 760. Complete.

Owner—Same as No. 411 A.

Subject—Establishment of the identity of Jīva with the supreme soul, refuting other views.

Author—Rāghavānanda Yogī.

Remarks—The Ms. is very old and the script has also a tinge of antiquity. It has been written by a disciple of the author's *Praśiṣya* as evinced by the colophon. It has been established that Rāghavānanda flourished in the 16th century. Sarvasiddhāntasaṅgraha and Kṛṣṇapadī are the works of one and the same author. The date of Rāghavānanda

may be roughly fixed as the 15th century." This work is identical with Sarvamatasangraha (No., 62 TSS). But the following portion is seen additionally in the end:

जीवपरैक्यसाक्षाद्बोधे सति सिध्येत् । अविद्यानिवृत्तिश्चात्मनः पृथक्त्वपक्षे पञ्चमप्रकारा । तथाहि—न तावदविद्यानिवृत्तिः सती, निवर्त्याया अविद्यायाः सत्त्वापत्तेः । नाप्यसती, अनुदयापत्तेः । नापि सदसती, विरोधात् । नाप्यनिर्वचनीया, भावाभावयोरेकरूपत्वाभावात् । परिशेषात् पञ्चमप्रकारा । नचात्मस्तया? मुक्तौ सद्वितीयत्वा ...ि:, अवस्तुनो निवृत्तेरप्यवस्तुत्वात् शुक्त्यज्ञाननिवृत्तिवत् । ब्रह्मविद्याप्रतिबिम्बितं ब्रह्मैवाविद्यानिवृत्तिरिति पक्षे तु (न)सद्वितीयत्वशङ्कापीत्यखिलमनाविलम् ॥

समाप्तः सर्वसिद्धान्तसंग्रहः । हरिः ।

राघवानन्दयोगीन्द्रकृतः सिद्धान्तसंग्रहः ।
तत्प्रशिष्यस्य शिष्येण लिखितः केनचित् पुरा ॥

---

## ॥ काशिका (श्लोकवार्त्तिकव्याख्या)॥

### No. 412. KAŚIKĀ.

Commentary on Ślokavārtika.

C. O. L. No. 625.

Substance—Palm leaf. Size—21" × 2". Leaves—188. 8 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas—5800. Incomplete.

Owner—Tekkumkūr Annamanam Valia Tampurān.

Subject—Same as No. 406.

Beginning:

.....पतये नमः । ओम् ।

अत्र भाष्यकारेण विज्ञानवादान्ते... ... ... ... ... ...
... ... ... ... .. ...

प्रत्यक्षेति । अयमर्थः— वृत्तिकारग्रन्थे हि तेन व्यभिचरति प्रत्यक्षं तन्मूलकत्वाच्चानुमानाद्यपीति प्रत्यक्षव्यभिचारपूर्वकमनुमानादीनामपि व्यभिचार.... ..... ....क्षाव्यभिचारत्वे..... ते व्यभिचारिकारणप्रभवत्वेन तावद् व्यभिचाराशङ्का प्रत्युक्ता । यदि परं स्वरूपाश्रयो व्यभिचारः सम्भवति सोऽपि वक्ष्यमाणलक्षणकेषु नाशङ्कनीय एव ।

End:

....................वन्ताव...नाम्नामपोह इत्युक्तमाख्यातशब्देभ्योऽपि नान्यनिवृत्तिरवगम्यते इत्याह आख्यातेष्विति । ......
.... .... ....तेषु न किञ्चित्पर्युदासरूपं निषेध्यं गम्यते । नह्यपचति न....तीति शक्यं निरूप.................. प्रायेणाह न पर्युदास इति । आख्यातयो....नञा निषेधवचनं न पर्युदासार्थ इति भावः । ... ... ... ...
तत्पुनर्नञा प्रतिषिध्यते न न पचतीति । ततो नञर्थस्यैव निषेधस्य निषे.... .... .... .... ....
ति प्रभावात् । तथाहि—पचतीति तावदुक्तुमशक्यम् । न पचतीत्युच्यमाने पाकप्रतिषेध एव .... .... .... ....
... ... ... ... ... ...

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां स्फोट-
वादः समाप्तः ।

Author—Same as No. 406.

Remarks—This Ms. is almost worn-out and wanting in the beginning and end. 3 leaves in the middle are lost.

---

## ॥ काशिका (श्लोकवार्त्तिकव्याख्या) ॥

### No. 413. KĀŚIKĀ.

Commentary on Ślokavārtika.

C. O. L. No. 1938.

Substance—Palm leaf. Size—22″ × 2½″. Leaves—137. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—5000. Incomplete.

Owner—Śaṅkaran Śaṅkaran Nambūri, Kumāranallūr.

Subject—Same as No. 406.

Beginning :

पेये वेदे य... .... .... ....नोपदेयेन सिद्धं
किं गुरुणेति परित्यागपरिचोदनानुपपन्नेति परिहरति—सत्यमिति ।
तेन स्तुतिवचनेन प्ररोचनं स्तुतिसाध्यप्ररोचनं, तत् स्तुतिव-
चनं परित्यागानुपपत्तौ फलितमाह—तस्मिन्निति । स्तुतिवचने

विद्यमान एव योऽर्थो वाक्यस्य स्तुतिकार्यप्ररोचनार्थोऽवगम्यते । अवगतिशब्देन तत्कार्याङ्गीकारो लक्ष्यते । तेनाङ्गीक्रियते अङ्गी-क्रियते । अङ्गीकार्य इत्यर्थः ।

End :

परार्थत्वाद् गुणानाम्.....पूर्वोक्तमप्यसम्भवति । मिथ-स्सहप्रदाने क्रियमाणे त्रिंशत्सम्बन्धाभावादनर्थसम्बन्धः स्यात् । कुतः ।

हविषां गुणभूतत्वान्न कर्मावृत्तिहेतुता ।
दैवतैक्यात् सहत्यागो लाघवाद्धि प्रसज्यते ॥

तेन शक्यस्सन् सकृद् यागः कर्तव्य इति । सत्यां हि स-हप्रदानशक्तौ नावृत्तिर्युक्ता । सम्प्रतिपन्नदेवतात्वात् सहप्रदा-नमविरुद्धं शक्यं कर्तुम् । ततश्च त्रिंशत्विरोधः । त्रिंशत्पूरणं च केषाञ्चित् । एवं नव प्रयाजा नवानूयाजा द्वावाघारौ द्वावाज्य-भागौ अष्टौ प्रधानाहुतय इति । अपरेषां तु स्विष्टकृद्वाजिनेज्याग्र-हणादाघारौ न गणितौ । सर्वथा तु प्रधानाहुतिभेदासिद्धिः ।

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां वृत्ति-कारग्रन्थः समाप्तः ।

Author—Same as No. 406.

Remarks—A good number of leaves, are missing in the beginning and several leaves are also damaged in the middle. This Ms. commences from the middle of the *Pratyakṣa Sūtra* and ends with *Vṛttikāragrantha*. Thereafter the *Anumāna*

is just begun and the leaves are not arranged in order.

---

॥ काशिकाव्याख्या ॥

## No. 414. KĀŚIKĀVYĀKHYĀ.

C. O. L. No. 618.

Substance—Palm leaf. Size—13″ × 2″. Leaves—133. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3100. Incomplete.

Owner—Tekkumkūr Valia Tampurān.

Subject—Elucidation of the Kāśikā.

Beginning:

हरिः । ओम् ।

व्याख्या सुचरितायस्य मीमांसावार्त्तिकस्य या ।
तत्राप्याख्यातदुर्ज्ञानमर्थं व्यक्तीकरोम्यहम् ॥

विशुद्धेत्यादिश्लोकदशकस्यारभ्यमाणग्रन्थशेषत्वप्रकारं दर्शयन्ति । प्रथमस्य तावद् दर्शयन्ति--वार्त्तिकारम्भ इति । वार्त्तिकारम्भं निमित्तीकृत्य तदङ्गतयेत्यर्थः । अत्र मङ्गलविशेषे स्तुतौ नमस्कारे च क्रियमाणे सति सामान्यवाचिना मङ्गलपदेन विनियोगकरणं दृष्टा हि शिष्टानामित्यनन्तरकरिष्यमाणव्याप्तिप्रदर्शनानुगुणतया कृतमिति मन्तव्यम् । शिष्टाचारसिद्धत्वं मङ्गलस्य दर्शयति--दृष्टा हि शिष्टानामिति

End :

नन्वेवमपि सिद्धप्रमाणभावस्येत्यनुपपन्नम् । सिद्धशब्दस्य निष्पत्त्यर्थतया पूर्वं प्रामाण्याभावप्रसङ्गादिति । अथवा वेदस्य विध्यर्थवादमन्त्राणामयुक्तं विध्याद्यतिरिक्तस्य वेदस्यैवाभावात् इति । अथवा विध्यर्थवादमन्त्राणामित्यनुपपन्नम् । उत्तरत्र नामधेये व्युत्पादनादित्याशङ्कामपाकुर्वन्नुक्तार्थं प्रपञ्चयति—अवधृतप्रामाण्यस्येति । पूर्वत्र विभक्तयविनियोग इति विभागमात्र.... ...दानीं यथाविनियोगमिति योग्यत्वेन विभाग इति भेदः ।

Colophon :

इति परमेश्वरविरचिते काशिकाव्याख्याने आकृतिग्रन्थः समाप्तः ।

Author—Parameśvara.

Remarks — This is a detailed commentary on Kāśikā. The opinions of various authors are also alluded to here in order to make the work as useful as possible. Only a portion extending from the *Ātmavāda* up to a fragment of the commentary on *Outpattikasūtra* is dealt with herein. The work is noticed under No. 31611 (a), TCM, Vol. IV, Part I B.

## ॥ काशिकाव्याख्या ॥

## No. 415. KĀŚIKĀVYĀKHYĀ.

C. O. L. No. 337.

Substance—Paper. Size—13″ × 8½″. Pages — 28, 16

20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—3150.

Owner—C. O.

Subject—Beginning: Same as No. 414.

End:

अयं त्वदाभिहितो---कार्यकारणभावादन्य इत्युक्ते कोऽसावन्य इत्यपेक्षायामाह....स्वभावनियम इति । यद्यपि प्रवृत्तशक्तिरूपोपादानकारणसहकृत इति परमार्थतः तत्सहकारित्वमपि न युक्तिमदिति भावः । ननु नादो रूपकार्यं नात्मेति रूपं प्रति कारण... ... ... .... देवेति भावः ।

Colophon:

इति परमेश्वरविरचिते काशिकाव्याख्याने आत्मवादः समाप्तः ।

Author—Same as No. 414.

Remarks—Same as No. 359 b.

---

## ॥ जैमिनिसूत्रार्थसंग्रहः ॥

No. 416. JAIMINISŪTRĀRTHASAṄGRAHA.

C. O. L. No. 837.

Substance—Palm leaf. Size—15½″ × 2″. Leaves—115. 10 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas—4000. Incomplete.

Owner—Paramesvaran Padmanābhan Nambūri, Kallampalli, Nellippuzha, Ettumānūr.

Subject—A short commentary on the aphorisms of Jaimini.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

इष्टानिष्टप्राप्तिहान्योर्जागरूका भवन्तु नः ।
ऋषयः पितरो देवाः सर्वदार्याश्च मातरः ॥

समस्तजगदुद्भवस्थितिनिरोधकृत्तास्थिव-
स्त्रयीमहिपमस्तयोः सतनु कृत्तिवाससतपः ।
अनस्तिजनिवस्तुतस्तुहिनशानुमत्सम्भवं
महस्तदतनु स्तुमः शमितभक्तचेतस्तमः ॥

जैमिनिशबरकुमारिल-
सुचरितपरितोषपार्थसारथयः ।
उम्बेकविजयकारौ
मण्डनवाचस्पती च विजयन्ताम् ॥

आम्नाये निर्भुजिनि
प्रतृण्णवत्युभयभाजि पूर्णाङ्गे ।
अध्यापितिनः प्रणमा-
म्याचार्यान्वासुदेववाचार्यान् ॥

अग्निहोत्रं दर्शपूर्णमासेष्टिः पशुबन्धनम् ।
चातुर्मास्यानि सोमाश्च यज्ञाः पञ्चाप्यवन्तु नः ॥
भाष्यवार्त्तिकतद्व्याख्याद्युक्तसूत्रार्थसंग्रहः ।
पितुर्मातुः पितृव्यस्य प्रसादात् प्रविलिख्यते ॥

इह खलु सकललोकाभीष्टपुरुषार्थचतुष्टयावाप्तिहेतुभूतानि वेदतदङ्गोपाङ्गोपवेदाख्यविशिष्टान्यष्टादश विद्यास्थानानि मन्त्रादिभिरुपदिष्टानि । यथाहुः—

End :

एतच्च प्रदर्शनमात्रार्थमुदाहरणम् । पुरोडाशमलंकुर्विति लिङ्गसमवायात् पुरोडाशशब्देनात्रैवान्यत्रापि धानादिलक्षणाया दृष्टत्वात् । प्रकृतिलिङ्गत्वादिति पाठे स्वार्थिकस्त्वप्रत्ययः ।

तस्मान्नेयं पुरोडाशमात्रे स्यान्मांसचोदना ।
किन्तु भक्तयात्र धानादिसवनीयाखिलाश्रया ॥
इति शेषकथा पा(दे?दै)रष्टभिः परिनिष्ठिता ।
श्रुत्यादिभिः पट्प्रमाणैस्तेषां चोक्तं बलाबलम् ॥

अत्र तरसाधिकरणे त्रीणि सूत्राणि ।

Colophon :

इति महोपाध्यायश्रीमदृषिपुत्रश्रीपरमेश्वरविरचिते सूत्रार्थसंग्रहे तृतीयस्याध्यायस्याष्टमः पादः ।

समाप्तश्चाध्यायः ।

हरिः ।

Author—Parameśvara, son of Ṛṣi.

Remarks—The Ms. seems to be very old. The commentator refers to several other Mīmāmsakās. The work is identical with No. 3080 TCM, Vol. IV, Part I A wherein it is designated as Mīmāmsāsūtrārthasaṅgraha.

## ॥ जैमिनिसूत्रार्थसंग्रहः ॥

## No. 417. JAIMINISŪTRĀRTHASAṄGRAHA.

C. O. L. No. 1824.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—134. 9 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—3100. Incomplete.

Owner—Brahmadattan Nambūri, Kūḍallūr.

Subject—Beginning: Same as No. 417.

End:

ऐन्द्राग्निस्त्विन्द्रसहिताग्निदेवत्वात् ततोऽपि प्रशस्त इत्येवं-रूपा स्तुतिः ।

तस्मादसन्न यद्दर्शे पुरोडाशा उभौ स्मृतौ ।
आग्नेयच्युतवाक्योक्त ऐन्द्राग्नश्च तथापरम् ॥
ऐन्द्रस्तु सन्न यद्दर्शे माहेन्द्रो वा विकल्पितः ।
द्वितीयः स्यात्पुरोडाश उभयत्रापि नापरः ॥

अत्राग्नेयाधिकरणे त्रीणि सूत्राणि ।

Colophon:

इति श्रीमद्दृषिपुत्रमहोपाध्यायपरमेश्वरविरचिते जैमि-निसूत्रार्थसंग्रहे द्वितीयस्याध्यायस्य तृतीयः पादः समाप्तः ।

Author—Same as No. 417.

Remarks—Same as No. 359 B.

## ॥ जैमिनीयन्यायमालाविस्तरः ॥

## No. 418. JAIMINĪYANYĀYAMĀLĀVISTARA.

C. O. L. No. 2380.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—28. 9—10 lines per page and 68 letters per line. Script—Grantha. No. of Granthas—900. Incomplete.

Owner—Śivarāmasubrahmaṇya Śāstrī, Vadiviśvaram.

Subject—The rules of interpretation and sacrificial procedure.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

युक्तिं मानवतीं विदन् स्थिरधृतिर्भेदे विशेषार्थभा-
गाप्तोहः क्रमकृत्प्रयुक्तिनिपुणः श्लाघ्योपदेशोन्नतिः ।
नित्यस्फूर्त्यधिकारवान् गतमदाबाधः स्वतन्त्रेश्वरो
जागर्ति श्रुतिमत्प्रसङ्गचरितः श्रीबुक्कणक्ष्मापतिः ॥

End :

कटे भुङ्क्ते कांस्यपात्र्यां भुङ्क्त इत्यत्र लौकिकाः तद्वद्वस्तु-शक्त्यनुसारेण व्यवस्थां कल्पयन्ति । कट आसीनः कांस्यपात्र्या ख्यातनं (?) निधायेति । वेदेऽप्यञ्जलिना सत् तत् प्रदाप्ये जुहुयादित्यत्र यद्यपि द्रवद्रव्यस्याज्यस्य स्रुवो योग्यः । छेदनीयमांसस्य शस्त्रविशेषः स्वधितिः । संहतस्य पुरोडाशस्य हस्त इत्यनेन प्रकारेण स्रुवाद्या व्यवस्थिताः ।

Colophon :

इति जैमिनीयन्यायमालाविस्तरे प्रथमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

भावार्थाः कर्मशब्दाः । तेभ्यः क्रिया प्रतीयेत ।
प्रमाणमुपजव्यित्वात्प्रथमाध्याय ईरितम् ।
मानाधीनस्य धर्मस्य द्वितीय भेद उच्यते ॥

अनेन प्रथमद्वितीययोरध्याययोः पूर्वोत्तरभाव उपपादितः ।

द्वितीयस्याध्यायस्य प्रथमे पादे प्रथमाधिकरणे प्रथमं वर्णकमारचयति---

विधिवाक्ये पदैस्सर्वैरपूर्वे प्रतिपादिते ।
प्रत्येकमथवैकेन सर्वैस्तत्प्रतिपादनम् ॥
फलान्वयित्वात् सर्वेषां प्रधानान्वयलाभतः ।
लाघवादेकबोध्यत्वं तच्छेषस्तु पदान्तरम् ॥
विधि

Author—Mādhavācārya.

Remarks—This Ms. embodies the first chapter and two verses in the second. It has been published in Poona.

---

## ॥ तत्वाविर्भावः ॥

### No. 419. TATVĀVIRBHĀVA.

C. O. L. No. 1640.

Substance—Palm leaf. Size—12" × 1½". Leaves—71.

8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Śaṅkaran Śaṅkaran Nambūripād, Kumāranallūr.

Subject—A collection of detached portions from Vedic treatises.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

वन्दे कल्याणयोरेकमिन्दुचूडमुकुन्दयोः ।
अङ्गं कलिन्दहिमवत्सुतयोरिव सङ्गमम् ॥

आचार्यकृतिप्रकृतेराविर्भावाय नीतितत्त्वानाम् ।
अयमिह यत्नः क्रियते सन्तः पुष्यन्तु सन्तोषम् ॥

विदुषामयं प्रबन्धो दुर्जनदृष्योऽपि जायते प्रीत्यै ।
किं शर्करा न मधुरा पित्तोपहतस्य तिक्तेति ॥

आदौ स्वाध्यायविध्यर्थनिर्णयाय यतामहे ।
शास्त्रारम्भस्य वैधत्वप्रतिपादनसिद्धये ॥

यदि हि "स्वाध्यायोऽध्येतव्य"इति विधिरध्ययनस्य स्वाध्यायसंस्कारद्वारेणार्थज्ञानसाधनत्वं बोधयतीति न प्रतिपाद्येत, तद्यर्थज्ञानानुष्ठानस्य वैधत्वाभावात् तदङ्गभूतं मीमांसाश्रवणमपि न वैधं स्यात् । अवैधं च न वैधस्नानमुत्क्रष्टुमर्हति इति नाध्ययनानन्तरं तद्धेतुका धर्मजिज्ञासा कर्तव्या भवेत् । अतो मीमांसाश्रवणस्य वैधत्वप्रतिपादनाय स्वाध्यायाध्ययनविधिः अधीतेन स्वाध्यायेनार्थज्ञानं सम्पाद्यमिति बोधयति—नवेति ।

End :

काठकादिसमाख्यापि कस्यचिदेव कठादेः प्रकृष्टवचनमिति न वचननिबन्धनैवेति सिद्धमपौरुषेया वेदाः ।

साकूतं गहनं कुमारिलमतं जिज्ञासुभिः पण्डितै-
रध्यस्यास्वबधीरणा...ग्रन्थोऽयमभ्यस्यताम् ।
नो चेदुद्धततार्किक...समामध्यस्थितानां भवेत्
तत्तन्मार्गविचक्षणत्वविरहादात्मैव नो वञ्चितः ॥

यो भूयः सोमपाथी श्रुतिसरणिमणिर्विश्वसाधारणश्री-
र्विद्यानामेकमोकस्त्रीधरो ब्रह्मनिष्ठनतस्कर(?) ।
....सूक्तिभूमिः कविगमकतया श्रीचिदानन्दनामा
तत्त्वाविर्भावमुच्चैर्व्यथित बुधसभारोहिणीरौहिणेयः ॥

Colophon :

इति चिदानन्दपण्डितकृतिः तत्त्वाविर्भावः ।

Author—Cidānanda Paṇḍita.

Remarks—Only perception and inference of Tattvāvirbhāva are dealt with herein. Some ritual observances are also explained in Malayāḷam at the close.

## ॥ तत्त्वाविर्भावव्याख्या ॥

### No. 420. TATTVĀVIRBHĀVAVYĀKHYĀ.

C. O. L. No. 1776.

Substance—Palm leaf. Size—13½" × 1¾". Leaves—117. 9—10 lines per page and 56 letters per

line. Script—Malayāḷam. No. of Granthas—1700. Incomplete.

Owner—Nārāyaṇan Nambūri, Kilimaṅgalam.

Subject—Beginning: Same as No. 667, DCSMMPL.

End:

परा गतिश्च प्रमाणेनेत्याह—किञ्चेति । तानेव धर्मिहेतुदृष्टान्ता-नाश्रित्येति समानजातीयाः समानगुणकार्याः परमाणवो मुक्तात्मानश्च न विशेषाख्यपदार्थान्तरयोगिनः द्रव्यत्वाद् घटव-दित्यादि । ननु कथं न विशेषसमायिन इति पक्षीकरणीयम् । साध्यविशेषणस्य विशेषस्य प्रमाणान्तरेण प्रमितौ तद्बाधाद-प्रमितावप्रसिद्धविशेषणत्वापत्तेरित्यत्राह—यथाह चैवं परप्रसि-द्धसाधनेऽपीति । ईश्वरानुमान एवेति । तस्यैव तत्क्षेत्रत्वादिति भावः ।

विशेषाभाववादेऽस्मिन् प्रपञ्चो वार्त्तिकादिषु ।
द्रष्टव्य इति कृत्वेह संक्षेपोक्तिरियं कृता ॥

Colophon:

Author:

Remarks—This Ms. is damaged. The page numbers are consecutive up to "जक्र" (104) and the next Fol. is numbered "त्रु म्र" (75). No break is discernible in the treatment of the subject. The author was the grandson of Parameśvara, the commentator on Nyāyakaṇikā. He himself is responsible for a commentary called, Vibhramaviveka.

---

## ॥ तन्त्रटीकानिबन्धनम् (अजिता) ॥

## No. 421. TANTRAṬĪKĀNIBANDHANAM.

C. O. L. Nos. 320 and 342.

Substance—Paper. Size—11½" × 8". Pages—280.
18 lines per page and 26 letters per line.
Script—Devanāgarī. No. of Granthas—4000.

Owner—C. O.

Subject—A commentary on Kumārila's Tantravārtika on Śabarasvāmibhāṣya.

Beginning:

अथातः शेषलक्षणम् । द्विलक्षण्याः परमिति । ननु प्रत्येकलक्षणार्थं व्याख्यातुं प्रवृत्तस्य प्रत्येकं प्रतिज्ञानमेवोचितम् । अस्ति च अथातः क्रत्वर्थपुरुषार्थयोरित्यादि । तेनानर्थकमिदं सकलं प्रतिज्ञानं, शास्त्रादौ ह्येतत् स्यात् । तत्र सर्वस्य वक्तव्यत्वेन परिग्रहात् । किञ्च तत् । अथातो धर्मजिज्ञासेति प्रतिज्ञापि खण्डेनोच्यते । धर्मोऽत्र शास्त्रविषयत्वेन शब्दोपात्तः । स च नान्तरेण प्रमाणं सिध्यतीति प्रमाणमप्युपात्तमेव ।

End:

शेषलक्षणमिति । तदुपसंहारे दर्शयति इति कथितबलाबलप्रवेकैरिति । इतीत्युक्तप्रकारपरामर्शः । कथितो बलाबलप्रवेको येषाम् । अथवा प्रवेकशब्दस्य संघाते रूढत्वात् कथितं

बलाबलं संघातश्च श्रुत्यादिषट्को येषाम्। तथावगतः सर्वो विरोधमार्गो बाधमार्गश्च येषाम् । लिङ्गादिप्रामाण्ये बलाबले च कारणम् । श्रुत्या प्रत्यक्षयानुमितया च कृतो दृढो बाधविकलो निश्चयो निस्संशयः शेषावगमः फलात्मा येषाम् । यथोपात्तैः प्रमाणैः कर्मसु दर्शपूर्णमासादिषु यावान् शेषशेषिभावः, स इहोक्ते लक्षणे स्थितः प्रतिष्ठित इति ।

Colophon :

इति महोपाध्यायश्रीपरितोषमिश्रविरचिते तन्त्रटीकानिबन्धनेऽजिताख्ये तृतीयस्याध्यायस्याष्टमः पादः... .... ....

अजितातटमधिवसता
 तज्जलसेवाविधूतपापेन ।
यस्मादियमारचिता
 तस्मादजितैव नाम्नास्तु ॥

Author—Paritoṣamiśra.

Remarks—The colophon reveals the identity of the author. This work elucidates the principles underlying Pūrva Mīmāmsā. The colophon discloses that the author lived on the banks of the Ajitā. This work is designated after that river. It is identical with Nos. 368, (TCM. Vol. I, Part I B) and 2787 (TCM. Vol. III, Part I C.)

## ॥ तन्त्रटीकानिबन्धनम् (आजिता) ॥

### No. 422. TANTRAṬĪKĀNIBANDHANAM.

C. O. L. No. 1777.

Substance—Palm leaf. Size—$17\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—125. 10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4400.

Owner — Mahāmahopādhyāya Nārāyaṇan Nambūri, Kilīmangalassu.

Subject etc.—Same as No. 421.

---

## ॥ तन्त्ररत्नं (टुप्टीकाव्याख्या) ॥

### No. 423 A. TANTRARATNAM.

Commentary on Ṭupṭīkā.

C. O. L. No. 768 A.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—131. 8—9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—5500 Incomplete.

Owner—Iṭiśśeri Antarjanam, Kottayam.

Subject—Elucidation of the Jaiminisūtras.

Beginning:

... ...णत्वप्रतिपादकत्वेनास्य प्रवर्तकत्वामिति

वक्तव्यम् । न च तावतापि प्रवृत्तिः सिध्यति । स्वयमननुष्ठित-
स्यापि मेघच्छायादेरिव समीहितसाधनत्वसम्भवात् प्रयुक्तिविशेष-
विचारो... ... ... ...

... ... ... येदं
सूत्रम् । अस्ति विधेः प्रयोजकत्वं, तथा लोके दर्शनात् । कर्तृ-
समीहितसाधनत्वं विषयस्य विधिरवगमयति, न समीहितमात्रमतः
प्रवर्तकत्वाद्विधेः प्रयुक्तिलक्षणमारम्भणीयमिति ।

End :

तस्माद्यागमात्रं करणमिति तदाक्षिपति । अयुक्तोऽयं ग्रन्थः ।
उपश्लेषलक्षणया विशेषणविशेष्यभावमात्रप्रतिपादिकया. . .पदश्रु-
त्या धातुना सम्बन्धो भावनायाः । तृतीयया तु तादर्थ्येनैव
करणभावेन दर्शपूर्णमासयोर्भावनाया(म)न्वयः । ततः किमि-
त्याह---तत्रोपश्लेषया लक्षणया तादर्थ्यमशब्दमेव कल्प्यं तृती-
ययाह-- .... ...

..,.. ... ,... ....

Colophon :

इति श्रीमदुपाध्यायश्रीपार्थसारथिमिश्रविरचिते तन्त्र-
रत्ने पञ्चमस्याध्यायस्य चतुर्थः पादः ।

Author—Pārthasārathimiśra.

Remarks—The first 120 leaves are numbered alphabetically and the remaining eleven numerically. Thereafter, a few leaves dealing with grammar bring this Ms. to a close. The Ms. is very old and extends from the 1st *pāda* of the 4th chapter up to a fragment

of the 2nd *pāda* of the 6th. It is identical with No. 2713, TCM. Vol. III, Part I C.

---

## ॥ भाष्यप्रदीपः ॥

### No. 423 B. BHĀṢYAPRADĪPA.

C. O. L. No. 768 B.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—48. 8—9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Owner—Same as No. 423 A.

Subject -- Elucidation of the Mahābhāṣya of Patañjali.

Beginning :

... ... ... ... ... ... ... ... ... ...

... ... ... ... ... ... ... ... ... ... ...

त्वात् न तर्हीदानीमिदं भवति । पूर्वं भुक्त्वा ततो व्रजतीति । नैतत् क्रियापौर्वकाल्यम् । किं तर्हि । कर्तृपौर्वकाल्यमेतत् । पूर्वं ह्यसौ भुक्त्वा अन्येभ्यो भोक्तृभ्यः ततः पश्चाद्व्रजतीति । अन्येभ्यः व्रजितृभ्यः । इह कस्मान्न भव. . . . . .भोक्तुमिति । कुतः कस्मान्न भवति । किमासे आहोस्विद्भुजे । भुजेः कस्मान्न भवति । अपूर्वकालत्वात् । आसेस्तर्हि कस्मान्न भवति । यस्मा-ल्लडत्र भवति । एतावदत्र वक्तव्यम् ।

End :

न चात्र चिकीर्षितं प्रधानं निमित्तानिश्चयात् । तत्राचिकीर्षिते प्रधानेऽङ्गाधिकाराभावादनधिकारिणा कृतस्यापि विफलत्वादकर्तव्यमावाहनमिति सोऽयं निमित्तनिश्चयात् स्वकाले प्राकृतस्यावाहनस्य वा. . . . . . . . . . . . ।

Colophon :

इत्युपाध्यायजय्यटपुत्रकय्यटकृते भाष्य(प्र)दीपे षष्ठस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् ।

Author—Kaiyaṭa, son of Jayyaṭa.

Remarks--Same as No. 359 b.

---

## ॥ आशौचव्याख्या ॥

### No. 423 C. ĀŚAUCAVYĀKHYA.

C. O. L. No. 768 C.

Substance—Palm leaf. Size—$12\frac{3}{4}'' \times 1\frac{1}{2}''$. Leaves—13. 6—7 lines per page and 32 letters per line. Script--Malayāḷam. No. of Granthas — 175. Incomplete.

Owner—Same as No. 423 A.

Subject—The rites to be observed on pollution.

Beginning :

. . . . . . . . . . . . त्वोत्कर्म तस्य च क्रिया कर्तारमन्तरेण न सम्भवति । कर्तृत्वं तु ज्ञा... ... ...

.... ... ....कर्मक्षपणम् इतराङ्गस्पर्शनिवृ-
त्तिश्च... ...द्वारोपि... ... ...
... ... ... । अपिच निमित्तसद्भाव-
मात्रप्रवृत्तावग्निहोत्रा.... ... ...
... .... ...सद्भावेनैव प्रवृत्तत्वात् पुनः
क्रियानुपप.... .... .... ....
.... .... .... त्। अतो ज्ञानप्रभृत्येवा-
शौचप्रवृत्तेर्ज्ञानात् प्राञ्चरण... ... ।

End :

अष्टमात् प्राक्तनस्य ज्ञातेरुक्तमाशौचं सामान्येन प्राप्तं, तद्विशि-
नष्टि—एतत् सहभुवि तु कृते नाम्नीति । एतदित्यनन्तरप्रस्तुतं
दशरात्रं, तत सहोदरस्य नामकरण.... .... ।

Colophon :

इति षष्ठः श्लोकः । श्रीकृष्णाय नमः ।

Author :

Remarks—The Ms. is very much antiquated. No clue is evinced by the work to determine its name and hence the vague title "आशौचव्याख्या" is given. From the colophon "इति षष्ठश्लोकः" it is possible to infer that the work is a commentary on Āśaucāṣṭaka of Vararuci.

## ॥ तन्त्ररत्नं (टुप्टीकाव्याख्या) ॥

### No 424. TANTRARATNAM.

Commentary on Ṭupṭīkā.

C. O. L. No. 774.

Substance—Palm leaf. Size—$20\frac{3}{4}'' \times 2''$. Leaves—295. 11 lines per page and 96 letters per line. Script—Malayāḷam. No. of Granthas—19470. Incomplete.

Owner—Svāmiārmaṭham, Tiruvārpu, Kottayam.

Subject—Same as No. 423 A.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा । पूर्वाध्याये हि शेषपर्यायमैदमर्थ्यमेव चिन्तितम् । इहापि क्रतुपुरुषैदमर्थ्यमेव चिन्त्यत इति कथं लक्षणभेदोऽत आह—तृतीयेनावधृते शेषत्वे क्रत्वर्थः पुरुषार्थ इति । चिन्त्यत इति सम्बन्धः । एतदेव विवृणोति—विशेषश्चिन्त्यते पूर्वमवधृते सामान्ये । यथा सप्तमेन सामान्येनातिदेशे सिद्धेऽष्टमेन विशेषातिदेशश्चिन्त्यते, एवमिहापि सामान्यविशेषविषयत्वेन लक्षणभेदः । तदिदमेकदेशिमतं निराकरोति—अथवेति ।

End:

अ(न्या?न्यद)पि स्मृतिवचनं क्रतुसंयुक्तमस्त्येव ब्राह्मणानामार्त्विज्यमिति । तच्चार्त्विज्याङ्गतया ब्राह्मणं विधत्ते । अतस्तल्लोपे क्रतुरेव विगुणः स्यात् । तथा भारतेऽपि "राजयाजकयाज्येषु

यथा दत्तं हविर्नश्येदि"ति हविषो विनाशवचनात् क्रतुवैगुण्यमेव दर्शितम् । लिङ्गानि च दर्शितानि 'ब्राह्मणानामिदं हविरि'त्येवमादीनि ।

आर्त्विज्यं न भवेत् कर्म स्वतः क्षत्रियवैश्ययोः ।
ब्राह्मणानां तु विदुषामार्त्विज्यं स्यादिति स्थितम् ॥

Colophon :

इति महोपाध्यायश्रीपार्थसारथिमिश्रविरचिते मीमांसान्यायवार्त्तिकनिबन्धने तन्त्ररत्ने द्वादशस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

तन्त्ररत्नं समाप्तम् ।

Author—Same as No. 423 A.

Remarks—This Ms. extends from the 1st *pāda* of the 4th chapter up to the end of the 12th chapter. The commentary is written in elegant style. Khaṇḍadeva is made mention of in the course of the work and his views are also set at naught by the author. Only a few chapters are in print.

---

## ॥ तन्त्ररत्नं ( टुप्टीकाव्याख्या ) ॥

### No. 425. TANTRARATNAM.

Commentary on Ṭuptīkā.

C. O. L. No. 2353.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—90. 9 lines per page and 84 letters per line.

Script—Malayāḷam. No. of Granthas—4200. Incomplete.

Owner—Harihara Aiyar Nārāyaṇa Aiyar, Veccur.

Subject—Same as No. 423 A.

Beginning:

... ... .... ....कृतेषु साकाङ्क्षेषु सत्सु प्रकृतग्रहणे किञ्चित्प्रमाणमन्तर्भूतमिति चेत्, न। तस्यासामान्यवचनत्वात् सामान्यस्य च प्रतिपिण्डसमाप्तित्वेन प्रकृतेष्वपि साकल्येन विद्यमा.... .... .... .... .... ....व्यक्तिषु लक्ष्यमाणासु न प्रकृतातिक्रमे कारणमस्ति। तस्मात् प्रकृता एव तावद् ग्रहीतव्याः। तत्रापि प्रकृतत्वाविशेषात् सर्वेषु प्रयाजादिष्वपि यागेषु प्रसक्तेषु दर्शपूर्णमासश.... .... .... .... .... .... ....फले विधीयन्ते। अन्यथा तत्सामानाधिकरण्यबाधात्।

End:

अभ्याधानेन हि द्रव्यं चिकीर्ष्यते। तेन हि दृष्ट एव संस्कारोऽग्नेः क्रियते। तस्मान्नादृष्टार्थं फला.. .... .... .... .... ....तत्रैव गुणविशेषोऽयं फलाय विधीयते। दध्ने.... .... .... ....धिकरणन्यायात् न कर्मान्तरम्। तच्च होमार्थस्याग्नेरभ्याधानमिति तादृश एव.... .... .... .... .... .... ....य विधीयते। तस्माद्धोमार्थस्य नित्यस्य बाध इति सिद्धं .... .... .... .... .... ... ...योऽसौ काम्योऽग्निः, तस्याहवनीयशब्दो वाचकः स्यात्।

Colophon :

इति तन्त्ररत्ने द्वादशस्य तृतीयः पादः ।

Author—Same as No. 423 A.

Remarks—Both at the beginning and close a few leaves are missing. Besides, the edges of certain leaves are worm-eaten. The title page discloses another name, Ṭupṭīkā, for this work but no internal evidence is available. This Ms. extends from the 1st *pāda* of the 7th chapter up to a fragment of the 4th *pāda* of the 12th.

॥ तन्त्ररत्नं (टुप्टीकाव्याख्या) ॥

No. 426. TANTRARATNAM.

Commentary on Ṭupṭīkā.

C. O. L. No. 471.

Substance—Paper. Size—11″ x 9″. Pages—1492. 19 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—17700.

Owner—C. O.

Subject etc.—Same as No. 424.

Author—Same as No. 423 A.

Remarks—The work comprises only 12 chapters. At the close four pages are seen in the order of a, b, c, d, and the next page is numbered 1395.

## ॥ तन्त्ररत्नं (टुप्टीकाव्याख्या) ॥

### No. 427. TANTRARATNAM.

Commentary on Ṭupṭīkā.

C. O. L. No. 1782.

Substance—Palm leaf. Size—18″ × 2″. Leaves—146. 11—13 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—8760. Incomplete.

Owner—Mahāmahopādhyāya Nārāyaṇan Namburi Avl., Kilimaṅgalaśśeri.

Subject—Same as No. 423 A.

Beginning:

....... ....... .......

....... ....... .......

जिज्ञासा तावद् विदेवनादिविषया क्रत्वर्थपुरुषार्थजिज्ञासैव । तथाग्निं चित्वा सौत्रामण्या.................. ......णोतीत्यत्रमादर्थवादत्वे क्रत्वर्थपर्णमयीत्यादिश्रुतिद्वारेण क्रत्वर्थता । फलार्थत्वे तु फलस्य पुरुषार्थत्वात् तद्वारेण पुरुषा............यथा दर्शपूर्णमासादिति साङ्गानां कश्चिद्ग्रहणमपुरुषार्थमपि प्रयोजकमस्तीति यथामिक्षा अप्रयोजकः क्रत्वर्थः ।

End:

पशुशब्दाभिधानमर्थान्तरेभ्यो व्यावर्त्य छागे नियच्छति । अभिधानविशेषणमपि विशेषणमेवेत्युक्तम् । उक्ते विशेषणे...... ............न पशुं साधनत्वेन मन्त्रं च प्रकाशकत्वेन स्वीकुर्वता

सामर्थ्यादनेन मन्त्रेण प्रकाशितं पशुमालभेतेति विहितं भवति ।
न च... .... .... .... ते छागपशुशब्दयोर्विशेषणविशेष्यभावः
सिद्धो भवतीति पश्वन्तरानुपादाने चोदना न विरुध्यते ।

सामान्यं हि विधत्ते......................

छागे नैवाधिकारोऽत्र पशुबन्ध इति स्थितिः ।

Colophon :

इति तन्त्ररत्ने षष्ठस्याध्यायस्याष्टमः पादः ॥

समाप्तश्चाध्यायः ।

Author—Same as No. 423 A.

Remarks—An independent explanation of Jaimini's Sūtras is aimed at in this work. It commences with a fragment of the 1st *pāda* of the 4th chapter and ends with the 6th chapter. It is available in print.

---

## ॥ तन्त्रशिखामणिः ॥

### No. 428. TANTRAŚIKHĀMAṆI.

C. O. L. No. 66 A, B and 299 A, B.

Substance—Paper. Size—$13\frac{1}{4}'' \times 8\frac{1}{4}''$. Pages—999. 18—20 lines per page and 16—20 letters per line. Script—Devanāgarī. No. of Granthas—11000.

Owner—C. O.

Subject—Elucidative exposition of the Mimāmsā-sūtras of Jaimini.

Beginning :

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ॥ १ ।

अनन्यप्रकृतेर्यस्मात् समग्रगुणसम्पदः ।
काङ्क्षितानि लभन्तेऽन्ये तमीडे सोममव्ययम् ॥

अस्ति गोविन्दयज्वेन्द्रनामा मखातपःफलम् ।
श्रीविङ्कटेश्वरम(हा?खी) सर्वतन्त्रस्वतन्त्रधीः ॥
येनेष्टं साग्निचित्याप्तवाजपेयादिभिर्मखैः ।
कृतं साहित्यसाम्राज्यं नाम काव्यमनुत्तमम् ॥

प्रतिष्ठापितचोळक्ष्माजानेस्तस्य नियोगतः ।
चूडामणिर्वितनुते यज्वा तन्त्रशिखामणिम् ॥

धीमन्मान्ये शकस्याब्दे हायने चेश्वराभिधे ।
चूडामणिः कलयते यज्वा तन्त्रशिखामणिम् ॥

पूर्वस्मिन्नध्यायषट्के उपदेशात्मकप्रमाणव्यापारश्चिन्तितः । उत्तरस्मिंश्चाध्यायषट्केऽतिदेशात्मकप्रमाणव्यापारश्चिन्तयिष्यते । ततश्चेत्थं कुर्यादित्येकमर्थं विधाय तद्वत्कुर्यादित्यर्थान्तरं विधातव्यमिति उपदेशपूर्वकत्वादतिदेशस्य षट्कयोर्हेतुहेतुमद्भावः सङ्गतिः ।

End :

एवं चोदकतोऽतिरात्राद् द्विरात्रेषु द्वितीयेऽहनि अतिरात्रसंस्थे विकल्पेन षोडशिग्रहप्राप्तौ तन्नियमार्थेनोत्तरेऽहनि द्विरात्रस्य गृह्यत इति वचनेन सामा...............

Colophon :

इति श्रीमदद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाग्निचित्याप्तवाजपेय-

याजिश्रीवेङ्कटेश्वरदीक्षितनियोगानुभवसमुन्मिषितमनीषाविशेषस्य प्रतिदिनप्रबन्धपरमेश्वरस्य षड्भाषासार्वभौमिकस्य षड्दर्शिनीकेलिविवरणालङ्कर्मीणगृहशुकशारिकाकिशोरवाङ्मुखचर्वितचार्वाकमुखदुर्वादिकुलदुर्वारगर्वस्य सत्यमङ्गलरत्नखेटाध्वरीन्द्रसुकृतपरिपाकस्य विश्वजिद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ दशमाध्यायस्य पञ्चमः पादः ॥

Author—Rajacūḍāmaṇi Dīkṣitar, son of Veṅkiṭa-śrīnivāsa Dīkṣita.

Remarks—A good portion of the text has been lost in the middle. The 6 chapters of the 1st half expatiate upon the theoretical proofs and the next half of 5 chapters, on comparative proofs. But the latter half extends up to a fragment of the 6th *pāda* of the 10th chapter. Nos. 24417—4419, DCSM. Vol. IX are identical works.

---

## ॥ दुरूहशिक्षा ॥

### No. 429. DURŪHAŚIKṢĀ.

C. O. L. No. 197.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—331. 17 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—3000.

Owner—C. O.

Subject—The views of Appayadīkṣita set forth in his Vidhirahasya.

Beginning :

अखण्डसच्चिदानन्दं खण्डचन्द्रशिखण्डकम् ।
उमया मिश्रितं... ... ॥

* * *

* * *

* * * तिलकः ।
परबलवडवानलप्रतापाग्निः ॥

तस्मादभूदखिलभूपतिमौलिमाला-
माणिक्यरश्मिमसृणीकृतहंसकश्रीः ।
विश्वत्रयं परिपुनन् यशसां वितानै-
र्वीरावनीपतिरपारकृपाम्बुराशिः ॥

तस्यात्मजो जयति वीरगणाग्रगण्यः
श्रीचोक्कनाथधरणीपतिसार्वभौमः ।
प्रत्यर्थिपार्थिववधूमुखमारुतोष्म-
विख्यापितग्लपनशक्तिमहाप्रतापः ॥

युद्धक्षोणिषु चोक्कनाथनृपतेर्यावत्समावर्जितं
क्रोधावेशमदोष्णदोर्विलसितज्याघोषघोरं धनुः ।
तावत् कान्तसमागमोत्कवलहृच्छुद्धान्तसीमन्तिनी-
पाणिप्रेङ्खदभङ्गकङ्कणझणत्कारैर्नभः पूर्यते ॥

बिभ्रद् भुजौ मुद्दलकाद्रिभूप-
वीराच्युतक्ष्मापतिसार्वभौमौ ।
औत्पत्तिकाभ्यां सह यो भुजाभ्यां
चतुर्भुजत्वं... ... ॥

विद्वत्प्रभोः कृपायोगाच्चोक्कनाथमखी भुजः ।
दुरूहशिक्षां मन्दोऽपि निश्शङ्कं कर्तुमारभे ॥

अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधिः ॥

नाप्रबन्धास्ति नायष्टा येषां नाब्रह्मवित् कुले ।
आमूलोन्मूलितद्वैतान् कुलवृद्धान् नमामि तान् ॥

यत् पाण्ड्यानां समररजसोऽप्युद्विजन्ते तुलुष्का
यत् कर्णाटा निशि न भवनद्वारमाच्छादयन्ति ।
उद्दामद्विट्करिवरहरेश्चोक्कनाथक्षितीन्द्रो-
रुत्कूलानां ननु विलसितं तत् कृपाणस्य धाम्नाम् ॥

तस्यैव श्रेयसो वृद्धिमाकाङ्क्ष्य विषये वसन् ।
अजस्रमपि मीमांसे कर्मब्रह्मपरा गिरः ॥

यद्रसायनसमीरितं विधौ भद्रधीरपजहार दूषणम् ।
तन्निराकरणकौतुकी जनः सन्निधापयतु धार्मिकीं कृतिम् ॥

यद्यपि न विधिरसायनमास्कन्दति विशेषण… …।
… :..दापि तदाधुनिक… … ॥
...पण्याय. . . . . .ह प्रायेण सि· . . . ।
… ...पदार्थान् विलिखामि तान् ॥
कृतोपपादना ये स्युर्मूले विधिरसायने ॥

End :

अन्त्ये तत्पूरणफलकत्वस्यापि विवक्षितत्वे उदुम्बरताविध्य-
व्याप्तिरुक्तैव । तदभावे सर्वेष्वेवापूर्वविधिषु परिसंख्याविधिषु
चातिव्याप्तिः । किञ्च कस्य प्राप्त्यप्राप्ती केन सम्बन्धेन

विवक्षिते । यदि संयोगेन, हन्त विधावेव न स्यात् । दृढतरसंयो-गात्मकस्यावघातस्य सम्बन्धार्थं

Colophon :

श्रीमदद्वैतविद्याचार्यविश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोः चतुरधिकशतप्रबन्धनिर्माणधुरन्धरश्रीकण्ठमतप्रतिष्ठापकमहाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यस्य श्रीमदाच्चादीक्षितस्य पौत्रेण रुक्मिणीपरिणयालङ्कारतिलकाद्यनेकप्रबन्धनिर्मातुरप्पय्यदीक्षितस्य पुत्रेणाप्पयदीक्षितेन विरचितायां दुरूहशिक्षायाम् अपूर्वविधिलक्षणसमर्थनभङ्गस्तृतीयः ।

Author---Appayya Dīkṣita.

Remarks--From the colophon it is clear that the author is one Appayya Dīkṣita quite different from the well-known Appayyadīkṣita, the author of Vidhirasāyana. But both belong to the same family and the geneology as traced from the colophon is given below :

RAṄGARĀJADĪKṢITA.

- Appayyadīkṣita (The famous author of 104 works)
- Daughter
  - Āccādīkṣita
    - Appayyadīkṣita (The author of Rukmiṇīpariṇaya, Alaṅkāratilaka etc.)
      - Appayyadīksita (Durūhaśikṣā)

The work is identical with No. 3939 (a) TCM. Vol. IV, Part I C.

## ॥ नक्षत्रवादावलिः ॥

## No. 430. NAKṢATRAVĀDĀVALI.

C. O. L. No. 83.

Substance—Paper. Size—13½" × 8". Pages — 344. 20 lines per page and 20 letters per line. Script—Devanāgari. No. of Granthas—4300.

Owner—C. O.

Subject—27 *Vādas* relating to Mīmāmsā.

Beginning:

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥

तन्त्रान्तरेष्वनुपपादितमर्थजातं
यत् सिद्धवच्च्यवहृतं ध्वनितं च भाष्ये ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या
बालप्रियेण मृदुवादकथापथेन ॥

शेषीभवदपि भाष्ये सुमहति सत्रेऽग्निहोत्रमिव ।
स्वातन्त्र्येण प्रकरणमर्थप्रतिपादने समर्थमिदम् ॥

कुण्डपायिनामयनाख्ये सत्रे श्रूयते—'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति' इति । तन्मासाग्निहोत्रं नैयमिकाग्निहोत्राद् भिद्यते न वेति जरन्मीमांसकमतानुसारिणः सिद्धान्तिनश्च विप्रतिपत्त्या संशये सति सिद्धान्तानुसारिणो वादिनः प्रथम-

कक्ष्या । मासाग्निहोत्रं नैयमिकाग्निहोत्रान्न भिद्यते विधिवाक्यश्रुताग्निहोत्रनामविषयत्वात् । यथा 'यवाग्वाग्निहोत्रं जुहोति' इति श्रुतं यवागूगुणकमग्निहोत्रम् ।

End:

एवं च शुक्तिरजतस्याप्रपदार्थतावद् वियदादिप्रपञ्चस्यापि बाध्यत्वसिद्धिरखण्डाद्वितीयब्रह्मभावपरममुक्त्युपयोगिन्यव्याहता न विलक्षणत्वादिकरणन्यायेन सत्यमिथ्यावस्तुनोरप्युपादानोपादेयभावोपपत्तेरिति ।

Colophon:

इति प्रपञ्चसत्तानिराकरणवादः ।

इति श्रीमदप्पय्यदीक्षितविरचिता नक्षत्रवादावलिः समाप्ता ।

Author—Appayya Dīkṣita.

Remarks—A disquisition upon Māsāgnihotra and other topics connected with Mīmāmsa make up this work. It is noticed under No. 5079, DCSM, Madras Vol. X. But therein it is included under Śaivavedānta section.

---

## ॥ नयविवेकः ॥

### No. 431 A. NAYAVIVEKA.

C. O. L. No. 839 A.

Substance—Palm leaf. Size—$9\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—130. 8 lines per page and 24 letters per line.

Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Owner—Harīśvaran Padmanābhan Nambūri.

Subject—Beginning—Same as No. 673, DCSMMPL.

End :

नन्वाप्तवाक्यान्मानमनुमायार्थं च स्मृतितोऽपि कार्यधीः
सा स्मृतिकारणिका, स्मृतेस्त्वलौकिकार्थाया: कारणं वेदोऽनुमीयतां,
चैत्यवन्दनादेस्तु वेदमूलत्वानुपगमात् न वेदानुमा । तन्न । मिति-
साधनस्य वेदस्य योग्यानुपलम्भनिरासे कृते मिति... ... ...
मान्न मित्यनुमापूर्विका, स्मृतितः कार्यधीरिति न तद्बलाद् वेदानु-
मा । नचानुमानैकगम्ये वेदे योऽनुपलम्भासिद्धिः । अस्तु श्रोत्रग्राह्य-
वर्णात्मकतया शब्दे... ... ...

Colophon :

इति नयविवेके प्रथमस्याध्यायस्य द्वितीयः पादः ।

Author—Same as No. 673, DCSMMPL.

Remarks—The Ms. is much antiquated and mouldered. It contains only the 1st *pāda* of the 1st chapter and a fragment of the 2nd.

---

## ॥ आशौचदीपिका ॥

No. 431 B. ĀŚAUCADĪPIKĀ.

C. O. L. No. 839 B.

Substance—Palm leaf. Size—$9\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—10, 8 lines per page and 27 letters per line,

Script—Malayāḷam. No. of Granthas—160. Incomplete.

Owner—Same as No. 431 A.

Subject Rites to be observed on pollution.

Beginning:

श्री हरिः ।

यतो वा जन्मास्य स्फुरति च यतो वा तदितरद्
द्वयेनाप्येतेन प्रकटितनिदानाघमखिलम् ।
व्यतीयास्ते शुद्धो निरघ इह यस्यावगमना-
दुपासे तत्तत्त्वं प्रशमितविकल्पं चिदमिदम् ॥

आशौचान्तिमसम्भवेऽन्तिमनिशात्र्यंशः पराहः सम-
श्चण्डांशावुदिते विशुद्धिरुदिता स्याशुद्ध्यहोभ्यः परम् ।
पुष्पोद्भेददिनात् तृतीयकनिशायास्त्वन्त्यवेदांशके
व्याप्लवं वितनोतु वा कुसुमितेत्याहुर्बुधाः केचन ॥

End:

अन्येषां तु सपिण्डवन्निजनिजाशौची समं चापरं
कुत्राप्यत्र पुरोदिरस्य गुरुता साकं न गच्छेदघम् ।
आशौचेऽपगते श्रुते दशदिनाशौची परं पिण्डकृ-
न्माता वापि दशाहमेव विदधीतात्रापरेषां तु नो ॥

अतीतेऽघे श्रुते स्नानं पिण्डानर्हस्य शुद्धये ।
उक्तं पुरोदशौचं संस्कारादेर्भिदोच्यते ॥

वृद्धानां मरणेऽपि संस्कृतविधिं कुर्यादिहैकर्चतो
बालानामिव मुख्य एष हि विधिः कुर्वन्ति केऽप्यन्यथा ।

पुंसामष्टमवर्षतः परमथ स्त्रीणां पुनर्द्वादशा-
दूर्ध्वं मस्त्रयनं मतं नतु ततः पूर्वं शिशूनां मृतौ ॥

Colophon :

Author :

Remarks—A few verses bearing upon the rites relating to pollution make up this work. But the last six leaves deal with the science of prosody. From the colophon in No. 101, it is known that the author of this work was a native of Puruvanagrāma (Perurmanam Illam), Trichur, Cochin State.

---

## ॥ नयविवेकः ॥

### No. 432. NAYAVIVEKA.

C. O. L. No. 1775.

Substance—Palm leaf. Size—9" × 1½". Leaves—100. 8 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—3500. Incomplete.

Owner—Mahāmahopādyāya Nārāyaṇan Nambūripād, Sabhā Maṭhom.

Subject—Same as No. 673, DCSMMPL.

Beginning :

......द्विवचनानुवादप्रयोजनाभ्यां यजेः प्रकृतमात्रवृत्ति

......काचाहाँ न च वाक्यशेषे त्रिवृदादिस्तोमानां ज्योतिष्टुवकीर्तनाद् ग्रहं वा.........यागमात्रे ज्योतिष्टोमपदे वृत्तेः तदनुरोधात्तत्रैव यजेर्वृत्तिर्वाच्या ।

End :

नामां नानासङ्ख्यानाम् उपादानासम्भवे मुख्यधर्मानुग्रहात् । विहारादर्शनं च द्वादशाहिको धर्मः । किन्तु अनारभ्याधीतविहारस्याहर्बहुतया तत्पराावृत्तियोगितया गवामयने सामर्थ्यात् प्रविष्टस्य तृतीयां प्रकृतिं सर्वव्यापितया ज्योतिरादिगतस्य दर्शनमेतत् ।

Colophon :

इति भवनाथकृतौ मीमांसानयविवेके सप्तमस्याध्यायस्य.........थः पादः ।

Author—Same as No. 673, DCSMMPL.

Remarks—The meaning of verbs as well as units and their exceptions are explained here exhaustively. This Ms. comprises only the first seven chapters out of twelve.

---

## ॥ नयविवेकः ॥

## No. 433. NAYAVIVEKA.

C. O. L. No. 935.

Substance—Palm leaf. Size—19¾" × 2". Leaves—122. 10 lines per page and 72 letters per line. Script—Malayaḷam. No. of Granthas—5490. Incomplete.

Owner—Śūran Kaṇḍan Nambūri.

Subject—Same as No. 673. DCSMMPL.

Beginning :

श्रीगणपतये नमः । ओम् ॥

यज्ञकर्म । अत्र निबन्धने विकृतप्रयोग ऊह इत्युक्तम् । ननु ऊहनमूहः तर्को विमर्शो विचारः । प्रमाणेतिकर्तव्यतेति यावत् । ज्ञानमेव तत् । न प्रयोगप्रकारः । तदुक्तं न्यायदर्शने—तत्त्वप्रमाणविषययुक्तायुक्तविचारात्मा प्रमाणम् । युक्ते तत्त्वे प्रवर्त्तमानमनुजानन्ननुगृह्णाति । तदनुगृहीतं प्रमाणं तत्त्वनिश्चयाय कल्पत इति । एवञ्च प्रमाणविषयविवेकपरं ज्ञानं तर्कः न स्वतः प्रमाणम् इत्युक्तम् । पूजितश्च तर्को मीमांसेोच्यते । पूजा च तस्य वेदेतिकर्त्तव्यतात्वात् । अत एव कर्ममीमांसा ब्रह्ममीमांसा चोच्यते । तदुक्तम्—'धर्मे प्रमीयमाणे हि वेदेन करणात्मना' इति ॥

End :

ननु स्थित एव सामान्यस्य विशेषेण बाधः । .........तन्त्रे हि सा.................त्येतावतैव बाध्यम् । इह तु विलम्बे सामान्यप्रवृत्तिद्वारन्यायहानमेवेति न्यायबाधगीः । द्रव्यं स्वकालमङ्गमाङ्गिप्रयोगभेदे स्थितेऽप्याधान.........दुपेत्य

Colophon :

इति नयविवेके एकादशस्य द्वितीयः पादः ॥

Author—Same as No. 673, DCSMMPL.

Remarks—The Ms. embodies a commentary on Jaimini Sūtras extending from the 9th chapter

up to a portion of the 3rd *pāda* of the 11th. An independent explanation of Jaimini's aphorisms is aimed at herein with copious illustrations from Veda, Śābarabhāṣya, Tantravārtika etc.

---

## ॥ नयविवेकः ॥

## No. 434. NAYAVIVEKA.

C. O. L. No. 2177.

Substance—Palm leaf. Size—13″ × 1″. Leaves—85. 6—7 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Owner—Kandan Govindan Vāryar.

Subject—Same as No. 673, DCSMMPL.

Beginning:

मत्वा गुरुः सप्तदशमर्थमाह । मन्दताचोदितानुवादमात्रपरत्वात् वाक्यान्तरार्थार्थत्वादथपदमात्रदोपपरत्वादतःपदस्यालौकिकार्थताननुकीर्तनात् । अत उक्तम्—अथात इत्येतस्मिन् पदद्वये अलौकिकार्थाशङ्कानिवृत्तिः प्रयोजनमिति नाध्याहारादिभिरेषां कल्पनीयोऽर्थ इति । अस्यार्थः—शब्दशक्तिर्न कल्प्या । न त्वध्याहारादि सूत्रे वार्यते । न चैतावन्मात्राच्छङ्का न निवृत्तेत्येतावता नास्य निवृत्त्यर्थता । शङ्का चेत्थम्—स्वाध्यायाध्ययनविधेराचार्यकविध्यधिकारपरत्वेनाध्ययनस्यानर्थपरत्वादविवक्षितार्थो वेद इति ।

End :

राद्धान्तस्तु—कर्तृस्मृतिः साक्षान्नास्ति । मानान्तरावेद्ये चार्थे नानुमानार्हः कर्ता । समाख्यास्मिन्नेव विषये प्रवचनात् सामर्थ्यात् प्रकृष्टं वचनं कस्यचिदेव क्वचिद्‌दृश्यतेऽपीत्यसाधारण्यान्निर्देशः । प्रावाहणिरित्याद्यन्यार्थे गुणवाददर्थे लक्तकदिकारादिस्वीकारो लक्ष्यतेऽर्थवादपादे । यद् भाष्ये वक्ष्यमाणं व्याहृतं वक्ष्याम इत्येव नोक्तं, तदसम्बन्धार्थमेवमाद्युन्मत्तवाक्यतुल्यमस्त्वित्युपन्यस्य निरस्यमिति गुणवादव्याहृतिः । अपिचाविगीतः सुहृदुपदेश इत्यादि भाष्यं तत्सर्वविपर्ययात् चोदनाप्रामाण्यदार्ढ्यार्थम् ।

Colophon :

इति महोपाध्यायश्रीभवनाथमिश्रकृते मीमांसानयविवेके प्रथमस्याध्यायस्य प्रथमः पादः ।

Author—Same as No. 673, DCSMMPL.

Remarks—Since Bhavanātha is referred to in Bhāṭṭadīpikā, he must have flourished much earlier than Khaṇḍa Deva. The front Fol. is missing.. The following verse occurs after the colophon :

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकवरीभारमंसे वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥

## ॥ नयविवेकव्याख्या ॥

No. 435. NAYAVIVEKAVYĀKHYĀ.

C. O. L. No. 322 A.

Substance—Paper. Size—11″ × 8½″. Pages—177. 20 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—2200.

Owner—C. O.

Subject—Elucidation of the Nayaviveka.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अनुमानम् ।

सूत्रव्याख्यापरत्वप्रकारं भाष्यस्याह—प्रत्यक्षलक्षणमित्यादि । नाप्रत्यक्षस्यापि व्यभिचारशङ्कानिवृत्तिसमर्थं लोकप्रसिद्धमेव स्वरूपं सूत्रकारेण दर्शितम् । नाप्रसिद्धमित्यन्यदपि तत्तुल्यम् । तात्पर्यविषयतया तत्सूत्रेणैव गमितमिति तद्व्याख्यैवेत्थं क्रियत इत्यर्थः । स्यादेवं सूत्रार्थविवरणार्थता । यदि लोकप्रसिद्धेरेव सूत्रोक्तिप्रयोजकत्वं नियतं स्यात् । तदेव कथमित्यत्राह—लोकसिद्धेरिति ।

End :

यद्यन्तरेणैव बाह्यं पटं वासनामात्रनिमित्तः पटप्रत्ययः इत्याश्रियेत, तदा शब्दमात्रात्तन्तूपादानादिस्मृतेर्वासनोद्बोधकालेऽपि पटोत्पत्तिर्धीबाह्यतन्तूपादान इव स्यात् । तदभावाद् बाह्योत्पत्तिरेवावगम्यते । अन्यथोद्बोधकवैलक्षण्यकल्पनापत्तेर्निर्मूलैवेति प्रतीत्यनुसारेभ्युपगमो युक्तः । न तदनादरेणेत्यर्थः । वादद्वयप्रसारितमर्थमुपसंहरति—एवञ्चेति ।

Colophon :

शून्यवादः समाप्तः ।

हरिः । श्रीगणपतये नमः । नारायणाय नमः ।

॥ नमः शिवाय ॥

Author—Ravideva.

Remarks—The title is not in keeping with the theme of the work. The Śūnyavāda on the Pratyakṣasūtra is alone extant in this Ms. The diction is extremely bombastic. The work is published as No. 12 in MUSS. wherein the author's name is given as above. In the printed text Anumānavāda commences after Śūnyavāda, contrary to the arrangement herein.

---

## ॥ नयविवेकव्याख्या ॥

### No. 436 A. NAYAVIVEKAVYĀKHYĀ.

C. O. L. No. 2444 A.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—75. 8—9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—2416. Incomplete.

Owner—Nārāyaṇan Nambūri, western Manayathattu Illam, Talayolapparampu.

Subject—Same as No. 435.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ओम् ।

संसिद्धगुरुभावस्य भवस्य पदगोचरे ।
निवेशयन् वाङ्मनसे सुकृती स्यामहं चिरम् ॥
ग्रन्थेऽल्पे विततेऽर्थे व्याख्या नो चेच्छ्रुतैषिणः केचित् ।
गुरुकुल एव जरेयुः श्रुतमर्थं विस्मरेयुर्वा ॥

ननु 'गणाधिपं प्रह्वान् वन्दे' इत्येतद् वाचिकवन्दनं किं स्वार्थं क्रियते उत परज्ञापनार्थम् । किमुभयथापीति चेत् स्वार्थवन्दनत्वे अन्यं प्रति ज्ञापकत्वाभावात् किमर्थमिति तस्यापेक्षाभावादपेक्षितत्वसमर्पकतया 'कर्तुं गुरुनये कृति'मित्यस्य नान्वयापत्तिः । ज्ञापकत्वपक्षे तज्ज्ञापनानर्थक्यम् । शिष्याणामपि तत्क्रियानियमार्थमर्थवदिति चेत्, तर्हि लाघवात् स्वकीयस्य वाचिकवन्दनस्य ग्रन्थनिर्देशमात्रं करणीयम् ।

End :

अतस्तदर्थशास्त्रादेरभिधानशक्तिपरता नास्तीति निश्चयः । न त्वभिधानशक्तिता न विनियोग इति निश्चयः । विनियोगचिन्तेयमिति नाप्रसक्ता तृतीये युक्ता । इह स्थितेऽर्थपरत्वे लिङ्गाद् विनियोगस्तृतीये वक्ष्यते । उक्तयुक्तेश्च सर्वत्राविवक्षितार्था मन्त्रा इति युक्तम् । लिङ्गविनियोगस्तु तदर्थाद्यनवरुद्धे न युक्तः । वाक्यानियमादीनामर्थाविवक्षायामुपयोगः न लिङ्गादपि नियोगे । राद्धान्ते नाधिकम् । भाष्ये तदर्थाद्युपेक्ष्य देवताभिः सल्लापे न दृष्टमित्युक्तम् । अर्थधीरिवनास्ति दूरे विवक्षेति वक्तुं परिवृतं न सल्लापपरवाक्यं यागसाधनस्मृतिपरम् । तद्धीरस्त्येवेति जर्भरीत्यादेरर्थधीरुपायवतामस्त्येवेति ।

Colophon :

इति नयविवेके प्रथमस्याध्यायस्य द्वितीयः पादः ।

Author—Same as No. 435.

Remarks—Only two *pādas* of the 1st chapter are commented upon herein.

---

## ॥ जीवरक्षा ॥

No. 436 B. JIVARAKṢĀ.

C. O. L. No. 2444 B.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—6. 9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—202. Complete.

Owner—Same as No. 436 A.

Subject—Same as No. 663, DCSMMPL.

Beginning :

हरिः । श्रीगणपतये नमः ।

प्रभाकरगुरोर्भावं परिभाष्याभिधीयते ।
मीमांसाजीवरक्षेयं क्षणिकत्वनिराक्रिया ॥

अत्र सुगतमतानुसारिणः क्षणभङ्गिनः सर्वानेव भावानभिदधति । किं पुनस्तेषां तत्र प्रमाणम् । न तावत् प्रत्यक्षं क्षणिकतामीक्षितुं क्षमते । स्तम्भादिभावविषये निपुणतरं निरीक्षमाणस्य क्षणिकत्वाध्यवसायाभावात् ।

End etc.—Same as No. 663, DCSMMPL.

## ॥ वाक्यार्थमातृकावृत्तिः ॥

No. 436 C. VĀKYĀRTHAMĀTṚKĀVṚTTI.

C. O. L. No. 2444 C.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—25. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—900. Incomplete.

Owner—Nārāyaṇan Nambūri, Anchal.

Subject—The principles of Mīmamsā enunciated by the school of Guru.

Beginning:

गम्भीरविततमर्थं वाचा संक्षिप्तया निबद्धमपि ।
न विदन्ति ये समग्रं कृपया तदनुग्रहः क्रियते ॥

तत्र कार्यवाक्यार्थवादिन एव भावं भावनामपूर्वं च वाक्यार्थान् प्रतिजानते । तत्रापूर्वमेव वाक्यार्थ इति साधनीयम् । तस्य मूलं पदानामन्विताभिधायितेति तामेव तावदादौ परिशोधयति । अत्र ये प्रत्यस्तमितपदविभागं वाक्यमेव वाक्यार्थस्य वाचकमित्याचक्षते । ये च वाक्यान्त्यवर्ण एवेति । ये च पदैरनन्विताः पदार्थाभिहिताः परस्परान्वयमात्मनोऽवगमयन्ति इति । तन्निरासाय प्रतिजानीते—

पदेभ्य एव वाक्यार्थप्रत्ययो जायते यथा ।
तथा वयं निबध्नीमः प्रभाकरगुरोर्मतम् ।

End :

आगमसन्निधिहीनस्यापि उत्पन्न ... ... .....
परतन्त्रतया भानादेव सम्बोधनविलक्षणः सम्बन्धः कल्पितः समवायपदवाच्यः । समवायश्च स्वयमनाश्रित एव स्वभावात् स्वतन्त्रपरतन्त्रयोः समवायिनोराश्रयाश्रयिताहेतुः । अत एव यावत् समवायकल्पना न जाता, तावन्नेह गोत्वमिति धीरित्युक्तम् । भिन्नोऽप्यवयवी न द्विधा .... .... ....

Colophon :

इति श्रीमहोपाध्यायशालिकनाथमिश्रविरचितायां वाक्यार्थमातृकावृत्तौ उपोद्घातपरिच्छेदः प्रथमः ।

Author—Sālikanātha.

Remarks—Same as No. 359 b.

---

## ॥ अङ्गपारायणम् ॥

## No. 436 D. AṄGAPĀRĀYAṆAM.

C. O. L. No. 2444 D.

Substance—Palm leaf. Size—15″ × 1⅜″. Leaves—14. 7—9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—392. Incomplete.

Owner—Same as No. 436 A.

Subject—The application of the secondary rituals,

Beginning :

... ...क्षणा कारणामात्रादयुक्ता । अत एव चाग्नेय्य। आग्नीध्रमुपतिष्ठते" इति सत्यपि प्रकृतपरिग्रहेण... ...न्तरेणाग्नीध्र उपस्थीयते । अत एव च तत्र विधियुक्तविनियोगविरोधः । कार्यान्तरसाधनतयाग्नीध्रोपस्थाने विनियोगात् । एवञ्च स्वरूपमात्रेणावघातादिना सम्बन्धात् नापूर्वविशेषसम्बन्धसिद्धिः ।

End :

यदि देशकर्तृणां प्रयोगानुबन्धभूतानां भेदो नावसीयते । कार्ये च भिद्यमाने तु कार्ये कार्यार्थमनुष्ठानमावर्तत एव । देशादिभेदे विप्रयोगभेदावगमात् आवृत्तिरेव । अनुष्ठानस्य तु परार्थानुष्ठितस्यापि कार्यतन्त्रमित्यवगम्यते । तस्यान्यत्राप्युपकारकत्वमुपपद्यत एव इति सकृदनुष्ठानम् ।

नानाश्रमविषयमपि यन्नाविधिसिद्ध आरम्भो नापि चाङ्गानाम् ।
प्रविततगम्भीराणां पारायणमेतदाचरितम् ॥

Colophon :

इत्यङ्गपारायणे आरादुपकारकपरिच्छेदः ।

Author—Śālikanātha Miśra.

Remarks—This Ms. shows how the supplementary rituals such as Vrīhyāvahanana etc. are to be performed in connection with the sacrifice, Agnihotra.

---

## ॥ नयविवेकव्याख्या ॥

### No. 437. NAYAVIVEKAVYĀKHYĀ.

C. O. L. No. 835 A.

Substance—Palm leaf. Size—12" × 1½". Leaves—67. 10 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—1400. Incomplete.

Owner—Padmanābhan Nambūri, Ettumānūr.

Subject—Beginning: Same as No. 436 A.

End:

ननु कार्यज्ञानस्यापि करणं स्वात्मन्यन्यदेव प्रतीतं न शब्दस्य । ततश्च शब्दानुविधानाच्चेच्छब्दस्य ज्ञान(कार?)कारणत्वं कल्प्यते, तर्ह्यनन्तकार्याधिक्यार्थः प्रवर्तकत्वेनावगतस्य शब्दस्वरूपस्य वा तद्व्यापारस्य शब्दभावनापर्यायस्य प्रवृत्तिकारणत्वमेव कल्प्यते । मैवम् । स्वतन्त्रप्रवृत्ते हि नियतं कार्यं ज्ञानं कारणं तत्कारणत्व-नियतं स्वात्मन्येव प्रतीतम् ।

Colophon:

Author:

Remarks—The closing portion is missing in this Ms. The commentary covers only a portion of the text dealing with the investigation upon the divine and human elements in the Vedas. Bhavanātha Miśra, the author of Nayaviveka is also known as Bhavadeva. The Ms. is

much worn out and several leaves are lost at various places. A commentary, Nayaviveka, by Varadadeva is noticed under No. 1552, TCM. Vol. II, Part I C.

---

॥ नयविवेकव्याख्या ॥

No. 438 A. NAYAVIVEKAVYĀKHYĀ.

C. O. L. No. 1799 A.

Substance—Palm leaf. Size—$13\frac{1}{4}'' \times 2\frac{3}{4}''$. Leaves—82. 10 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—2300. Incomplete.

Owner—Maheśvaradattan Nambūrī, Tiruvalippuzha.

Subject etc.—Same as No. 435.

---

॥ नयविवेकव्याख्या ॥

No. 438 B. NAYAVIVEKAVYĀKHYĀ.

C. O. L. No. 1799 B.

Substance—Palm leaf. Size—$13\frac{1}{4}'' \times 2\frac{3}{4}''$. Leaves—67. 11 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—2100. Incomplete.

Owner—Same as No. 438 A.

Subject—Beginning: Same as No. 438 A.

End:

कथं तर्हि तदुक्तभाष्येण दूरस्थामन्नयोर्युगपच्छब्दोपलब्धिः स्यादित्यप्राप्त्यनुवादेन चोद्यत इत्याशङ्क्य तदभिप्रायमाह—प्रा-माद्यचोद्यमिति । यद्यपि ताल्वादिसंयोगाद्यतुल्यतया वायवीयाः श्रोत्रदेशगत्यापि संस्कारारम्भार्हाः, तथाप्यप्राप्त्यैवारभत इत्युपे-यम् । प्राप्तिपक्ष आमन्नश्रोत्रप्रथमसंस्कारका भूत्वानामन्नश्रोत्रसं-स्कारार्थं संस्कारकान्तरकराश्चेति द्वैविध्यकल्पनापत्तेः । तदाना-र्थमप्राप्य संस्कुर्वन्तीत्युपेयमित्यापाद्य युगपच्छ्रवणप्रसंगश्चोद्यत इ-त्यर्थः । ननूत्पत्तिपक्षे विक्रमश्रीबलादामन्नदेशो शब्दो(?)... ...

Colophon:

Author—Same as No. 435.

Remarks—Same as No. 359 b.

---

## ॥ न्यायबिन्दुः ॥

### No. 439. NYĀYABINDU.

C. O. L. No. 981.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—18. 18 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—300. Incomplete.

Owner—Raṅga Vādhyār, Kallidakuricci.

Subject—Elucidative exposition of the Jaiminisūtras.

Beginning :

श्रीकृष्णाय नमः ।

नत्वा जैमिनिमाचार्यं शबरस्वामिनं तथा ।
कुमारिलं च तद्रीत्या न्यायबिन्दुर्विधीयते ॥

अथातो धर्मजिज्ञासा ।

"स्वाध्यायोऽध्येतव्यः" इति विहितस्वाध्ययनस्य विश्वजिन्न्यायेन स्वर्गार्थत्वाद् रात्रिसत्रन्यायेन अपि......र्नमृत्युं जयतीत्यार्थवादिकापमृत्युजयार्थत्वाद्वा कर्तव्यान्तराभावात् तदनन्तरमेव गुरुगृहात्समावर्तितव्यमिति प्राप्तम् । अर्थज्ञानरूपदृष्ट(रूप-?) फले सम्भवति अदृष्टकल्पनायोगाद् अनुज्ञातस्य च विचारं विना असम्भवात् तं कृत्वैव समावर्तितव्यमिति सिद्धान्तः ॥

चोदनालक्षणार्थो धर्मः ।

End :

अध्येतृपुरुषान्तरं प्रति विधिभेदोपपत्तेः विक.........पपत्तेश्च न कर्मभेद इति सिद्धान्तः ॥

Colophon:

इति न्यायबिन्दौ द्वितीयाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

श्रीकृष्णाय नमः ।

अथातः शेषलक्षण.... । अथ कर्मभेदकथनानन्तरं शेषलक्षणम् अङ्गनिरूपणं क्रियत इति शेषः । परार्थत्वात्...... ॥

Author :

Remarks—This work on Mīmāṃsā has been

ascribed to Vaidyanātha and is quite different from the Buddhistic Nyāyabindu of Dharmakīrti (Vide P. 303 CC. Vol. I.)

---

## ॥ प्रकरणपञ्चिकाव्याख्या ॥

No. 440. PRAKARAṆAPAÑCIKĀVYĀKHYĀ.

C. O. L. No. 842.

Substance—Palm leaf. Size—14″ × 2″. Leaves—49. 10—12 lines per page and 32—48 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Owner—Hariśvaran Padmanābhan Nambūri, Ettumānūr.

Subject—A succinct exposition of Prakaraṇapañcikā of Śālikanātha Miśra.

Beginning:

... ... ... ... ... ... ... ...

... ... ...नाविधिरिति चोच्यते । तस्य खल्वर्थसंवेदफलप्रसवौ नीतमङ्गत्वस्य .... .... .... ........सामर्थ्यमुन्नेतव्यमिति लाघवम् । नन्वेवं लिङादीनां स्वाभिधैव कथमधीयते । उच्यते । यथाभिधाशब्देन स्वाभिधाप्यभिधीयते, एवं लिङादेरप्यविरोधात् तेन प्रवर्तकशब्दकृता तेनाभिहिता प्रवृत्त्यैच्छासहकारिणी अभिधा भावना विधिशब्देनोच्यते । एवंभूतया परप्रेरणयावरुद्धा समालिङ्गिता पुरुषप्रयत्नरूपार्थभावना तव्यप्रत्ययवाच्या प्रतीयते इति । ततः किमित्याह सा चेति ।

End :

तत्र प्रत्यक्षापेक्षत्वेनेतरप्रमाणानां प्रत्यक्षस्य प्रथमं लक्षणं विषयं चोक्त्वा बहूनामभिमतत्वेनानन्तरमनुमानलक्षणमवयवदूषणानि च संगृह्य श्लोकेन दर्शयति ज्ञातसम्बन्धेति । अत्रानुमानमिति लक्ष्य-निर्देशः । ज्ञातसम्बन्धस्येत्यादि लक्षणम् । सम्बन्धनियमज्ञानादेकदेशस्य दर्शनाद्धर्मिग्रहाच्च यत्पश्चाद् जायते ज्ञानं तदनुमानमित्यर्थः । तदुक्तमाचार्यैः—

"प्रत्यक्षमानादनुजायमानान्यैर्मित्रैर्धर्मिणो वा पुरस्तात् (?) ।
लिङ्गं च मित्वा प्रथमं स्वमानात्प... ॥

......स्वरूपं लोकसिद्धमुद्दिश्य तदाभाव... ... ..विवेचनार्थं लक्षणमुच्यते । तत्र "प्रमाता ज्ञातसम्बन्ध एकदेशप्रबोधयत" इति परोक्तं मा भूदिति ॥

श्रीशालिकप्रकरणव्याख्या नारायणस्य जयपुरीजनुषः ।
प्रत्यक्षपरिच्छेदः पूर्णोऽस्मिन्यावतादितः प्रारभ्य ॥
"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥
विनायकोऽम्बुजासनो हरिर्हरो हरात्मजः ।
सरस्वती रमाम्बिका दिशन्तु मङ्गलानि मे ॥"

Colophon :

शास्त्रमुखव्याख्यानं समाप्तम् ।
श्रीशालिकप्रकरणव्याख्या नारायणेन जयपुरीजनुषा ।
शास्त्रमुखस्य विलिखिता गुरुदर्शनपारदृश्वना विदुषैषा ॥

Author—Nārāyaṇa of Jayapurī.

Remarks—The front Fol. is missing Nos. 3237, TCM. Vol. IV, Part I B and 3647, TCM. Vol IV, Part I C are also commentaries on Prakaraṇapañcikā and the latter of them is entitled, Nyāyasiddhi.

---

## ॥ प्रभाकरविजयः ॥

### No. 441. PRABHĀKARAVIJAYA.

C. O. L. No. 451.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—129. 19 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1500.

Owner—C. O.

Subject—Establishment of the Prabhākara School of religion and the refutation of the others.

Beginning:

॥ श्री ॥

अथ प्रभाकरविजयः प्रारभ्यते ।

हरिः । श्रीगणपतये नमः । निर्विघ्नमस्तु ॥

यदाराधनतामेत्य कृतं कर्माधिकारिभिः ।
सर्व......विष्णुमव्ययम् ॥

विविधं वेदसिद्धान्ते विमन्यन्ते विपश्चितः ।
अतः प्रभाकरगुरोर्विजयः प्रतिपाद्यते ॥

नाथद्वयात्तसारेऽस्मिञ्छास्त्रे मम परिश्रमः ।
शुक्तिभ्रमायते सिन्धौ हरिणोद्धृतकौस्तुभे ॥

आचार्यकरणविधिप्रयुक्तमध्ययनमिति प्रतिपाद्यते । स्वविधेर्नियोज्याभावात् अध्यापनविधिप्रयुक्तेश्चोपपत्तेः । कः पुनराचार्यकरणविधिः ।

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥

End :

अर्थादेकत्वस्य बाध इति । अथ दूरत्व......पि दोषसम्भावनया वनप्रत्ययस्य भ्रान्तत्वमिति, तर्हि अत्रापि अतिनिरन्तरतया भेदभ्रम इति सर्वं समानम् ! अन्यत्राभिनिवेशात् । किंच.............अस्तु तावदेकाकारप्रतिभासः, अस्तु तस्याः भ्रान्तत्वम् । तथाप्याकारप्रतिभासो जातिः ! जातिभागस्य पिण्डभागस्य वा द्वितीयावभास एव स्यात् न तु जातिजातिमतोरभेदावभासः । अथोच्येत, न विलक्षणाकारेण वस्तु...........प्रतीतिरेव भेदप्रतीतिः वि....

Colophon :

इति प्रभाकरविजये आत्मनिरूपणप्रकरणम् ॥

Author—Nandīśvara.

Remarks—The Ms. consists of 18 *prakaraṇas* and a fragment of the 19th. The following passage "इति नन्दीश्वरस्य प्रभाकरविजये प्राकट्यनिराकरणं प्रकरणं समाप्तम्" occurring in the middle proves that the author is none but Nandīśvara.

## ॥ प्रमाणपारायणम् ॥

### No. 442. PRAMĀṆAPĀRĀYAṆAM.

Substance—Paper. Size—13" × 8½". Pages—220. 12 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1650.

Owner—C. O.

Subject—Exposition of the Pramāṇas like Pratyakṣa etc.

Beginning:

श्रीः । शालिकनाथकृतौ प्रमाणपारायणम् ।

१—प्रमाणपरिच्छेदः

स्वरूपसंख्यार्थफलेषु वादिभि-
र्य(दो?तो)विवादा बहुधा वितेनिरे ।
अतो वयं तत्प्रतिबोधसिद्धये
प्रमाणपारायणमारभामहे ॥

किं पुनरिदं प्रमाणं नाम । न तावदविसंवादिविज्ञानं प्रमाणं, स्मृतेरपि तथाभावप्रसङ्गात् । अथ स्मृतिविकल्परू(प)तया परमार्थं सत् स्वलक्षणमगृह्णती सा वृत्तिसन्तमाकारवस्तुभूतमुल्लिखन्ती द्विचन्द्रादिबोधवत् नापि संवादिनीति मतम् । एवमप्यनुमानं न प्रमाणं स्यात् तस्यापि विकाररूपत्वात् ।

End:

नन्वेवमपि पश्चाहशब्दं हित्वा कथं पुनः ।
भाष्यकारः प्रमाणानि चित्राक्षेपं समादधत् ॥

उच्यते व्यवहारस्य हेतुभेदप्रसिद्धये ।
एवम.होभयात्मापि व्यवहारः.... ... ... ॥
प्रतीति. . .व्यवहृ.तिपञ्चस्वे.गोपलभ्यते ।
अभावव्यवहारस्तु दृश्यादर्शविमर्शजः ॥
सा हि भूभागसद्भावमात्रावच्छेदबन्धना ।
घटाभावव्यवहृति.रिति प्रागेव दर्शितम् ॥

Colophon:

इति शालिकनाथमिश्रविरचिते प्रमाणपारायणे षष्ठोऽभावनिराकरणपरिच्छेदः ।

Author—Śālikanātha Miśra.

Remarks—This Ms. has been divided into the following seven sections:

1. Pramāṇa Pariccheda
2. Anumāna Pariccheda
3. Śāstra Pariccheda
4. Upamāna Pariccheda
5. Arthāpatti Pariccheda
6. Abhāvanirākaraṇa Pariccheda
7. Amṛtakalā

Each proof is substantiated by cogent arguments.

---

॥ प्रमेयपारायणम् ॥

No. 443 A. PRAMEYAPĀRĀYAṆAM.

C. O. L. No. 843 A.

Substance—Palm leaf. Size—18½″ × 1¾″. Leaves—

24. 9 lines per page and 80 letters per line. Script—Malayaḷam. No. of Granthas—1000. Complete.

Owner — Padmanābhan Nambūri, Kallamball Illam, Eṭṭumānūr.

Subject—Establishment of the Prabhākara School of religion elucidating its views.

Beginning:

... ... ...तये नमः ।

... ...अथ नाथपादान् प्रणम्य संक्षेपेण प्रमेयपारायणम् । व्युत्पादनाय शिष्यस्य प्रक्रियते ।

द्रव्यगुणकर्मसामान्यशक्तिसंख्यासादृश्यसमवाया अष्टौ पदार्थाः । क्रमस्तु पौर्वापर्यमेव तद्व्य....नुपलम्भात् । परत्वापरत्वयोर्भेदेऽपि क्रमोऽयमित्येकबुद्धिव्यपदेशः तरुबहुत्वे वनमितिवत् पत्नीद्वित्वे पत्नीं मन्त्र...तिवद्वा समर्थनीयः । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । व्यतिरेकेण द्रव्यान्तरानुपलम्भात् । तमस्तु भाभाव एवेति वक्ष्यते ।

End:

तदा संयोगनिवृत्तिसमकालमेव विनष्टं कर्म नोत्तरसंयोगं जनयेत् । तदा विभा... ...व तस्याः स्वप्रागभावविरोधित्वात् । न च तत्साधनत्वेऽपि द्रव्यादेः क्रियानिमित्तत्वविरहादकारकत्वप्रसक्तिः । तस्या अपि कृतिसाध्यतयात्मगुणस्य यागादेरपि क्र... ...इतिवदभेदोपचारात् घटो जायते भवतीत्यादिक्रियाकर्तृभेदानिर्देशोपपत्तिः । एवञ्च विपक्षे बाधकसन्देहेन सन्दिग्ध-

विपक्षव्यतिरेकित्वात् केवलव्यतिरेकित्वाद्वा हेतोरगमकत्वे......
... ...समञ्जसम् ।

Colophon :

इति दामोदरकृतौ तर्कार्णवे प्रमेयपारायणे समवाय-पदार्थः समाप्तः । समाप्तं प्रमेयपारायणाख्यं प्रकरणम् ।

सृष्टाविद्यानिशाध्वंसिनिबन्धमयवासरम् ।
तज्जासितजगज्जाड्यं नमस्यामः प्रभाकरम् ॥

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
हृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥

नमः शिवाय ।

मया नारायणेनैतल्लिखितं मातृकागतम् ।
दीर्घोनाधिकं सद्भिः शुध्यतां यद्विमृश्य तत् ॥
सुष्ठु... ... ... ... ।

Author—Dāmodara.

Remarks—The Ms. is much damaged. No order has been maintained in the arrangement of the leaves. The author must surely be a follower of Prabhākara. Towards the close diverse themes are dealt with and they have been noticed separately. The work is a portion of Tarkārṇava.

## ॥ शकुनलक्षणम् ॥

## No. 443 B. ŚAKUNALAKṢAṆAM.

C. O. L. No. 843 B.

Substance—Palm leaf. Size—$88\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—4. 8 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—175.

Owner—Same as No. 443 A.

Subject—Elucidation of the premonitions auspicious or otherwise indicated by omensand messengers.

Beginning:

श्रीगणपतये नमः ।

अतः परं प्रवक्ष्यामि शकुनानि यथाक्रमम् ।
शुभाशुभानां कार्याणामासन्नानां भविष्यताम् ।
सूचकान्येव यानीह शकुनानि ... ....बुधाः ।
आकारगोचराण्येषां शकुनानां तु कानिचित् ॥
शाब्दानि कानिचित् तानि कीर्त्यन्तेऽस्मिन् यथा तथा ।
प्रार्थयन् यः समायाति यत् किञ्चित् साधकं प्रति ॥
स दूत इति तल्लिङ्गैः परीक्षेत शुभाशुभम् ।

End:

शुभग्रहाधिष्ठितदिक्षु सुस्वरं
शुभोदये चापि शुभोदयं फलम् ।
अतोऽन्यथा चेत् फलमन्यदुच्चकै-
र्विमिश्रके चापि विमिश्रकं फलम् ॥

कृतिशास्त्रवशाद् विविच्य मार्गं
शकुनानीह विमिश्रकीर्तितानि (?) ।
अमुनैव शुभाशुभं विदित्वा
तदधीनं विदधीत कार्यजातम् ॥

पृच्छासितोक्तप्रवरेण यत्नात्

... ... ... ...

... ... ... ...

Colophon :

Author :

Remarks—The first line of a verse is seen at the close. This composition is intended mostly for curers of poison. Two leaves towards the close contain the method of medicinal applications etc. Some remedies are expounded in Sanskrit and some in vernacular, but no inter-relation is apparent.

॥ गृह्यदीपिका ॥

No. 443 C. GṚHYADĪPIKĀ.

C. O. L. No. 843 C.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—4. 12 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—250.

Owner—Same as No. 443 A.

Subject—Exposition of Vedic rituals and their application.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ओं ।

यन्नित्यं सच्चिदानन्दमनाद्यन्तं परात्परम् ।
अप्रमेयमजं पूर्वं नौमि तद्वैष्णवं महः ॥

आचार्यं जैमिनिं नत्वा श्रीनिवासार्ययज्वना ।
वृत्तिं समीक्ष्य संक्षिप्य क्रियते गृह्यदीपिका ॥

अन्योन्यपरिहारेयं सिद्धान्तार्थसमन्विता ।
ग्रन्थार्थयोजनारूपा सुव्यक्ता बालबोधिका ॥

अथन्मध्ये(?) द्विविधानि कर्माणि गृह्ये कथ्यन्ते साग्निकान्यनग्निकानि चेति । प्रणीताग्निकानि प्रणीयमानाग्निकानि(चश्चे?चे)ति ।

End :

प्रस्तरादेकं तृणमनेन यजुषा निरस्यति । आकृष्येति तस्मादित्यनुक्त्वा प्रस्तरादिति वचनात् प्रमादात् तृणनिरसनात् प्रागेव प्रस्तरे नष्टेऽपि प्रस्तरान्तरं स्वीकृत्य मन्त्रात् तृणनिरसनं गुणभूतमिति नोपेक्षितव्यमित्यर्थः । प्रस्तं हेति अनेन यजुषा प्रस्तरमग्ना...ति वश्चाहेति प्रस्तरदहनानन्तरमनेन यजुषा तृणमग्नावनुप्रहरति । मन्त्रस्याभिचारकत्वात् तृणदहनानन्तरमप उपस्पृशेत् । घृतेहेति घृतेनाक्षा ... .... ...

Colophon :

Author—Śrīnivāsārya Yajvā.

Remarks—An eulogistic verse on Jaimini is seen in the beginning. Sacrificial rites occupy the bulk of the Ms.

---

## ॥ स्वराष्टकभाष्यम् ॥

### No. 443 D. SVARĀṢṬAKABHĀṢYAM.

C. O. L. No. 843 D.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—2. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—30.

Owner—Same as No. 443 A.

Subject—Vedic accents.

Beginning :

उदात्त एव विष्णुः विश्वहा मर्त्यः राजन्योऽन्नं कं धाताधत्त । पदादावहते तत्र स्वरितः स्याद्विभाषया । उदात्तेनैकादेशविषय उत्तरपदादिरनुदात्तो विभाषया स्वरित एव भवति । क्रीतोऽस्य । एतेऽस्य । विश्वस्मिन् सूद्गाता सेन्द्रयोनिः ।

End :

उदात्तान् कम्प इत्युक्तः कुत्रचिच्चापि दृश्यते ।
जात्योऽभिनिहतश्चैव क्षैप्रः प्रश्लिष्ट एव च ॥
एते स्वराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः ।

नित्यक्षैप्रयोर्दृढतर अभिनिहते च तैरोव्यञ्जनत्विरावविरामयो-र्मृदुतरप्रश्लिष्टपदवृत्तयोऽप्यवरोऽल्पतरः । ब्रह्मवादिनो वदन्ति—सोऽग्निः कार्योभयोऽस्मा इति ।

Colophon :

स्वराष्टकभाष्यं समाप्तम् ।

श्रीविद्व्यासाय नमः ।

Remarks—Only a fragment of Svarāṣṭaka is extant in this Ms. One side of the front Fol. is blank.

---

## ॥ भाट्टदीपिकाव्याख्या (प्रभावली) ॥

## No. 444. BHĀṬṬADĪPIKĀVYĀKHYĀ. (PRABHĀVALĪ)

C. O. L. No. 370.

Substance—Paper. Size—13¾″ × 8¼″. Pages—361. 24 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—5415. Incomplete.

Owner—C. O.

Subject—A commentary on Bhāṭṭadīpikā of Khaṇḍadeva.

Beginning :

ओं श्रीशिवः शरणम् ।

अथ श्रीबालकृष्णभट्टात्मजकविमण्डनश्रीशम्भुभट्टविरचिता श्रीखण्डदेवविरचितभाट्टदीपिकाव्याख्या प्रभावली प्रारभ्यते ।

श्रीगणेशाय नमः । श्रीशारदायै नमः । श्रीगुरुचरणारविन्दाभ्यां नमः । ओम् ।

अथ षष्ठाध्यायः प्रारभ्यते ।

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥

यो वेदशास्त्रार्णवपारदृश्वा यज्ञादिकर्माचरणेऽतिदक्षः ।
सदाशिवाराधनशुद्धचित्तः श्रीबालकृष्णं पितरं नमामि ॥

श्रीखण्डदेवं प्रणिपत्य सद्गुरुं मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ प्रभावल्यां टिप्पणमातनोम्यहम् ॥

यद्यप्यत्र गुरोः कृतावपि मयाप्युद्भाव्यते काचना-
सम्भूतिस्तदपि प्रचारचतुरे नैषा पुरोभागिता ।
किन्तु क्ष्मातिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादरा
मद्वाक्यं परिहृत्य तत्कृतिमलंकुर्वन्त्वियं मे मतिः ॥

द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः ।

पूर्वाध्यायार्थोत्तराध्यायार्थनिरूपणयोः अवसरसङ्गतिं हेतुहेतुमद्भावसङ्गतिं च दर्शयति—एवमिति । एवं प्रमाणलक्षणसापेक्षैः भेदाभेदशेषशेषिप्रयोजकाप्रयोजकैरेवं क्रमनिरूपणपरैश्चतुर्भिरध्यायैरित्यर्थः ।

तथाच वक्ष्यमाणलक्षणाधिकारविचारस्य यद्यपि लक्षणाधिकार.........अनुष्ठेयपदार्थे कोऽधिक्रियते इत्येवंरूपेण द्वितीयतृतीयसहितचतुर्थाध्यायानन्तरमेव करणमुचितम् । अत एव शास्त्रदीपिकायां भेदादिलक्षणैरेवमनुष्ठेयं निरूपिते

End :

अभिधानविशेषणमपि विशेषणमेवेत्युक्तम् । तत्र विशेषणं किञ्चिदुच्यमानविशेषणमिति । यदा तु जातिवचनः तदा प्रयोगवचनेन पशुं साधनत्वेन मन्त्रं च प्रकाशकत्वेन स्वीकुर्वता सामर्थ्यात् अनेन मन्त्रेण प्रकाशितं पशुमालभेतेति विहितं भवति । न च पश्वन्तरोपादाने तथा अनुष्ठातुं शक्यत इति अर्थाद् न छागेन पशुना यजेतेति छागपशुशब्दयोः विशेषणविशेष्यभावः सिद्धो भवतीति । अयमेव प्रकारो मूलस्थवाक्यैकवाक्यतापदेन गृह्यते । अध्यायार्थमुपसंहरति—इति निरूपित इति ।

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारावारीणधुरीणश्रीखण्डदेवान्तेवासिश्रीबालकृष्णभट्टात्मजकविमण्डनश्रीशम्भुभट्टविरचितायां स्वगुरुश्रीखण्डदेवकृतभाट्टदीपिकाया व्याख्यायां प्रभावल्यभिख्यायां षष्ठस्याध्यायस्य अष्टमः पादः समाप्तिमगमत् ।

अध्यायश्च समाप्तः ।

Author—Śambhubhaṭṭa, son of Bālakṛṣṇa and disciple of Khaṇḍadeva.

Remarks—This Ms. embodies the 6th chapter only. The portion ending with the 3rd *pāda* in the 3rd chapter has been printed in NSPB. The work is noticed as No. 859, TCM Vol. II. Part I A.

## ॥ मङ्गलटीका ॥

## No. 445. MAṄGALAṬĪKĀ.

C. O. L. No. 353.

Substance—Paper. Size—11″ × 8½″. Pages—593. 16 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—5930. Incomplete.

Owner—C. O.

Subject etc.—Same as No. 679, DCSMMPL.

Remarks—This work comprises two volumes. Two leaves are left blank after the 38th page in the 1st volume and the following topics are expatiated upon in it:

1. Śāstrārambhasamarthanavyākhyānam
2. Śyenavāda Vyākhyānam
3. Svataprāmāṇyopapādanam
4. Tatvapadasyārthavatvokti
5. Pratyakṣaparīkṣā
6. Dravyapadārthasamarthanam
7. Jātipadārthasamarthanam
8. Pratyakṣaparīkṣāpariśodhanā
9. Aṇumānavyākhyā
10. Śābdavyākhyā
11. Upamānavyākhyā
12. Abhāvavāda
13. Autpattikasūtram

## ॥ मीमांसाधिकरणसारसंग्रहः ॥

## No. 446. MĪMĀMSĀDHAIKARAṆASĀRA-SAṄGRAHA.

C. O. L. No. 1953.

Substance—Palm leaf. Size—13"×2". Leaves—63. 10—12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2100. Incomplete.

Owner—Śūram Kaṇḍan Nambūrī, Udayamperūr.

Subject—A compendium of Mīmāmsā philosophy.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

जैमिनिबादरायणशबरस्वामिशङ्कराचार्येभ्यो नमः । 'स्वाध्यायोऽध्येतव्य' इति श्रूयते । स्वाध्यायो वेदः । तत्र संशयः । किमस्य वेदाध्ययनविधेः अदृष्टार्थत्वेन वेदार्थस्याविवक्षितत्वात् तदर्थनिश्चयोपायभूतमीमांसाशास्त्रारम्भस्याविधत्वाच्च 'चोदनालक्षणोऽर्थो धर्म' इत्यारभ्य वा 'अथातो धर्मजिज्ञासे'त्यारभ्य वा 'साहाय्ये च दर्शनादि'त्यन्तमिदं वेदार्थधर्मनिश्चयोपायविचारन्यायशास्त्रम् अध्वरमीमांसाख्यं नारम्भणीयम्, उत अध्ययनविधेर्दृष्टार्थज्ञानार्थत्वाद्वेदार्थस्य विवक्षितत्वात् तदर्थनिश्चयोपायभूतमीमांसाशास्त्रारम्भस्याप्यध्ययनविधिनैवार्थाद्विहितत्वेन वैधत्वादारम्भणीयमिति ।

End:

'ज्योतिष्टोमेन वारुणेनैककपालेनावभृथमवयन्ती'त्यवभृथं विधा-

याम्नायते 'वरुणगृहीतं वा एतद्यज्ञस्य यदृजीषं यद् ग्रावाणो यदौदुम्बरीयशदधिषवणफलके तस्मिन् यत्किञ्चित्सोमलिप्तद्रव्यं तेनावभृथमवयन्ती'ति । तत्र संशयः । किमृजीषादिसोमलिप्तद्रव्यमवभृथसाधनमुत ऋजीषादिसोमलिप्तद्रव्यस्यावभृथदेशनयनं प्रतिपत्तिरिति । तत्र तेनेति तृतीयाश्रुत्यावभृथसाधनत्वावगमात् अवभृथसाधनामिति प्राप्ते ब्रूमः । सोमयागोपयुक्तसोमलिप्तद्रव्योद्देशेनावभृथदेशनयनविधानादृजीषादिसोमलिप्तद्रव्यस्यावभृथदेशन यनं प्रतिपत्तिरिति । अत्रावभृथश.... ।

Colophon :

इति चतुर्थस्य प्रथमपादः ।

Author :

Remarks—This Ms. extends nearly up to the 2nd *pāda* of the 4th chapter. Two leaves are devoted at the close to the explanation of Viṣṇu-Sahasranāma.

---

## ॥ युक्तिवर्णना ॥

### No. 447 A. YUKTIVARṆANĀ.

C. O. L. No. 690 A.

Substance—Paper. Size—13″ × 9″. Pages—8. 15 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—350. Complete.

Owner—C. O.

Subject—Beginning : Same as No. 691, DCSMMPL.

End :

संयोगवियोगावेव धात्वर्थः । व्यापारस्तु परिस्पन्दात्मा रथो गच्छतीत्यादिषु तिङर्थः । तेनाचेतनेऽपि मुख्य एव तिङर्थः । इह धातूनामेव क्रियावचनत्वात् प्रथमी परिपातीहि(?) व्यापार एव धात्वर्थः न जघन्यौ संयोगविभागौ । किञ्चानेकार्थतापद्यते । केवलस्य संयोगस्यावाच्यत्वात् संयोगजेऽपि संयोगे गच्छतीति प्रयोगादर्शनात् । विभागजेऽपि विभागे प्रयोगानुपलब्धेर्न केवलस्य विभागस्य गामिवाच्यतेति किमनेन स्वमनीषिकानिर्मितेन बालजनमनोहारिणा निबन्धेन ।

Colophon :

इति विषयकरणीया ।

Author—Same as No. 691. DCSMMPL.

Remarks—Other works by the author are the following :

1. Nyāyaratnam.
2. Prakaraṇapañcikā
3. Praśastapādabhāṣyavyākhyā. His biography is given in detail in Prakaraṇapañcikā.

---

## ॥ अङ्गपारायणम् ॥

### No. 447 B. AṄGAPĀRĀYAṆAM.

C. O. L. No. 690 B.

Substance—Paper. Size — 13″ × 9″. Pages — 39. 15 lines per page and 22 letters per line.

Script—Devanāgarī. No. of Granthas—400. Complete.

Owner—C. O.

Subject—Description of rules relating to *Gṛhya* and *Śrauta* rituals.

Beginning :

व्याख्याविकल्पसम्भवमङ्गान्यधिकृत्य संशयं छेत्तुम् ।
परमं प्रभाकरगुरोर्गम्भीरं भावमभिधास्ये ॥

इह चतुर्विधमङ्गजातं जातिगु(ण)द्रव्यभावार्थात्मकम् । तत्र भावार्थात्मकमपि द्विविधं सन्निपत्योपकारकमारादुपकारकं चेति । तत्र संनिपत्योपकारकं चतुर्विधं साध्यभूतोत्पत्तिविकृतिसंस्कृति-भेदात् । यथाक्रमं संयवनदाहनाविलयन(सौ?प्रो)क्षणादिरूपम् ।

End :

तेषां चोपदेशिकानामनार्यसम्बद्धानां चाङ्गानामनेकप्रकारसम्ब-न्धेऽपि प्रयुक्तयविशेषे तन्त्रमनुष्ठानम् । यदि देशकर्तॄणां प्रयोगानु-बन्धभूतानां भेदो नावसीयते कार्यस्य च । भिद्यमाने तु कार्ये कार्यार्थमनुष्ठानमावर्तत एव । देशादिभेदेऽपि प्रयोगभेदावगमादा-वृत्तिः स्यादनुष्ठानस्य । यस्य तु परार्थानुष्ठितस्यापि कार्यं तन्त्रमि-त्यवगम्यते , तस्यान्यत्राप्युपकारत्वमुपपद्यत एवेति सकृदनु-ष्ठानम् ।

नानाश्रमविषयाणां विधिसिद्धौ रहस्यामिवाङ्गानाम् ।
प्रविततगम्भीराणां पारायणमेतदाचरितम् ॥

Colophon :

इत्यङ्गपारायणे आरादुपकारकपरिच्छेदः ।
अङ्गपारायणं समाप्तम् ।

Author---Śālikanāthamiśra.

Remarks—This work consists of two Paricchedas, and it is a portion of Prakaraṇapañcikā.

---

## ॥ अतिदेशपारायणम् ॥

### No. 447 C. ATIDEŚAPĀRĀYAṆAM.

C. O. L. No. 690 C.

Substance—Paper. Size—13" × 9". Pages—9. 15 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—600. Incomplete.

Owner—C. O.

Subject--Elucidation of the important applications by analogy, in Mīmāṃsā.

Beginning :

अतिदेशपारायणम् ।

विकृतौ ये पदार्थानामतिदेशं न मन्वते ।
प्रकारस्योपदेशं च तेषामुत्तरमुच्यते ॥
प्राकृतेनोपकारेण पदार्थश्चैव वैकृतः ।
प्रयोगविधिना स्वेन विधिरन्वित उच्यते ॥

यद्यदाकाङ्क्षितं योग्यसन्निधानं प्रपद्यते ।
तेनान्वितो हि विध्यर्थः स्वशब्देनैव भण्यते ॥

भावरूपश्च विध्यर्थ उपकारमपेक्षते ॥

वाक्यादिभिः प्राकृतश्च स योग्यः सन्निधाप्यते ।
अन्यथानवगम्यत्वाद् यद्यद् योग्यं परस्परम् ॥

उपकारः प्राकृतोऽसौ विकृतौ सन्निधीयते ।
तथाप्यपेक्षितत्वेन प्रकारं प्रथमं विधिः ॥

स्वीकरोति पदार्थांस्तु प्रतीतानप्युपेक्षते ।

End :

कार्यवत् तदपि यतो विध्यर्थोऽन्वित उच्यते ।
उच्यते शाब्दतैव स्यान्नोपदेशप्रमेयता ॥

प्रमाणाद् धर्मभेदोऽयमुपस्थाननिबन्धनः ।
उपदेशोपस्थितो यो वाक्यार्थेऽन्वयमृच्छति ॥

स औपदेशिको ज्ञेयः स च द्वेधमवस्थितः ।
ग्रन्थेनोपस्थितश्चैव विध्यर्थोपस्थितस्तथा ।
यथोपकारः प्रकृतौ नियोज्यो वा यथाश्रुतः ॥

प्रकारोपस्थितो यश्च द्वेधा नासावुपस्थितः ।
अतोऽनौपदेशिको यः केवलं कार्यबन्धनः ॥

Colophon :

पूर्वनिबन्धनिबद्धं
व्यपनेतुं मोहमीहमानेन ।
शालिकनाथेन कृतः
कृतिनामानन्ददः परो यत्नः ॥

Author—Śālikanāthamiśra.

Remarks—The difference between the general and particular applications is set out here. The work is a portion of Prakaraṇapañcikā.

---

॥ सर्ववेदान्तसिद्धान्तसारसंग्रहः ॥

No. 447 D. SARVAVEDĀNTASIDDHĀNTA-SĀRASAṄGRAHA.

C. O. L. No. 690 D.

Substance — Paper. Size—13″ × 9″. Pages — 39. 16 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 350. Incomplete.

Owner—Muñcira Swāmiyār Maṭhom.

Subject—Exposition of the union of jīva with the supreme soul.

Beginning:

॥ श्रीः ॥

श्रीगणेशाय नमः ।

श्रीमच्छङ्करभगवत्पादप्रणीतः

सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः ।

अखण्डानन्दसम्बोधो वन्दनाद् यस्य जायते ।

गोविन्दं तमहं वन्दे चिदानन्दतनुं गुरुम् ॥

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

यदालम्बो दरं हन्ति सतां प्रत्यूहसम्भमम् ।
तदालम्बे दयालम्बं लम्बोदरपदाम्बुजम् ॥

अर्थतोऽप्यद्वयानन्दमतीतद्वैतलक्षणम् ।
आत्मागममहं वन्दे श्रीगुरुं शिवविग्रहम् ॥

वेदान्तशास्त्रसिद्धान्तसारसङ्ग्रह उच्यते ।
प्रेक्षावतां मुमुक्षूणां सुखबोधोपपत्तये ॥

End :

स एव सद्यस्तरति संसृतिं गुर्वनुग्रहात् ।
यस्तु तीव्रमुमुक्षुः स्यात् स जीवन्नेव मुच्यते ॥

जन्मान्तरे मध्यमस्तु तदन्यस्तु युगान्तरे ।
चतुर्थः कल्पकोट्यां वा नैव बन्धाद् विमुच्यते ॥

नृजन्म जन्तोरतिदुर्लभं विदु-
स्ततोऽपि पुंस्त्वं च ततो विवेकः ।
लब्ध्वा तदेतत्त्रितयं महात्मा
यतेत मुक्त्यै सहसा विरक्तः ॥

पुत्रमित्रकलत्रादिसुखं जन्मनि जन्मनि ।
मर्त्यत्वं पुरुषत्वं च विवेकश्च न लभ्यते ॥

Colophon :

Author—Śaṅkarācārya.

Remarks—Only 239 verses are extant in this

Ms. This has been printed in the Vāṇī Vilāsam Press, Śrīraṅgam.

---

॥ विमलाञ्जनम् ॥

## No. 447 E. VIMALĀÑJANAM.

C. O. L. No. 690 E.

Substance—Paper. Size—13″ × 9″. Pages—17. 12 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—130. Complete.

Owner—C. O.

Subject—Investigation on the origin of the Veda.

Beginning:

श्रीः ।

शालिकनाथमिश्रकृतो विमलाञ्जनम् ।

अपौरुषेये सम्बन्धे सिद्धे शब्दार्थयोर्द्वयोः ।
प्रामाण्यं वेदवाक्यानामिति स प्रतिपाद्यते ॥

यदि पौरुषेय एव शब्दानामर्थैः सह सम्बन्धो भवेत्, तदा प्रमाणान्तरगोचरेष्वर्थेषु पुरुषाणां सङ्केतकरणाशक्तेरपूर्वात्मनि च वेदार्थे प्रमाणान्तरानवकाशात् तत्र सङ्केताभावाद् असङ्केतिते चावाचकत्वाभ्युपगमे दुर्लभमेव प्रामाण्यं वेदवाक्यानामापद्येतेत्यर्थवानेवापौरुषेयशब्दार्थसम्बन्धप्रतिपादनयत्नः ।

तत्र शब्दार्थसम्बन्धं पौरुषेयं प्रचक्षते ।
जगदीश्वरनिर्माणं वदन्तो वेदवादिनः ॥

End :

कथं पुनरपौरुषेयत्वं वेदानाम्। पुरुषस्य कर्तुरस्मरणात्। नचानुमानमपि कर्तुरुपपद्यते । प्रमाणान्तराप्रतीते पुरुषाणां वाक्यविरचनाशक्तेः कां कामि(?)समाख्याप्रवचनकर्तृसद्भावमवकल्पयितुमलम् ।प्रवचनतोऽपि तदुपपत्तेः । मन्त्रार्थवादास्त्वान्धातणोऽर्थ(?)मवगमयितु(मी)शते ।किन्तु विध्युद्देशानुसारेण तदनुगुणमर्थमिति न सिद्धार्थप्रतिपादने तेषां प्रामाण्यमिति सिद्धमपौरुषेयत्वं शब्दार्थसम्बन्धस्येति ।

दुस्तर्कतिमिरं भेत्तुं शिष्याणां दृष्टिरोधकम् ।
इदं शालिकनाथेन विहितं विमलाञ्जनम् ॥

Colophon :

इत्युपाध्यायशालिकनाथमिश्रविरचितं विमलाञ्जनं समाप्तम् ।

Author—Śālikanātha Miśra.

Remarks—A thorough investigation on the origin of Veda is attempted herein as to whether it emanated from man or otherwise and its divine source is established. The subject is dealt with here in a masterly manner.

## ॥ वाक्यार्थमातृकावृत्तिः ॥

No. 448. VĀKYĀRTHAMĀTṚKĀVṚTTI.

C. O. L. No. 685.

Substance—Paper. Size—$8\frac{3}{8}'' \times 13\frac{1}{4}''$. Pages—98. 15 lines per page and 44 letters per line. Script—Devanāgarī. No. of Granthas—1100. Complete.

Owner—C. O.

Subject—Beginning: Same as No. 436 C.

End:

लक्षणानभिमानस्तु मुख्यार्थानवधारणात् ।
ये तु मुख्यार्थकुशलास्तेषां लाक्षणिकत्वधीः ॥

इति मुख्यमर्थान्तरमविविञ्चन्तो लाक्षणिकमप्यर्थं श्रौतमिव मन्यन्ते म्लेच्छा इव यववराहाद्यर्थं(?) विवेकिनां तु परीक्षकाणां लाक्षणिकत्वधीरिति ।

उपसंहरति—

तस्मान्मानान्तरावेद्यं कार्यमर्थान्तरान्वितम् ।
वेदवाक्यं ब्रवीतीति संक्षेपोऽयमुदाहृतः ॥

ग्रन्थस्य वक्तुः संज्ञां प्रयोजनं चाह—

वाक्यार्थमातृकेयं प्रभाकरमतानुसारेण ।
अनल्पुबोधनाल्पा शालिकनाथेन संगृही...(?)॥

सच्चरितानामनुग्रहार्थमपि ...तुकामेन ।
वाक्यार्थमातृकाया वृत्तिरियं शालिकेनैव ॥

Colophon :

इति श्रीमहोपाध्यायशालिकनाथमिश्रविरचितायां वाक्यार्थमातृकावृत्तौ द्वितीयः परिच्छेदः ।

समाप्तश्चायं ग्रन्थः ।

Author—Same as No. 436 C.

Remarks—The close of the Ms. proves that both the text and the vṛtti are the productions of the same individual.

---

## ॥ विधिरसायनम् (सुखोपयोजिनीसहितम्) ॥

No. 449 A. VIDHIRASĀYANAM
with the commentary, Śukhopayojinī.

C. O. L. No. 2171 A.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—57. 12 lines per page and 54 letters per line. Script—Grantha. No. of Granthas—2308. Incomplete.

Owner—Cidambara Aiyer, Sucīndram.

Subject : Beginning—Same as No. 695, DCSMMPL.

End :

एवं तर्हि गर्दभरशनाग्रहणे तत्तत्पुरुषबुद्ध्याक्षिप्तध्यानादितीति तुल्यमत एव वैकृतः सौर्यादिविधिः प्रकृतिद्रव्यतदवधाता... ...
... ... ... ... ।

Colophon :

इति श्रीमदद्वैतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौस्तुभविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ विधिरसायनसुखोपयोजिन्यामपूर्वविधिलक्षणाक्षेपः समाप्तः ।

Author—Remarks : Same as No. 695, DCSMMPL.

---

## ॥ अष्टाध्यायी (सवार्त्तिका) ॥

### No. 449 B. AṢṬĀDHYĀYĪ with Vārtikā.

C. O. L. No. 2171 B.

Substance—Palm leaf. Size—14" × 1¾". Leaves—33. 12 lines per page and 54 letters per line. Script — Grantha. No. of Granthas — 1377. Complete.

Owner—Same as No. 449 A.

Subject etc.—Same as No. 701, DCSMMPL.

---

## ॥ विधिविचारः ॥

### No. 450 A. VIDHIVICĀRA.

C. O. L. No. 11 A.

Substance—Paper. Size—11½" × 8½". Pages—42. 20 lines per page and 20 letters per line.

Script—Malayāḷam. No. of Granthas—420.
Incomplete.

Owner—C. O.

Subject—Substantiation of the Vedic sentences as formulas.

Beginning:

...तापि देवता ग्राह्या उपपत्तेस्तृतीयार्थोऽविवक्षितः। स ब्राह्मणेन वि(वि?)व्रियते। तथाहि मूलमूलिभावोपपत्तिः। तस्मादणतिग्निर्हि- समूर्या(?) न च स्वभावहानिः। मन्तस्यादिवान्। न व्युपि किञ्चि- त्तन्तु....यात्(?)। ननु ब्राह्मणदासीये सूर्यवन्न मुख्याभावे तदपि ग्राह्यम्। नचानन्वयः। नन्वेवं न किञ्चिदुक्तं स्यात्। मैवम्। सामान्यस्योक्तत्वात्। ननु सामान्यमपि लिङ्गादिभिर्विशेष्यते। न। असम्भवात्। न ह्यन्नपते इत्यत्र किञ्चिल्लिङ्गमनुवेदं कस्यचित् प्रकरणे पठ्यते। यद्यपि पठ्येत, तथापि न देवताविशिष्टान्न- पतिर्वा। अन्नपतिरसौ दृशेऽहम् इति ब्राह्मणव्याक्रिय(ता? या)विशे- षसिद्धिरिति। सत्यम्। मन्त्रोपबृंहणमात्रमेतदीर्यते। तस्मिन् यत्कि- ञ्चिदभिधेयम्। अत्रोच्यते। नायं मन्त्रः। सामान्यश्रा.......... वचनविशेषस्य विद्यमानत्वात्। इति सामान्यवाचिप्रकरणम्।

End:

किञ्च यो हि क्रियाणां विधिः 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'आग्नेयमग्नीषोमीयमि'ति। सोऽपि देवतादिष्वेवोपपद्यते। मन्त्रमूलत्वान्मन्त्रप्रसिद्धदेवतोद्देशतोपपत्तेश्च। तथैवाङ्गविधयोऽपि भवेयुः। तद्वपङ्च (?) समिदादिविधीनामपि देवतापर्यवसायित्वात् तदवस्थायामपि (मन्त्रो देवतापर्यवसायित्वात् तदवस्थायामपि?)

मन्त्रो देवतामभिपतेदिति । नच वाच्यार्थमात्रपरिग्रहे प्रधानदेवता-(देवतायाः?)न्वयो भवति । देवतासु तूपरि गृह्यमाणासु तासां महाभाग्याविशेषेण गुणप्रधानभावासम्भवादनेकरूपता कर्मणः प्राप्नुयादिति । यतस्तासामङ्गानां परिगृह्यमाणानां देवतानामेकस्यां प्रधानायां देवतायां निष्ठोपलभ्यते । ते देवाँ इहावह । पि... ।

Colophon :

Author :

Remarks—Both the beginning and end are missing. The essentiality of Darśapūrṇamāsa is laid stress upon here after disclosing the mutual harmony of the sentences of the Brāhmaṇa and Mantra. The first 8 lines deal with an entirely different topic. Liṅgasvarūpa and Śaktisvarūpa are described from the *yoga* point of view which are some of the other digressions the writer makes in this Ms. Copious quotations are cited in the course of the work. The author's identity is not certain. Scribal errors are seen frequently in the Ms.

---

## ॥ शैवानुष्ठानविधिः ॥

### No. 450 B. ŚAIVĀNUṢṬHĀNAVIDHI.

C. O. L. No. 11 C.

Substance—Paper. Size—11″ × 9″. Pages—7, 20

lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—70. Incomplete.

Owner—C. O.

Subject—Application of the Śaiva Mantras.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
शिवमस्तु । शैवानुष्ठानविधिः ।

प्राङ्मुख उपविश्य गुरुवन्दनाद्यनन्तरं पाशुपतास्त्रेण साङ्गुलिकरशोधनपूर्वं तालत्रयादि विधाय देहशुद्धिं लिपिन्यासं गणपतिन्यासं च विधायाङ्गुष्ठादिन्यासपूर्वकं त्रिवारं लिपिन्यासं कृत्वा नवग्रहादिन्याससमाचरेत् ।

ओं ह्रीं क्षं ळं हं सं पं शं मरतकवर्णाय केतवे नमः ।
ओं ह्रीं वं लं रं यं गोमेदकवर्णाय राहवे नमः ।
ओं ह्रीं मं भं बं फं पं नीलवर्णाय शनैश्चराय नमः ।
ओं ह्रीं नं धं दं थं तं (वि? वै)द्युतवर्णाय बृहस्पतये नमः ।
ओं ह्रीं णं ढं डं ठं टं कुलिशवर्णाय बुधाय नमः ।
ओं ह्रीं ञं झं जं छं चं पुष्परागवर्णाय शुक्राय नमः ।
ओं ह्रीं ङं घं गं खं कं वैडूर्यवर्णायाङ्गारकाय नमः ।
ओं ह्रीं अः अं औं ओं ऐं एं ॡं ऌं मुक्तावर्णाय सोमाय नमः ।
ओं ह्रीं ॠं ऋं ऊं उं ईं इं आं अं माणिक्यवर्णाय सूर्याय नमः ॥

End:

अग्निमीडे मही द्यावापृथिवी इति न साध्यवदिन्द्रस्य बहुरासि । कृटोऽसि सुजिह्वमित्यादिवत् ततो मन्त्रेषु क्वचिदग्न्यादिप्रसङ्गे

देवतायामेव प्रतिपत्तिर्युक्ता । अपिच व्यवहारे तु कात्स्न्र्य-व्युत्पत्तिः शास्त्रतो व्युत्पत्तौ च तद्रूढिव्यवहारवासना प्रचयो वा विशेषः । येन व्यवहारे तदङ्गेषु नित्यापि देवतात्मा

Colophon :

ആയിരത്തി ഒരുനൂററിഒന്നാമാണ്ടു് കന്നിമാസം...............

ആയിരത്തി ഒരുനൂററിഒന്നു് ചിങ്ങം ൯-ാംതീയതി ൩൦ വശം ഉള്ളതു് ഒന്നു്. ആയിരത്തി ഒരുനൂററിഒന്നാമാണ്ടു് ചിങ്ങം ൻ-ാംതീയതി ൩൭ വശം ഉള്ളതു് ഒന്നു്.

Author :

Remarks—The *mantras* used for the worship of Lord Śiva are elucidated in this work. Its author is not known. The propitiation of Lord Śiva is succinctly recounted in a few leaves at the front.

## ॥ वैशेषिकादिमतनिरूपणम् ॥

No. 451. VAIŚEṢIKĀDIMATANIRŪPAṆAM.

C. O. L. No. 331.

Substance—Paper. Size—13¼" × 8¼". Pages—9. 19 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas — 100. Complete.

Owner—C. O.

Subject—The Mīmāmsā system of philosophy.

Beginning :

द्वेधैव वैशेषिकनामकं च
    नैयायिकं चेति हि तर्कशास्त्रम् ।
द्विमानमाद्यं कृतवान् कणाद-
    श्चतुष्प्रमाणं परमक्षपादः ॥

प्रत्यक्षमप्यनुमितिर्द्वयमेव मानं
    शब्दस्तु वक्तृधिय एव हि लिङ्गभूतः ।
वैशेषिकस्य सुगतात्तु विशेष एष
    ईशस्य बुद्ध्यनुमितेर्निगमः प्रमाणम् ॥

अत्र खलु द्रव्यगुणौ कर्म च जातिर्विशेषसमवायौ ।
इति षड् भावपदार्थाः सप्तममिच्छत्यभावभावमपि ॥
द्रव्यं गुणाश्रयं स्यात् क्षितिजलतेजःसमीरगगनानि ।
कालदिगात्ममनांसीत्येवं द्रव्याणि नवविधान्येव ॥

End :

वेदे स्वतःप्रमाणे तत्सिद्धिस्त्वीश्वरोऽत्र मत एव ।
विधिवाक्यैरैक्यं वदन्ति मन्त्रार्थवादनामानि ॥
स्मृत्यादिकमार्षवचोमूलाम्नायानुमानतो मानम् ।
धर्मे प्रमाणचिन्ता सेयं प्रथमे प्रपञ्चिताध्याये ॥
भेदोऽङ्गता प्रयुक्तिः क्रमोऽधिकारोऽतिदेशसामान्यम् ।
तस्य विशेषश्चोहो बाधस्तन्त्रं प्रसङ्ग इत्यर्थाः ॥
यागे च देवतासावुद्दिश्येत्येव सा(न)फलदात्री ।
कर्मादृष्टादेव तु फलसिद्धिरिहेति पूर्वमीमांसा ॥

Colophon :

श्रीषण्मुखाय नमः ।

Author :

Remarks—This treatise is in verse. The whole text comprises 73 *ślokas* in Āryā metre.

---

## ॥ शास्त्रदीपिकाव्याख्या (न्यायकर्पूरवर्तिका) ॥

## No. 452. ŚĀSTRADĪPIKĀVYĀKHYĀ.

### Nyāyakarpūravartikā.

Substance—Paper. Size—13½" × 8½". Pages—561. 20 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—7500.

Owner—C. O.

Subject—Elucidative exposition of the Śāstradīpikā.

Beginning :

..णादीनि जुहोतीत्यादीनीत्यर्थः । आदिपदात् स्तौतिशंसत्यादिग्रहः । ननु सर्वत्र भावनावाचकस्य प्रत्ययस्यैक्यान्न शब्दान्तरोदाहरणसंभव इत्यत आह—तत्र हीति । प्रत्ययैक्येऽपि धातुभेदाद् धातुप्रत्ययसमुदायात्मकान्याख्यातानि मिथो भिद्यन्त इति न शब्दान्तरोदाहरणसंभव इति भावः । अनुरञ्जकस्य स्वार्थाभिधानद्वारानुरज्यभावनाभेदप्रतीत्यर्थत्वादपर्याया धातव एव शब्दान्तर इत्येके । ननु भिन्नानामपि भावनानां प्रयोगवाक्यैनैकफलात्ययान्नानेकापूर्वकल्पनेति शङ्कामपनयन् व्याचष्टे—फलेति ।

End :

अस्ति प्रकरणविशेषः । सवनीयस्य प्रकरणे पशुधर्माः समाम्नाता इति भाष्यविरोधश्चेत्याह—ये त्विति । ननु समिदादीनाम् अवान्तरप्रकरणाङ्गीकारे ह्यव्यक्तदेवताङ्गत्वात् सौमिकधर्मातिदेशः स्यात् । अतः सूत्रभाष्ययोः प्रकरणपदं सन्निधिपरं व्याख्येयमित्याशङ्क्य पितृयज्ञप्रतिबन्द्या समाधत्ते—यच्चेति । .... ...व्यक्तत्वं नाम नोत्पत्तिवाक्यानवगतदेवताकत्वमुपांशुयाजेऽतिप्रसङ्गात् । किन्तु तद्धित? चतुर्थमन्त्रालिङ्गान्यतमेन स्वार्थप्राप्तदेवताकत्वम् । यद्यपि सोमस्यैन्द्रवायवं गृह्ण... ... ।

Colophon :

इति श्रीदन्तिद्योतिदिव्यप्रदीपाङ्कविश्वामित्रवंशमुक्ताफलसर्वतन्त्रस्वतन्त्रसर्वक्रतुविश्वजिदातिरात्रयाजिसत्यमङ्गलरत्नखेट श्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतौ शास्त्रदीपिकाव्याख्यायां न्यायकर्पूरवर्तिकाख्यायां तृतीयाध्यायस्य पञ्चमः पादः ।

Author—Śrī Rājacūḍāmaṇi Dīkṣita, son of Śrīnivāsadīkṣita and Kāmākṣī and disciple of Ardhanārīśvaradīkṣita.

Remarks—This commentary extends up to the 18th *Sūtra* in the 6th *pāda* of the 3rd chapter. It opens with the 2nd *pāda* of the 2nd chapter. A gap occurring in the middle of the original has been noted here. The close of the first *pāda* has been repeated in the 2nd.

The work is noticed under No. 449, DCSM. Madras. Vol. IX, and No. 1955, TCM. Vol. III. Part I A.

---

## ॥ शास्त्रदीपिकाव्याख्या (प्रभामण्डलम्) ॥

No. 453. ŚĀSTRADĪPIKĀVYĀKHYĀ.
(Prabhāmaṇḍalam.)

C. O. L. No. 319.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—465. 20 lines per page and 18—20 letters per line. Script—Devanāgarī. No. of Granthas—5500. Incomplete.

Owner—C. O.

Subject—Explication of the Śāstradīpikā.

Beginning:

श्रीः । प्रभामण्डलं शास्त्रदीपिकाव्याख्यानम् अनुभवानन्दविरचितम् । प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायप्रथमपादैकदेशान्तम् ।

...गणेशनृत्तेशसाम्बदक्षिणदिङ्मुखम् ।
वाग्देवीं जैमिनिं व्यासं शबरस्वामिनं तथा ॥
नत्वा कुर्वे महाशास्त्रदीपिकायां यथामति ।
प्रभामण्डलनामानं ग्रन्थमर्थप्रकाशकम् ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां, तस्मादनित्यमुच्यते ।

"अथातो धर्मजिज्ञासा" इति सूत्रार्थकथनपूर्वकमर्थवादादिप्रामाण्यविचारस्य त्रिपाद्यां करिष्यमाणस्य शास्त्रे सङ्गतिं दर्शयति—अथात इति । अथ वेदाध्ययनानन्तरम् अतः अध्ययनस्य सिद्धत्वात् तद्धेतुको धर्मविचारः कर्तव्यः । यथा सुभिक्षोऽयं देशः, अतोऽत्र वसामीति सुभिक्षहेतुको वासः क्रियते, तद्वत् तथाच वेदाध्ययनानन्तरं धर्मविचारः कर्तव्य इति श्रौतस्मार्तविचारः प्रतिज्ञातो भवति ।

End :

साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक् ।
सकर्मकः स धातुः स्यात्पारम्पर्ये त्वकर्मकः ॥

इति ।

सेयं भाव्यकरणरूपांशकद्वयपरिपूर्णा सती भावना कथं भावयेदितीतिकर्तव्यतामपेक्षते । सर्वकरणानामुपायाननुगृहीतानां करणत्वानुपपत्तेः । सा चेतिकर्तव्यता शास्त्रगम्या । ततः परिपूर्णत्वादनुष्ठातुं योग्येति विधीयते । तद्विधानाचार्थापत्त्या यागादिविधानमपीत्युपपन्नं भावार्थसूत्रमित्यलमतिविस्तरेण ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दपूज्यपादशिष्यश्रीमदनुभवानन्दविरचिते शास्त्रदीपिकाप्रभामण्डले प्रथमाध्यायस्य चतुर्थः पादः ।

Author—Anubhavānanda, disciple of Śrīkṛṣṇānandapūjyapāda.

Remarks—This work extends from the 2nd *pāda* of the 1st chapter to a portion of 1st *pāda*

in the 2nd chapter. A work under the same title noticed as No. 4500, DCSM. Madras. Vol. IX. But the commentary is therein attributed to Yajñanārāyaṇadīkṣita, son of Koṇḍu Bhaṭṭopādhyāya. The colophon runs thus:

इति श्रीसकलपण्डितमण्डलाखण्डलचरकूरिकोण्डुभट्टोपाध्यायतनयेन श्रीपितामहयज्ञेश्वरभट्टोपाध्यायशिष्येण कश्यपगोत्रजबह्वृचाग्रेसरेण तिरुमलयज्वप्रियसहोदरेण गङ्गाम्बिकेयेन श्रीयज्ञनारायणदीक्षितेन विरचिते शास्त्रदीपिकाव्याख्याने प्रभामण्डलाख्याने तृतीयाध्यायस्य चतुर्थः पादः ।

---

## ॥ शास्त्रमुखादि ॥

### No. 454. ŚĀSTRAMUKHĀDI.

C. O. L. No. 684.

Substance—Paper. Size—13″ × 8″. Pages — 88. 12 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—590.

Owner—C. O.

Subject—Exposition of Prabhākara's views.

Beginning:

स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्रभाकरगुरोर्दृष्ट्या मीमांसारम्भसिद्धये ॥

अत्र केचिदाहुः— न मीमांसाशास्त्रमारब्धव्यमिति । तद्धि वेदवाक्यार्थविचारद्वारभूतन्यायनिबन्धनम् । न च वेदवाक्यार्थो

विचार्यो विचारस्य विषयभूतोऽस्ति । न चामा... ...विचार्य निजानिर्जितः (?) प्रयोजनमवकल्पते । अपुरुषार्थत्वात् । पुरुषार्थत्वे हि तस्य चोदनैव प्रमाणं स्यात् । न चाविवक्षिता सा प्रमाणं भवितुमर्हति । ननु शब्दानामौत्पत्तिकत्वादर्थपरत्वस्य नाविवक्षितार्थता शक्यते वक्तुम् । शक्यमेवं वेदेनैव ।

End :

स खल्वेवं निरीक्षाश्चक्रे । अन्यथासिद्धा हि बुद्धिः सामान्यकल्पनाबीजम् । इयं तु भेदाग्रहेणापि शुक्तिकारजतप्रत्ययवदुपपद्यत इति नायं(?) सामान्यमुपस्थापयितुम् । तेन भेदग्रहणं भिन्नेषु जात्यभ्युपगमे शरणमिति निरवद्यम् ।

Colophon :

शालिकनाथेन कृता
कृतमतिना जातिनिर्णयाख्यमिदम् ।
बहुविधविवादहरण-
.... ....गुरुणावबोधेन ॥

इति शालिकनाथकृता जातिनिर्णयः ।

Author—Śālikanātha.

Remarks—The treatment of the theme is extremely laudable. The text falls into three divisions. (1) Śāstramukha (2) Nītipatha (3) Jātinirṇaya.

## ॥ संकर्षकाण्डभाष्यम् ॥

### No. 455. SAMKARṢAKĀṆḌABHĀṢYAM.

C. O. L. No. 1029.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—135. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—3350.

Owner—Rājā of Cirakkal.

Subject—Exposition of Jaimini's sūtras.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
श्रीगुरुभ्यो नमः ।

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

अथ सङ्कर्षकाण्डः प्रस्तूयते । तदनुपपन्नं व्यतिरिक्ताव्यतिरिक्तविकल्पासम्भवात् । व्यतिरेकान्तः (?) स प्रागेव तन्त्रप्रसङ्गाभ्यामेवेति चेत् । न । असाकल्यात् । तथाहुः—

"सिद्धैस्तु तैः प्रसङ्गान्तैः श्रुतियोगं प्रदर्शयन् ।
लक्षणानि श्रुतीश्चैव सङ्कृष्याधिजगे मुनिः ॥"

इति ।

End :

इदं चोत्तमं सूत्रं मङ्गलाभिधायिपदं प्रयुक्तमाचार्येण । शास्त्रस्यादिमध्यावसानेषु मङ्गलार्थपदन्यासस्याध्येतृपुरुषश्रेयोनिमित्तत्वात् । तत्रादौ अथशब्दधर्मशब्दौ मङ्गलार्थौ । मध्येऽपि

शतशो मङ्गलवादीनि पदानि विघ्नन्त इति । पदमङ्गलार्थत्वात् (?) अथवा विद्यमानस्य प्रमाणोपपन्नस्य परिग्रहार्थं यजातिसम्बन्धश्चोत्तमं पदं कथं नामाध्येतारो बहुयागसम्बन्धिनो भवेयुरिति । पशुसम्बन्धं चाधिकरणमन्ते न्यस्तमध्येतारः सम्प्रेपश्चान्त्यपदसकलशास्त्रार्थव्यवसायानुष्ठानाविर्भूते प्रतिश्रिष्टे(?) श्रेयसि रम्येरन्निति (?) ।

Colophon :

इति देवस्वामिनः कृतौ सङ्कर्षकाण्डभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । सङ्कर्षकाण्डभाष्यं च समाप्तम् । श्रीगुरुभ्यो नमः । वेदव्यासाय नमः । श्रीकृष्णाय नमः । शुभमस्तु ।

Author—Devasvāmī.

Remarks--This Ms. is identical with R. No. 2696, TCM. Vol. III. Part I C. wherein it is designated Mīmāmsāsūtrabhāṣya.

---

## ॥ संकर्षकाण्डभाष्यम् ॥

### No. 456. SAMKARṢAKĀṆḌABHĀṢYAM.

C. O. L. No. 1080.

Substance—Palm leaf. Size—6" × 2". Leaves—188. 13—15 lines per page and 21 letters per line. Script—Malayaḷam. No. of Granthas—3350.

Subject etc.—Same as No. 455.

---

## ॥ सिद्धान्तमुष्टिः ॥

## No. 457 A. SIDDHĀNTAMUṢṬI.

C. O. L. No. 1936 A.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—16. 10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 240. Complete.

Owner—Śaṅkaran Śaṅkaran Nambūri, Kumāranallūr.

Subject—A compendium of Jaimini's doctrines.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रणम्य परमात्मानं श्रीविद्यार्थस्वरूपिणम् ।
जैमिनीयन्यायमाला श्लोकैः सङ्गृह्यते स्फुटम् ॥

मीमांसाध्यायपादानां न्यायानामप्युपक्रमः ।
क्रियते येन शास्त्रार्थः सहसा स्फूर्यतेऽखिलः ॥

धर्मो द्वादशलक्षण्यां व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणाभेदशे(प)त्वप्रयुक्तिक्रमसंज्ञकाः ॥

अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहोऽन्वयश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥

विध्यर्थवादस्मृतयो नाम चेति चतुर्विधम् ।
प्रथमाध्यायगैः पादैश्चतुर्भिर्मानवीरितम् ॥

End :

अञ्जनादीनि सर्वेषां मृत्युः स्याद्विध एव हि ।
अर्थाः षोडश पादेऽस्मिन् मिलित्वा सप्तभिर्भवेत् (?) ॥

Colophon :

इति सिद्धान्तमुष्टौ द्वादशाध्यायस्य चतुर्थः पादः । समाप्त-श्चाध्यायः । सिद्धान्तमुष्टिः समाप्तः । अविघ्नमस्तु ।

ओंपूर्वायां दशाध्याय्यां मीमांसायां चतुष्पदः ।
तृतीयषष्ठदशमस्त्वष्टपादं त्रिशर्विशतिः ? ॥

अष्टत्रिंशन्नवशतं विचारांस्तेषु ... विदुः ।
षट्चत्वारिंशदग्रेऽष्टाचत्वारिंशत्परे परे ॥

शतं सप्तपञ्चाशत् तुर्ये षष्टिश्च पञ्च च ।
चतुष्पञ्चाशदन्यस्मिञ्छतं षष्ठे नवोत्तरम् ॥
तयोर्विंशतिरध्याये ... .... ... ।

नीलकण्ठेन लिखितमिदम् ।

Author :

Remarks—This work in verse is of immense utility to the students of Mīmāmsā. This is identical with No. 2967, TCM. Vol. Part I A.

## ॥ श्लोकवार्त्तिकम् ॥

### No. 457 B. ŚLOKAVĀRTIKAM.

C. O. L. No. 1936 B.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—66. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1200. Incomplete.

Owner—Same as No. 457 A.

Subject—Explication of the Mīmāmsā doctrines.

Beginning:

.... ... क्विका यच्च यादृग् ज्ञानं तथा बहिः ।
तेऽपि न ज्ञानसम्पत्त्या तथार्थं प्रतिजानते ॥

ग्राहकत्वेन विज्ञानं यथार्थं न समर्पयेत् ।
तादृशार्थः स इत्येव तेषां वाक्तदुपायतः ॥

लैङ्गिकासत्त्वमप्राप्तैरतो वाक्यार्थवादिभिः ।
ज्ञानानुभवमुत्क्रम्य बाह्य एव प्रयत्यते ॥

End:

नानध्यायः क्रतौ मन्त्रे स्यात्प्रावचनिकः स्वरः ।
भाषितो ब्राह्मणोक्तेषु मन्त्रान्ते कर्मणां कृतिः ॥

द्वादशे होमसान्तत्यमाधारे त्वाज्यसन्ततिः ।
विकल्प्यते भागमन्त्रश्चतुर्भिस्तु समुच्चयः ॥

विकल्पितौ प्रथामन्तावुद्दीपेति समुच्चयः ।
उच्छ्रयाद्याः समुच्चेया अत्र सप्तदशे मताः ॥

Colophon :

तृतीयः ।

सारस्वतसमुच्चयेदं वा? युग्मविकत्थनं वा ॥

Author—Kumārila Bhaṭṭa.

Remarks—The Ms. is bereft of its beginning and close. The first eight leaves deal with pathology, the next seventeen with a different theme and the leaves embodying legal principles are much decayed. Further, seven leaves are devoted to a philosophical subject. Śrī-kṛṣṇa's sermon to Arjuna occurs immediately after this and seven leaves describing the effects of omens bring the Ms. to a close.

---

## ॥ व्याकरणम् ॥

### ॥ उणादिसूत्रव्याख्या ॥

### No. 458. UṆĀDISŪTRAVYĀKHYĀ.

C. O. L. No. 29.

Substance—Paper. Size—13″ × 7½″. Pages—231. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—2887.

Owner—C. O.

Subject—Elucidation of the Uṇādisūtras.

Beginning:

श्रीः ।

प्रणम्य भाष्यकाराय तन्मतस्पर्शशोधिताम् ।
व्याख्यामुणादितन्त्रस्य करिष्यामि यथाविधि ॥
"कृपावाजिमिस्वादिसाध्यशूभ्य उण्" ।

डुकृञ् करणे । पा पाने । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव' इति परिभाषया विवेतरेव ग्रहणात् । 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणम्' इति कृपाइत्यस्याप्यग्रहणम् । वा गतिगन्धनयोः । जि जये । जि अभिभवे वा । उभयोरपि ग्रहणम् ।

End:

"कायातिपिवत्योः कपौ च" ।

'कै गै शब्दे' 'पा पाने' आभ्यां धातुभ्यां डप्रत्ययो भवति । तत्सान्नियोगेन कः प इत्यादेशौ भवतः ।

Colophon:

इत्यौणादिकं शास्त्रं साङ्गोपाङ्गं समाप्तम् ।
नमः शिवाय ।

इति इन्दुग्रामसमीपवर्त्यग्रहारवास्तव्येनोत्तरभेर्वभिजनेन धर्मशास्त्रपारगार्यभट्टसूनुना गार्ग्येण श्वेतवनवासिनाम्ना विरचितायामुणादिवृत्तौ पञ्चमः पादः ।

Author—Śvetavanavāsī of Gārgya family.

Remarks—This work aims at explaining with examples the changes undergone by verbal

roots on their coalescence with "उणादि" terminations.

---

## ॥ उत्तरपदत्वेवार्त्तिकक्रोडपत्रम् ॥

## No. 459 A. UTTARAPADATVEVĀRTIKA-KROḌAPATRAM.

C. O. L. No. 2433 A.

Substance—Palm leaf. Size—$10\frac{3}{8}'' \times 1\frac{5}{8}''$. Leaves—9. 11 lines per page and 48 letters per line. Script — Grantha. No. of Granthas — 300. Complete.

Owner—C. O.

Subject—A discussion on the utility of the grammatical apphorism, "उत्तरपदत्वे च—".

Beginning:

उत्तरपदत्वे चापदादिविधौ प्रत्यलक्षणप्रतिषेधः । उत्तरस्य पदत्वमित्येवं षष्ठीतत्पुरुषः । उत्तरशब्दश्च उत्तरपदपर्यायः । भीमो भीमसेन इतिवत् । स च रूढ्या समासचरमावयववाचकः । एवञ्च समासचरमावयवस्य पदत्वे कर्तव्ये लुमता लुप्ते प्रत्ययलक्षणं नेत्यर्थः । अपदादिविधाविति प्रसज्यप्रतिषेधो न पर्युदासः । पदत्वस्य पदादिभिन्नत्वाद् अपदादावित्यस्याव्यावर्तकत्वापत्तेः ।

End:

एतेन दण्डिकुलमित्यादौ व्यस्ते दोष इत्यपास्तम् । वस्तुतस्तु उत्तरशब्दो वृत्तिचरमावयवपरः । बहुसेचावित्यादौ चकारस्य वृत्ति-

चरमावयवत्वेऽपि सकारस्य वृत्तिचरमावयवत्वाभावेन तस्य पदत्व-
प्रयोज्ये सात्पदाद्योरिति निषेधे प्रत्ययलक्षणप्रतिषेधस्यैवाप्राप्त्या
वार्त्तिके अपदादिविधाविति न कार्यमित्यपरं लाघवमिति ।

Colophon :

चतुर्दशी कक्ष्या ।

श्रीगुरुभ्यो नमः ।

Author :

Remarks.—Some *Ślokas* from the Rāmāyaṇa are quoted in the first four leaves.

---

## ॥ णेरणौसूत्रक्रोडपत्रम् ॥

No. 459 B. ṆERAṆAUSŪTRAKROḌAPATRAM.

C. O. L. No. 2433 B.

Substance—Palm leaf. Size—$10\frac{3}{8}'' \times 1\frac{5}{8}''$. Leaves—22. 11 lines per page and 48 letters per line. Script — Grantha. No. of Granthas — 726. Complete.

Owner—Same as No. 459 A.

Subject—A discussion on the utility of the grammatical aphorism, "णेरणौ—"

Beginning :

श्रीगणेशाय नमः ।

इह खलु "णेरणौ यत् कर्म णौ चेत्स कर्तानाध्याने" इत्यनेन ण्यन्त-
कर्मातिरिक्तकर्मरहिताण्यन्तकर्मकाना(ख्या?ध्या)नार्थकण्यन्ताण्यन्त-

हितोत्तरवृत्तिलत्वमुद्देश्यतावच्छेदकीकृत्यात्मनेपदं विधीयत इति सैद्धान्तिकी पद्धतिः । तथाहि—'प्रत्ययग्रहणे यस्मात् स विहित-स्तदादेस्तदन्तस्य ग्रहणमि'ति परिभाषया णेरित्यनेन ण्यन्तादिति लब्धम् ।

End :

तत्रेदं वक्तव्यम्—

दर्शने साधनं कर्म स्वीकर्तव्यं मनीषिभिः ।
व्यावृत्तिश्चापि कर्तव्या प्रकृतिप्राप्तकर्मणः ॥
न शुद्धाभेदविज्ञानं प्रमाणपथमृच्छति ।
सिद्धान्तरीतिरुक्तानुसियतां तत्त्वतस्ततः ॥

तथाचाण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकाण्यन्तकर्मकर्तृकाना-ध्यानार्थकण्यन्ताव्यवहितोत्तरलकारत्वमुद्देश्यतावच्छेदकीकृत्यात्मने-पदविधानमिहेति सिद्धम् ।

Colophon :

Author :

Remarks—This work facilitates grammatical debate considerably.

---

## ॥ वैयाकरणभूषणकारिका ॥

No. 459 C. VAIYĀKARAṆABHŪṢAṆAKĀRIKĀ.

C. O. L. No. 2433 C.

Substance—Palm leaf. Size—10¾" × 1⅝". Leaves—4. 11 lines per page and 48 letters per line. Script — Grantha. No. of Granthas — 132,

Owner—Same as No. 459 A.

Subject—Substantiation of grammatical dogmas.

Beginning:

श्रीगुरुभ्यो नमः ।

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥

End:

औपाधिको वा भेदोऽस्तु वर्णानां तारमन्त्रवत् ।
अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ॥
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।
सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ॥
सत्यं यत् तत्र सा जातिरसत्या व्यक्तयो मताः ।
इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ॥
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ।

Colophon:

इति भट्टोजिदीक्षितविरचितायां वैय्याकरणभूषणकारिकायां चरमः स्फोटवादः समाप्तिमगात् ।

मुनित्रयोक्तिपोतेन पारं व्याकरणाम्बुधेः ।
यो यत्नादतरत् तस्मै श्रीमद्भट्टोजये नमः ॥

अधिगच्छति शास्त्रार्थं स्फुरति श्रद्धाति च ।
यत्कृपालेशतस्तस्मै नमोऽस्तु गुरवे सदा ॥

Author—Bhaṭṭoji Dīkṣita.

Remarks—This is a compendium of Śabdakaustubha in verse. It is printed with commentary in Benares.

---

॥ कारकतत्त्वम् ॥

No. 460. KĀRAKATATVAM.

C. O. L. No. 1830.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—32. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 500. Complete.

Owner—Brahmadattan Nambūri, Kūḍallūr.

Subject—Explication of Kārakas.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

साधयति नेहमानं देहविहीनं च येह जगदीशम् ।
सा मयि सेवकभावं प्राप्ते वाग्देवता दयताम् ॥
विरोधिनां तिरोधानक्षमो यस्य गिरां गणः ।
विश्वेश्वरं गुरुं शेषवंशोत्तंसमहं भजे ॥

कारकतत्त्वं चिन्त्यते । तत्र वक्ष्यमाणापादानत्वाद्यन्यतमम्
अपादानाद्यन्यतमत्वसङ्केतविशेषसम्बन्धेन कारकशब्दोपकारकत्वं

कारकव्यवहारविषयतावच्छेदकम् । तदज्ञाने कारकव्यवहाराभावात् । तदुक्तं हरिणा—

End :

चैत्रस्तिष्ठति । तत्र धात्वर्थे तिङर्थ आश्रयः चैत्रे आश्रयभेदेनान्वेति । तथाच चैत्ररूपाश्रयवृत्ति स्थानमिति "चैत्रस्तिष्ठती"-त्यत्र बोधः । चैत्रेण स्थित इत्यत्र धात्वर्थे तृतीयार्थ आश्रयः उक्तसम्बन्धः प्रकृत्यर्थतृतीयार्थोऽन्वेतीति पूर्ववदेव बोध इति । भवतश्च पदमित्यादौ षष्ठ्या अप्याश्रयोऽर्थः । बोधश्चोक्तरीत्यैव इति ध्येयम् ।

Colophon :

इति शेषचक्रपाणिपण्डितविरचितं कारकतत्त्वं समाप्तम् । श्रीगुरुभ्यो नमः । श्रीनारायणः प्रीयताम् ।

चोलदेशलिपिं दृष्ट्वा लिखितं केरलाक्षरैः ।
सुधिया शेषपूर्वेण सुकृतं चक्रपाणिना ॥

कारकतत्त्वमिति शेषः ।

कोलम्बवर्षे षष्ट्यर्थहीनदन्तकृतेः समे ।
सिंहे मासेऽलिखदिदं कैलासः शङ्कराह्वयः ॥

Author—Śeṣacakrapāṇi.

Remarks—The connection of the six *kārakas* beginning with the "Subject" "Object" etc. with the verb is dwelt upon at length in this work. From the verse beginning with "कोलम्बवर्षे—" in the colophon it is seen that the Ms. was written in 960 M. E. ['दन्त' indicates 32; its *Kṛti* (square) is

32 × 32 = 1024. On deducting "षड्वर्ग" (60 + 4) (1024—64 = 960), the date is provedto be 960 M. E.]

## ॥ कारिकाभाष्यम् ॥

No. 461. KĀRIKĀBHĀṢYAM.

C. O. L. No. 242.

Substance—Paper. Size—13½" × 8½". Pages—113. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1500.

Owner—C. O.

Subject—A commentary on Bhāṣya Vārtikas in verse.

Beginning :

चिद्रूपं व्य....तन्नादेर्भिन्नं तदुपरागतः ।
अखण्डमर्थधीरूपं शब्दब्रह्मानुसन्दधे ॥
नमामि दाक्षीतनयकात्यायनपतञ्जलीन् ।
यद्वाक्चन्द्रसमुन्मेषैर्वर्धते शब्दसागरः ॥
प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥

इति । अस्यार्थः—प्रत्याहारसूत्रेषु ये अनुबन्धाः णकङादयस्तेषां हलन्त्यमिति इत्संज्ञायां सत्यामादिरन्त्येनेति सूत्रेणाणादिसंज्ञा मध्यपतितानामिकारादीनां भवति । तथा मध्यपतितत्वाविशेषेण णकङादीनामपि स्यात् । इत्याशङ्कापूर्वकं तां निरस्यति--- प्रत्याहारेऽनुबन्धानामिति ।

End :

तेन विशेष्यतया कार्याणां प्रधानस्य तस्य पदस्यैव कृत्वोर्थग्रहणं विशेषणं न्याय्यम् । कृत्वोर्थे वर्तमानस्य विसर्जनीयान्तस्य पदस्येदुदुपधस्यालोऽन्त्यस्य षत्वमिति । ततश्चतुरोऽपि समासान्तविधिरनित्यः अनित्यमागमशासनमिति सिद्धं नार्थो द्विरादिग्रहणेनेति श्लोकवार्त्तिककारपक्षः । वृत्तिकारमतेन तु प्रत्याख्यायते । तयोर्य्वावचि संहितायामिति ।

Colophon :

कारिकाभाष्यं समाप्तम् ।

Author :

Remarks—Numerous grammatical Paribhāṣās like "तदेकदेशास्तद्ग्रहणेन गृह्यन्ते" are made note of in twenty granthas after the colophon, ending with "शब्दपरिभाषा समाप्ता".

---

## ॥ काशिकाविवरणपञ्चिका ॥

No. 462 A. KAŚIKĀVIVARAṆAPAÑCIKĀ.

C. O. L. No. 1087 A.

Substance--Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—75. 8 lines per page and 51—76 letters per line. Script—Malayāḷam. No. of Granthas—2400. Incomplete.

Owner—Cirakkal Rājā.

Subject—An extensive commentary on Kāśikāvṛtti.

Beginning :

श्रीगणपतये नमः ।

जयन्ति ते सदा सन्तः सर्वोपायैरुपार्जितम् ।
गुणानां सुमहद् वृन्दं दोषाणां तु विवर्जितम् ॥
सर्वतः सारमाकृष्य (कृ)तैषा काशिका यथा ।
वृत्तिरस्या यथाशक्ति क्रियते पञ्जिका मया ॥

* * * * *

वृत्तावित्यादि —अथ किमर्थं काशिकारम्भेऽस्य श्लोकस्योपन्यासः । तस्यामगौरवपरिहारार्थो गौरवोत्पादनार्थश्च । अत्र ह्यसति प्राच्यासु वृत्तिषु विरचितासु पश्चादियं विरचितेति पुनरुक्ततादोषं भावयतामस्यामगौरवमेव स्यात् ।

End :

तत्र वर्णयन्ति । अचूप्रत्यन्ववपूर्वात् सामलोम्न इत्यत्राजिति योगविभागेन प्रत्ययः कृतः । तेनाचि परतो भसंज्ञायां सत्यामित्वं भवति । नुम् च न भवति । अचा सर्वनामस्थानस्य व्यवहितत्वादिति । अन्ये तु प्रागुदीचामिति पठन्ति । तेषां द्वन्द्वाचुदषहान्तात् समाहार इति टच्समासान्ते कृते पूर्ववदीकारो नुंभावश्च । क्वचित् प्रागुदीच इति पाठः । तत्रावयवदेशापेक्षया बहुत्वविवक्षायां बहुवचनम् । प्राग्देशोऽनुदेशश्च वि......
....त इत्यर्थः ।

Colophon :

इत्याचार्यजिनेन्द्रबुद्धिविरचितायां काशिकाविवरणपञ्जिकायां प्रथमस्याध्यायस्य प्रथमः पादः ।

Author—Jinendra Buddhi.

Remarks—Only the commentary is extant in this Ms. The last line in the closing Fol. contains 'गाङ्कुटादिभ्योऽञ्णिन्ङित्" and hence the Ms. covers only the first *pāda* of the opening chapter. The work is noticed as No. 1321, DCSM. Madras, Vol. III.

## ॥ महाभाष्यम् ॥

### No. 462 B. MAHĀBHĀṢYAM.

C. O. L. No. 1087 B.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—9. 9—10 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—360. Incomplete.

Owner—Same as No. 462 A.

Subject—An elaborate commentary on Pāṇini-sūtras.

Beginning:

श्रीगणपतये नमः । ओम् ।

"धातुसम्बन्धे प्रत्ययाः" । प्रत्यय इति वर्त............य-ग्रहणं किमर्थम् । अधातुप्रत्ययानामपि धातुसम्बन्धे साधुता यथा स्यात् ।

End:

एवमपि श्रीकाम्यति भूकाम्यतीति प्राप्नोति । तद्विधानात्सि-द्धम् । विहितविशेषणं धा........................धातोर्यो विहित इति धातोरेव विहितः धातोरित्येव विहित इति ।

Colophon :

इति (तृती)यस्य चतुर्थपादे प्रथमाह्निकम् ।
पादश्च समाप्तः ।

Author—Patañjali.

Remarks—This work is available in print. The Ms. is damaged at the close. The script testifies to its antiquity.

---

## ॥ काशिकावृत्तिव्याख्या (वृत्तिप्रदीपः) ॥

No. 462 C. KĀŚIKAVṚTTIVYĀKHYĀ.
Vṛttipradīpa.

C. O. L. No. 1087 C.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—105. 11 lines per page and 78 letters per line. Script—Malayāḷam. No. of Granthas—7500. Incomplete.

Owner—Same as No. 462 A.

Subject—A commentary on Kāśikāvṛtti.

Beginning :

ङ्याप्प्रा । समाहारनिर्देश इति । समाहारद्वन्द्वेन तेषां ङ्यादीनामयं निर्देश इत्यर्थः । तेन ङ्यादीनां बहुत्वेऽपि समाहारस्यैकत्वादेकवचनं युक्तमिति भावः । किमर्थमिदमुच्यते । ङ्याप्प्रातिपदिकात् परे स्वादयो यथा स्युः । केवलानां प्रयोगो मा भूदिति । परश्चेति वचनान्न भविष्यति ।

End :

इतरेतरयोगद्वन्द्वे तु द्विवचने यणि सति द्वयोर्वकारयोः श्रवणं स्यात् । वलि लोपोऽपि नास्ति स्थानिवद्भावात् । तत् कथमयं निर्देश इत्याह—युवयोरिति । नपुंसकलिङ्गता चेति । न भवतीति वक्ष्यमाणेन सम्बन्धः । मध्ये हेतुः । लिङ्गमिति लाघवार्थम् । युवृ प्रत्ययावुपदिष्टौ । तत्र तत्र द्वानाकयोरेवोपदेशे गौरवं स्यात् ।

Colophon :

इति वृत्तिप्रदीपे षष्ठस्य चतुर्थः पादः । समाप्तश्चाध्यायः ॥

Author—Rāma Miśra.

Remarks—Most of the leaves of this Ms. have fallen into decay. The author's name is disclosed by the following passage occurring at the end of the 3rd *pāda* in the 4th chapter.

"इति श्रीराममिश्रविरचिते वृत्तिप्रदीपे चतुर्थस्याध्यायस्य तृतीयः पादः" ।

---

## ॥ काशिकाविवरणपञ्चिका ॥

No. 463 A. KĀŚIKĀVIVARAṆAPAÑCIKĀ.

C. O. L. No. 2221 A.

Substance—Palm leaf. Size—$10\frac{3}{4}'' \times 2''$. Leaves—35. 10 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—2800. Incomplete.

Owner—Subrahmaṇyan Śaṅkaran Mūttatu Avl., Kiḍ.ṅgūr.

Subject—Same as No. 462 A.

Beginning :

हरिः ।

...न । इतरत्र तु पक्षे सिध्यति पाक्षिकविधानम् । किन्तु यत्त्वयाभिहितं व्यवस्थितविभाषया रेफस्यैवेदं मकारानुबन्धवतः स्वरूपेण ग्रहणं न प्रत्याहारस्येति, तन्नोपपद्यते । एकत्वादन्यतरस्यांग्रहणस्य । तस्य च विधानविकल्प एव चरितार्थत्वात् । कुतश्चायमध्यवसायो व्यवस्थितविभाषा सेति । व्याख्यानादिति चेत्, तत्किमिदानीं पारम्पर्यसमाश्रयणेन । व्याख्यानादेव नेदं प्रत्याहारग्रहणं भविष्यतीति यत्किञ्चिदेतत् ।

End—Colophon—Author : Same as No. 462 A.

Remarks—The first 12 leaves are missing. This Ms. opens with the commentary on the 7th *Pratyāhāra Sūtra.* The script is neat and legible.

॥ सिद्धान्तकौमुदी ॥

No. 463 B. SIDDHĀNTAKAUMUDĪ.

C. O. L. No. 2221 B.

Substance—Palm leaf. Size—$10\frac{3}{4}'' \times 2''$. Leaves—19. 12 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—1400. Incomplete.

Owner—Same as No. 463 A.

Subject—Exposition of Pāṇinisutras.

Author—Bhaṭṭoji Dikṣita.

Remarks—This Ms. embodies only a portion dealing with *Halanta Pulliṅga.* The script is very attractive. It is of recent transcription.

---

## ॥ काशिकाविवरणपञ्चिका (पदमञ्जरी) ॥

## No. 464. KĀŚIKĀVIVARAṆAPAÑCIKĀ.

### Padamañjarī.

C. O. L. No. 1994.

Substance—Palm leaf. Size—20″ × 1¾″. Leaves—131. 8 lines per page and 54 letters per line. Script—Grantha. No. of Granthas—3000. Incomplete.

Owner—C. O.

Subject—Same as No. 462 A.

Beginning:

...ये च शास्त्रं हीयते। न शास्त्रेण प्रमितव...यदि नानुष्ठीयेत। स्याच्छास्त्र.... ....हानिः। अत्र पर्यायेण प्रमीयत इत्युक्तं, तच्चानुष्ठितमेव। केयं शास्त्रहानिः। इह तु भवानाचष्टाम्।

End:

पक्षान्तर उभयप्रसङ्गे। यद्यपि ह्रस्वाभावपक्षे कृतार्थं दीर्घत्वम्,

तथापि तेन परत्वाद् ह्रस्वो बाध्यते । अथेदानीं दीर्घत्वे कृते पुनः-प्रसङ्गत्वं कस्मान्न भवति । तत्राह--पुनःप्रसङ्गविज्ञानं चेति ।

Colophon :

इति हरदत्तमिश्रविरचितायां काशिकाविवरणपञ्जिकायां पदमञ्जर्यां षष्ठस्याध्यायस्य तृतीयः पादः ।

Author—Haradattamiśra.

Remarks—The first three leaves of the Ms. are missing. The colophon discloses that Padamañjarī is also known as Kāśikāvivaraṇapañcikā.

॥ काशिकावृत्तिव्याख्या (वृत्तिप्रदीपः) ॥

No. 465. KĀŚIKĀVṚTTIVYĀKHYĀ.

Vṛttipradīpa.

C. O. L. No. 228.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—126. 19 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1500. Incomplete.

Owner—C. O.

Subject—Same as No. 462 A.

Beginning :

अङ्गस्य । हून इत्यादौ यजादित्वात्संप्रसारणम् । जीन इति । ग्रहिज्यादिना । निरुतं दुरुतमिति । वेञ् तन्तुसन्ताने । यजादिः ।

अत्र निर्दुरोरवयवौ हलौ अङ्गस्यावयवौ न भवतः । क्रिमिणामिति । पामादित्वान्नः । टाप् द्वितीयैकवचनम् । अत्र नप्रत्ययापेक्षया पूर्वस्याङ्गत्वेऽपि समुदायस्याप्रत्ययत्वान्न तदपेक्षमङ्गत्वम् । पामनामित्यत्र नलोपे कृतेऽजन्तत्वाद्दीर्घत्वं स्यात् ।

End :

नन्वचामादेरित्यनुवृत्तं सत्स्वरूपं वृद्धेर्विशेषणमचामादेर्यैवं या वृद्धिः तस्याः प्रसङ्गे तद्वृद्ध्यपवादौ य्वाभ्यां पूर्वमैचौ भवत इत्यर्थो भवति । द्व्यशीतिके तु नैवं वृद्धिप्रसङ्गः । यद्येवं य्वोरविशेषणा(दाध्यश्वा?)दौ स्यादुभयविशेषणमप्ययुक्तम् । सकृच्च्वणादुत्तरपदवृद्धेरपीति । तत्रापि स्वाधिकारान्तेऽप्यत इति उत्तरपदवृद्धावधिकृतयोः य्वोरुत्तरपदेन विशेषणादुत्तरपदस्य यौ य्वाविति द्वारा.... ... .... ...

Colophon :

इति वृत्तिप्रदीपे सप्तमाध्यायस्य द्वितीयः पादः ।

Remarks—The Ms. extends from the 4th *pāda* of the 6th chapter up to the end of the 2nd *pāda* of the 7th.

---

## ॥ क्षीरतरङ्गिणी ॥

### No. 466. KṢĪRATARAṄGIṆĪ.

C. O. L. No. 99.

Substance—Paper. Size—8″ × 6½″. Pages — 142. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1800.

Owner—C. O.

Subject—Exposition of the changes of verbal roots in their inflected forms.

Beginning :

अथ क्षीरतरङ्गिणीप्रारम्भः ।

श्रीमते हयग्रीवाय नमः । श्रीगणेशाय नमः ।

तरङ्गसुभगं क्वणन्मधुपकिङ्किणीजालिनं
करं प्रचलपुष्करारुणशिखाग्रमुल्लासयन् ।
विभुर्जयति विघ्नजिद् भुवनपृष्ठमारोपयन्
दुरन्तदुरितक्षयाद्विजयवैजयन्तीमिव ॥

धातुवैषम्यशमनाद्वाङ्मयाप्यायिनी सताम् ।
क्षीरस्वामिप्रसूतेयं वृत्तिः क्षीरतरङ्गिणी ॥

सूत्रव्याख्याकार्यजातं गणानां
सेट्त्वानिट्त्वोपग्रहादिट्फलं च ।
अष्टाध्याय्यां ये विशेषप्रयोगा
धातोर्धातोर्दर्शितास्ते विशेषात् ॥

य एव पारायणिकैर्दृष्टोऽत्र विवरीतृभिः ।
मूर्धान्तो नैव(?) याताः स्मः कृत्वा गजनिमीलिकाम् ॥

न विचारिताः प्रयोगाः पारायणिकैर्हि तन्त्रसंरब्धम् (?) ।
मत्वार्थधातुकेऽपि च षोढा नोदाहृता प्रकृतिः ॥

भग्नाः पारायणिकाश्चन्द्राद्या अपि च यत्र विभ्रान्ताः ।
तान् धातून् विवरीतुं गहनमहो अध्यवसिताः स्मः ॥

जाता विश्वसृजः क्रमेण मुनिभिः संस्कारमापादिताः
शब्दाः संवसनादसाधुभिरपभ्रष्टाः स्थ भो भ्रातरः ।
वाग्देव्याद्य कृता मदेकशरणा मात्रा यतोऽस्मान्मया
न्याय्ये वर्त्मनि वर्तनाय भवतां षड् वृत्तयः कल्पिताः ॥

अथ नित्यानां स्वरार्थकल्पनया व्याख्यानमिति प्रकृतयो निर्दिश्यन्ते—भू सत्तायामुदात्तः । भूरित्यविभक्तिकोऽयं निर्देशो भ्रान्तिनिरासार्थः ।

End :

निवृत्तप्रेषणाद्धातोः प्रकृतेऽर्थे णिजिष्यते ।
हेत्वर्थानुप्रवेशोऽपि बुद्ध्यारोपाण्णिजं विना ॥

जजान गर्भं महिमानमिन्द्रः । अजीजनदित्यर्थः । अन्ये तु 'प्रातिपदिकाद्धात्वर्थ' इति सिद्धे सूत्रमूत्रच्छिद्रान्धदण्डादय उदाहरणार्थं निदर्शिता इति व्याख्यन् । धातूनामर्थनिर्देशोऽयं निदर्शनार्थ इति सौनागाः । यदाहुः—

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः ।
प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः ॥

Colophon :

इति भट्टक्षीरस्वाम्युत्प्रेक्षितधातुवृत्तौ क्षीरतरङ्गिण्यां चुरादिगणः सम्पूर्णः । समाप्तश्चायं ग्रन्थः ।

Author—Kṣīrasvāmī.

Remarks—This Ms. shows vividly how verbal roots change under the influence of accents besides the different applications of the conjugational affixes etc.

---

## ॥ णत्ववादक्रमः ॥

### No. 467 A. ṆATVAVĀDAKRAMA.

C. O. L. No. 2432 A.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—3, 30

12—14 lines per page and 68 letters per line. Script—Grantha. No. of Granthas—150.

Owner—Sthāṇu Śāstrial Muthu Śāstrial, Vadiviswaram.

Subject—An inquiry into the correctness or otherwise of the letter "ण" in the word 'नारायण'.

Beginning :

श्रीमत्कृष्णमहीन्द्र......मदामि श्रीदेशिकानुग्रहा-
दस्माभिर्यदसाधि णत्वविषये दौर्घट्यमव्याहतम् ।
श्रीनारायणनाम्नि यौगिकतया नीते शिवादौ बलात्
सोऽयं शङ्करभट्टसंज्ञविदुषा वादक्रमो लिख्यते ॥

आसीद्विप्रतिपत्तिस्तु णत्वं संज्ञात्वमन्तरा ।
नारायणपदे साधु न वेति नृपसंसदि ॥

तत्र शङ्करभट्टाख्ये साधुत्वं प्रतिजानति ।
अस्माभिस्तदसा(धु)त्वं सुव्यक्तमुपपादितम् ॥

ॐ ॥'पूर्वपदात्संज्ञायामि'ति सूत्रं वार्त्तिककारस्य मते नियमार्थम् । भगवतो भाष्यकारस्य मते तु अपूर्वविध्यर्थम् । भगवतः सूत्रकारस्यापि अयमेव पक्षोऽभिमतः । अस्मिन् पक्षद्वयेऽपि नारायणशब्दस्य संज्ञाविषयत्वात् अत्र णत्वं दुरुपपादम् ।

End :

दाक्षायणयज्ञेन स्वर्गकामो यजेतेत्यत्र दक्षो यजमानस्तत्सम्बन्धिनो दाक्षाः । तेषामयनमावृत्तिरिति व्युत्पत्त्या प्रकृतदर्शपू-

र्णमासयोरावृत्तिरूपगुणविधानं सम्भवति । दाक्षायणशब्दस्य अन्यत्र प्रयोगसम्भवेन केवलयौगिकत्वासम्भवात् संज्ञात्वाभावे णत्वानुपपत्तेश्च संज्ञात्वस्यावश्याभ्युपगन्तव्यतया अथैष ज्योतिरित्यादाविव संज्ञाभेदात् कर्मभेद इति पूर्वपक्षे द्वे पौर्णमास्यौ द्वे अमावास्ये इति वाक्यशेषानुरोधादावृत्तिशेषस्यैव अत्र विधेयत्वोपगत्या न कर्मान्तरविधिः । आवृत्तिविशेषविशिष्टयोगविभागबलाद् णत्वसिद्धौ दाक्षायणीशब्देऽपि तथैव सम्भवात् । संज्ञोपपन्थादिति?सूत्रकृन्निर्देशः ग्रन्थकृतां कर्मैक्यानिरोधिसंज्ञात्वाभ्युपगमक्लेशश्चायुक्तः स्यादिति स्पष्टमेवेति नवमी कक्ष्या ।

Colophon :

श्रीगणेशाय नमः । हरिः । ओम् ।

Author :

Remarks—This discussion took place at the court of Kṛṣṇa Rāja Mahīndra (of Mysore). It lends support to the correctness of the argument.

---

## ॥ रप्रत्याहारमण्डनम् ॥

No. 467 B. RAPRATYĀHĀRAMAṆḌANAM.

C. O. L. No. 2432 B.

Substance—Palm leaf. Size—$16\frac{1}{4}'' \times 1\frac{7}{8}''$. Leaves—4. 12—14 lines per page and 68 letters per line. Script—Grantha. No. of Granthas—200.

Owner—Same as No. 467 A.

Subject—A disquisition upon "र" Pratyāhāra.

Beginning:

रप्रत्याहारमण्डनम् । ओम् । अविघ्नमस्तु ।

सञ्चिन्त्य वादिप्रसरं जेतारं श्रीपतञ्जलिम् ।
कुर्वे वादिविलासार्थं रप्रत्याहारमण्डनम् ॥

"लण्" । अत्र लकारोऽनुनासिकः प्रतिज्ञायते । तेन लण्सूत्रस्थावर्णेन सह उच्चार्यमाणो रेफो रलयोः संज्ञेति कैयटहरदत्तदीक्षितादयः । अत्र वदन्ति—अत्रानुनासिकत्वे अतो ल्रेति सूत्रे पाणिनिर्लकारं नोच्चारयेत् रप्रत्याहारेणैव निर्वाहात् । किञ्चासेत्संज्ञकत्वे यण्घटितसूत्रेषु बहुषु अर्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत् ।

End:

एतेन वस्तु(रो?तो) रप्रत्याहाराभावेन 'रपर' इत्यस्य स्थाने 'ल्रपर' इति पठनीयमिति लपरत्वं वक्ष्यामीति तुल्यास्यसूत्रभाष्याल्लभ्यत इति उरण्सूत्रस्थः शब्देन्दुशेखरः परास्तः । एवं भाष्यादिसर्वग्रन्थस्वारस्ये दृढदूषकयुक्तेरभावे च महासाहसमवलम्ब्य कथमेतद् दूषयाञ्चक्रुरिति त एव प्रष्टव्या इति मात्सर्यमुत्सार्य निपुणतरं विभावनीयं सुहृद्भिर्विद्वद्भिः ।

Colophon:

इति रप्रत्याहारमण्डनम् । शुभमस्तु ।

श्रीरामजयम् ।

Author:

Remarks—Same as No. 359 b.

## ॥ णेरणौसूत्रक्रोडपत्रम् ॥

No. 468. ṆERAṆAUSŪTRAKROḌAPATRAM.

C. O. L. No. 476.

Substance—Paper. Size—13¼″ × 8¼″. Pages—63. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—630. Complete.

Owner—C. O.

Subject etc.—Same as No. 459 B.

---

## ॥ णेरणौसूत्रव्याख्या ॥

No. 469. ṆERAṆAUSŪTRAVYĀKHYĀ.

C. O. L. No. 2389.

Substance — Paper. Size—11″ × 4″. Pages — 21. 8—10 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—500.

Owner—C. O.

Subject—Same as No. 459 B.

Beginning:

श्रीगणेशाय नमः ।

शिवं शिवप्रदं नित्यं रामं रमयतां वरम् ।
इन्द्रप्रमुखदेवेड्यं सरस्वत्यास्पदं भजे ॥

सूत्रवार्त्तिकभाष्याणामाशयं बोद्धुमक्षमाः ।
वृत्तिकृत्प्रमुखाः सर्वे बभ्रमुर्णजसूत्रके ॥

अतो भाष्यमवष्टभ्य सूत्रव्याख्यापुरस्सरम् ।
वृत्तिकृत्प्रमुखग्रन्थान् दूषये युक्तिपूर्वकम् ॥

णेरणौ यत् कर्म णौ चेत्स कर्ताऽनाध्याने । ण्यन्तादात्मनेपदं स्यादनाध्याने अणौ यत् कर्म णौ चेत् स कर्ता स्यात् ।

End :

अत्रेदं विवरणं तस्यैवेति पुरुषस्य भोक्तृत्वमेव न कर्तृत्वमिति सांख्याः । तेषां मते शरीरात्मा शरीरावच्छिन्नश्चिदात्मेत्येवं व्याख्याने सम्भवत्यपि शरीरमेवात्मेति मुख्येऽपि सामानाधिकरण्ये कथं विलयनं संभवतीत्यत आह — शरीरस्येति । सुखस्य हेतुना दुःखस्य हेतुना च संबध्यते इत्यर्थ इति । इत्थं भाष्यादिग्रन्थान्वृत्त्यादिग्रन्थांश्चालोच्य को वा भाष्यकारानुमतोऽर्थ इति मात्सर्यमुत्सार्य सुधियो विदांकुर्वन्तु ।

Colophon :

शके नेत्राम्बराद्रीन्दौ तपनामनि वत्सरे ।
मासि भाद्रपदे कृष्णद्वादश्यां शुक्रवासरे ॥

णेरणाविति सूत्रस्य व्याख्यानं फणिसम्मतम् ।
शिवरामेन्द्रयतिना कृतं संस्थितमाश्रितम् ॥

श्रीकृष्णाय परमात्मने नमो नमः ।

Author—Śivarāmendrayati.

Remarks—The colophon indicates that the work was completed on Friday the 12th day of the dark half of the Lunar month of Bhādrapada of the year 1702 Śaka era.

---

## ॥ धातुकारिका ॥

## No. 470. DHĀTUKĀRIKĀ.

C. O. L. No. 222.

Substance—Paper. Size—13¼″ × 8½″. Pages—181. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1620. Complete.

Owner—C. O.

Subject—Elucidation of the verbal roots.

Beginning:

श्रीः ।

धातुकारिका ।

दाक्षीसुतं वररुचिं तरुणेन्दुचूडं
देवीं गिरां पदसरोजयुगं गुरूणाम् ।
द्वैमातुरं रघुपतिं जगदेकनाथं
व्यासं पतञ्जलिमुदारधियं स्मरामः ॥

वृत्तिद्वयं परिमितं खलु पाणिनीय-
शब्दस्मृतेर्लघुबृहद्भिदया विधाय ।

अस्माभिरत्र पुनरादृतपद्यबन्धे·
धात्वर्थरूपविषयः क्रियते प्रयासः ॥

धातोः स्वरूपमभिधेयमथानुबन्ध-
कार्यान्वितानि हि पदानि लडादिरूपम् ।
इक्सम्भवं च बहुना किमिहावसेयं
व्युत्पत्तये लघुधियामुपपादयामः ॥

मुक्तवेक्श्तियौ पठनमिष्टमिहान्यथा चेत्
स्वस्वानुबन्धविहतिः प्रसजेदमीषाम् ।
कार्यं च तत्कृतमतस्तङडादिनैव
ग्राह्यं भवेदिति किलात्र तयोस्तु मुक्तिः ॥

लडादि रूपतो ग्राह्यं स्वरूपं देववत् क्वचित् ।
प्रायेण तु पुनः सर्वत्रोच्यते रूपमर्थवत् ॥

उच्चारणार्थोऽनुबन्धो येषामत्र विवक्षितः ।
इक्श्तिभ्यामपि तद्रूपं निर्देष्टव्यमितीह दिक् ॥

भू सत्तायां भवो भावो भविता भवति प्रभुः ।
अभूद्भभूव बोभोति बोभवीति बुभूषति ॥

End :

सिद्धं तथापि संघातात्सोपसर्गाद्विधित्सया ।
पठ्य.... ततोऽसंग्रामयतऽप्युपस... ... ॥

पूर्वमट् स्यात्सिसंग्रामयिषतीति समो भवेत् ।
द्विरुक्तिर्न च संग्रामयित्वेति ल्यबपीष्यते ॥

संघातोत्पत्तिवचनेनामुना ह्या... ... ।
.... ... ....प्रत्ययोऽत्र विधित्सिते ॥

इतोऽन्यत्रोपसर्गाणां पृथक्कृतिरितीह दिक् ।
स्तोमेति धातुः श्लाघायां स्तो... .... ... ॥

Colophon:

धातूनां वृत्तिमेनां सपदि लघुतरां कार्यरूपाभिधेय-
प्राकाश्यादर्शरूपां कथितबहुमतां माधवीयावलम्बाम् ।
तत्तद्रूपावतारस्फुटितरुचिरताशालिनीं रामशालि-
क्षेत्रावासीह कश्चित्समरचदसौ बालमित्रं द्विजन्मा ॥

Author—A Brahmin of Rāmaśālikṣetra.

Remarks—The verse beginning with "वृत्तिद्वयं परिमितं-" in the introductory portion discloses that the author has composed two other treatises in verse viz: पाणिनीयलघुवृत्ति and पाणिनीयबृहद्वृत्ति.

---

## ॥ धातुकारिका ॥

### No. 471. DHĀTUKĀRIKĀ.

C. O. L. No. 103.

Substance—Paper. Size—$13\frac{1}{4}'' \times 8\frac{1}{2}''$. Pages—158. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1580.

Owner—C. O.

Subject—Beginning: Same as No. 470.

End:

चितादिकुम्भपर्यन्ता आत्मनेपदिनो जडाः ।
ततः परेऽत्र चर्चाद्याः स्वदान्ता इह दुर्धनाः ॥

गावो विकल्पितणिचो धृषान्ताः स्युर्युजादयः ।
कथादयस्ततोऽदन्ताः पठिता इह रोधनाः ॥

भवन्त्यपठिताश्चापि केचनेति विपश्चितः ।
वस्त्वश्विवेदाः संख्येयं प्रायेणातश्चुरादिषु ॥

Colophon :

इति चुरादयः समाप्ताः ।
समाप्तोऽयं ग्रन्थवरः ।

Author—Same as No. 470.

Remarks—In the front fol. of this Ms. the title of this work is denoted as "तिङन्तमाला ".

---

## ॥ धातुकारिका ॥

### No. 472 A. DHĀTUKĀRIKĀ.

C. O. L. No. 438 A.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—31. 6—7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—450. Incomplete.

Owner—Anantanārāyaṇa Śāstrī, Vadiviśvaram.

Subject—Beginning : Same as No. 470.

End :

पुर्वपर्वफर्वमर्व चत्वारः पूरणे स्मृताः ।
तत्र पुर्वति पर्वन्ति ततः फर्वति मर्वति ॥

क्विपि पूरत्र सिध्यन्ति पूर्वपर्वादयो गिरः ।
अदने पठ्यते चर्वधातुश्चर्वति चर्विता ॥

कर्व खर्व गर्व दर्पे कवत् खर्वति गर्वति ।
स्युर्हिंसायामर्व शर्व पर्व चार्वति शर्वति ॥

तथा सर्वति सिध्यन्ति....सर्वा रसोऽप्यतः ।
पोपदेशतया षत्वं सिपस्सर्पिपतीति णौ(?) ॥

इवि व्याप्तौ नुमीदित्वादिन्वतीत्यादि नुंविधौ ।

Colophon:

Author—Same as No. 470.

Remarks—The Ms. extends up to the exposition of the root "इवि व्याप्तौ".

---

## ॥ दशश्लोकी ॥

### No. 472 B. DAŚAŚLOKĪ.

C. O. L. No. 438 B.

Substance—Palm leaf. Size—10″ × 1½″. Leaf—1. 12 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas — 11. Complete.

Owner—Same as No. 472 A.

Subject—Essence of Mahāvākyas.

Beginning :

जगद्योनि सदानन्दं सत्यज्ञानादिलक्षणम् ।
व्योमवत्सर्वभूतस्थमद्वैतं नौमि शङ्करम् ॥

शमादिसहितैनैतच्छ्रोतव्यं हि मुमुक्षुणा ।
महावाक्यस्य तात्पर्यं वक्ष्ये दृष्टान्तपूर्वकम् ॥

महाकाशश्च तच्छाया तुषारोऽम्बुदवर्तिनि ।
एकीकृत्य त्रयं चैतत्तत्पदेनाभिधीयते ॥

घटाकाशो महाकाशश्छाया च स्यात्तदम्बुनि ।
अज्ञानादविविक्तं सत् त्वंपदेनाभिधीयते ॥

End :

लिङ्गदेहस्य चोत्पत्तेः प्रागहंतत्पदाभिधः ।
त्वंपदोक्तस्ततोऽमन्त....नैक्यमु(मो?)च्यते ॥

तत्त्वमोरर्थ एकस्मिन् यदि निष्ठा तदर्थता ।
ममास्तीद्यदि वा भिन्ने(?)पदेऽस्तीत्यर्थहानिता ॥

दृश्यमानो यथादर्शे मुखाभासो मुखेऽस्यते ।
धीशयोऽपि तथाभास आत्मन्यप्यस्यते बुधैः ॥

यथावदहमीडे तं यशोदायाः स्तनन्धयम् ।
यत्स्वरूपं विदुर्विश्वं प्राकृताः सज्जना अपि ॥

Colophon :

इति दशश्लोकी पूर्णा ।

Author :

Remarks—The following lines are seen after the close:

"अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ।
अन्धं भुवनमन्धस्य प्रकाशं तु सचक्षुषः ॥

यत्रास्ति वासनाबीजं तत् सुषुप्तं न सिद्धये ।
निर्बीजा वासना यत्र तत् तुर्यं सिद्धिदं स्मृतम् ॥"

---

## ॥ साहित्यसारः ॥

### No. 472 C. SĀHITYASĀRA.

C. O. L. No. 438 C.

Substance—Palm leaf. Size—14" × 1½". Leaves—32. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—615. Complete.

Owner—Same as No. 472 A.

Subject—Histrionics.

Beginning:

श्रीगणपतये नमः ।

सुरासुरशिरःश्रेणीरत्नराजिविराजितम् ।
वन्देऽहं वासुदेवाङ्घ्रिपद्मपङ्केरुहद्वयम् ॥

सदा मृदुपदन्यासाः सालंकारा रसावहाः ।
प्रगल्भा इव कामिन्यो जयन्त्यादिकवेर्गिरः ॥

जयन्ति भुवने सन्तः सदा सन्तापहारिणः ।
निजवक्त्रेन्दुनिर्गच्छदच्छवाक्यामृतद्रवैः ॥

विनापि कारणेनोच्चैर्विस्मरद्वैरदारुणात् ।
दुर्जनाद्भीतिरत्यर्थं कस्य वा नोपजायते ॥

अशेषख्यातसाहित्यसारनिष्णातमानसः ।
सर्वेश्वर इति ख्यातः कविर्जयति भूतले ॥

मनोमन्दरमन्थानमथिताद् भरताम्बुधेः ।
यस्याजनि जनानन्दी ज्ञानामृतमहोदयः ॥

सनत्कुवलयोल्लासक(रे?री)यं तिमिरापहा ।
यद्वक्त्रचन्द्रसम्भूता भारती चन्द्रिकायते ॥

नि(श्शेष)जगदानन्दसन्दोहमुदिताशयः ।
यस्यागस्त्येश्वराधीशो वामराशिमुनिर्गुरुः ॥

उत्तुङ्गसत्त्वगम्भीरादुत्पन्नो यस्त्रि(विक्रमात्) ।
(मन्म)ध्यविलसन्मूर्तिः सागरादिव चन्द्रमाः ॥

गङ्गातरङ्गनिर्धौतजटामकुटशोभितः ।
यस्य चेतस्यसा(वास्ते सदारश्चन्द्रशेखरः) ॥

लसन्मृदुपदावल्या बालव्युत्पत्तिकारणम् ।
तेन साहित्यसारोऽसौ क्रियते नाट्यलक्षणम् ॥

आहृतं भरतात्... ... ...
कलितं कोहलात्किश्चित्किश्चिद्भरतविस्तरात् ॥

End :

भू(तप्रतपिशा)चाद्याः षोडशात्यन्तमुद्धताः ।
मायेन्द्रजालसङ्ग्रामानिर्घातोत्पातसम्भ्रमान् ॥

... ...म्यगेव विनिर्दिशेत् ।
रौद्रो रसोऽङ्गी कर्तव्यश्चत्वारोऽङ्गाः सुविस्तराः ॥

दीर्घवृत्तविचित्रार्थो (निर्विमर्शो डिमो भवेत् ।
सन्धिसन्ध्य)ङ्गवृत्त्यङ्गवृत्तिनायकवस्तुभिः ॥

भिद्यमानाङ्कसङ्केता भेदाः स्युर्नाटके दश ॥
सुदृढरचित(बन्धः साधु स)र्वेश्वरेण
प्रथितभरतशास्त्रप्राप्तभूपाविशेषैः ।
मृदुतरपदशय्याशोभितः शश्वदुच्चैः
सरसमनसि भूयादेष साहित्यसारः ॥

Colophon :

इति श्रीमन्मलयजमहापण्डि(ने?त)सर्वेश्वराचार्य(विरचिते साहि)त्यसारे षष्ठः प्रकाशः । साहित्यसारः समाप्तः ।

अस्य साहित्यसारस्य संख्या सर्वेशकल्पिता ।
(भवेदष्टाधि)कैवात्र पट्छती सुमनोहरा ॥

जयति स सर्वेशकविः कर्ता साहित्यसाररचनायाः ।
श्रीवामराशिदेवो यस्य गुरुर्मु... ... ॥

Author—Sarveśvara disciple of Vāmarāśideva.

Remarks—The Ms. is much damaged.

---

## ॥ चन्द्रालोकः ॥

No. 472 D. CANDRĀLOKA.

C. O. L. No. 438 D.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—10.

8—9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—172. Complete.

Owner--Same as No. 472 A.

Subject—Poetics.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

परस्परतपःसम्पत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ।
अलङ्कारेषु बालानामवगाहनसिद्धये ।
ललितः क्रियते तेषां लक्ष्यलक्षणसङ्ग्रहः ॥

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥

End:

हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ।
लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः ॥

इत्थं शतमलङ्कारा लक्षयित्वा निदर्शिताः ।
प्राचामाधुनिकानां च मतान्यालोच्य सर्वशः ॥

Colophon:

इति कुवलयानन्दः । परमेश्वरेण लिखितम् ।

Author:

Remarks—The colophon is wrongly given as "इति कुवलयानन्दः". But the verses are borrowed from Candrāloka.

## ॥ सङ्गीतकेतुशृङ्गारलीलाचरितम् ॥

## No. 472 E. SAṄGĪTAKETUŚṚṄGĀRA-LĪLĀCARITAM.

C. O. L. No. 438 E.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—12. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—192.

Owner—Same as No. 472 A.

Subject etc.—Same as No. 1992, DCSMMPL.

Remarks—A fragment of Subhadrāharaṇa is transcribed in the last 15 leaves.

---

## ॥ धातुप्रत्ययपञ्चिका ॥

## No. 473. DHĀTUPRATYAYAPAÑCĪKĀ.

C. O. L. No. 1014.

Substance—Paper. Size—8½″ × 6½″. Pages—182. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—2700.

Owner—C. O.

Subject—The determination of the verbal forms and their meanings.

Beginning :

श्रीगणेशाय नमः ।

दीपज्वालाचलैर्घसौ (?) रभिव्यञ्जितमञ्जसा ।
स्फोटाह्वयमहं वन्दे रूपं विष्णोर्गुहाशयम् ॥

बालेषु पाणिनीयाब्धेः प्रवेशभृशभीरुषु ।
मयैतदन्तर्विष्टेन क्षिप्यन्ते शब्दबिन्दवः ॥

स्वरूपमर्थं धातूनां व्यवस्थामपि तिङ्विधौ ।
वक्तुं वै कारणं भेदमयमस्मत्समुद्यमः ॥

तत्र तावद्धात्वर्थविशेषणद्वारेण लकारोत्पत्तिं प्रति निमित्तभूतः काल उपदिश्यते । स च नित्यत्वाद् व्यापित्वाच्चासकल एको यद्यपि कालः, तथापि वर्तमानो भूतो भविष्यन्निति व्यपदेशभेदास्ति तस्य क्रियाद्वारकाः । स च कालः मूर्तिमद्भिः सर्वैरवयवैः संयुक्तस्तत्सं(यु)क्तेषु द्रव्येषु क्रियापि समवेतेति संयुक्तसमवायेन क्रियागतो वर्तमानादिव्यवहारः ।

End :

उत्पूर्वस्य 'उदः स्थास्तम्भ्वोः पूर्वस्य' इति पूर्वसवर्णः । उत्तभ्नोतीत्यादि योज्यम् । एवमितरेषामित्युदाहार्यम् । स्कभ्नाति । वेः परस्य 'वेः स्कभ्नातेर्नित्य'मिति षत्वम् । विष्कभ्नाति । वेरन्यत्र न भवति । परिस्कभ्नाति । विस्कभ्नोति । विस्कुभ्नातीत्याद्यूह्यम् ।

Colophon :

इति हरियोगिनः शैलवाचार्यस्य कृतौ शाब्दिकाभरणे धातुप्रत्ययपञ्चिकायां सौत्रधातवः समाप्ताः ।

नीलोत्पलदलश्यामो रामो राजीवलोचनः ।
सलक्ष्मणो महावीरः पातु मां जानकीपतिः ॥

श्रीकृष्णाय नमः ।

Author—Hariyogī.

Remarks—The verbal forms derived from Pāṇini's Sūtras are elucidated here with abundant illustrations. The script is very legible and steady. The work is also known as Śābdikābharaṇa.

---

## ॥ धातुप्रदीपः ॥

## No. 474. DHĀTUPRADĪPA.

C. O. L. No. 39.

Substance—Paper. Size—$8\frac{1}{8}''$ × $6\frac{1}{2}''$. Pages—144. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1800. Complete.

Owner—C. O.

Subject—The inflected forms of roots.

Beginning :

ओं नमो गणाधिपतये । ओं नमः शिवाय ।

मञ्जुघोषप्रसादेन धातूनां वृत्तिमारभे ।
बहुशोऽमून् यथा भीमः प्रोक्तवांस्तत्तदागमात् ॥

अप्रयुक्तत्वात् सत्तालक्षणस्यार्थस्य सर्वपदार्थव्यापकत्वेन प्राधान्याद् धातुसंज्ञायां भवतेरनुवादेन च भूप्रभृतिशब्दसन्तानवाचकस्य भूवादिशब्दस्य निपातनात् साधुत्वार्थमजन्तवदुन्नेतुं व्यापिभवतिमेव प्रथमं निर्दिशति—

भू सत्तायाम् । सतो भावः सत्ता । तत्परं सामान्यमपि भवत्यादिपदैः सत्तासाध्यस्वभावतयोच्यत इति क्रियावचनानां विधीयमानास्यापि भवति ।

End :

पुच्छादिषु धात्वर्थ इति सिद्धम् । णिजन्तादेव बहुलवचनादात्मनेपदम् । णिजेव वा बहुलवचनाद्विज्ञेय इति । पुच्छभाण्डचीवराण्णिङिति न वक्तव्यमित्यर्थः । सिद्धशब्दोऽयं मङ्गलार्थः । आदौ च वृद्धिशब्दः । मध्ये च टुओश्वि गतिवृद्ध्योरिति वृद्धिशब्द एव । एवं त्रिमङ्गलमिदं शास्त्रं समाप्तमिति । श्रीः ।

वृत्तिन्यासं समुद्दिश्य कृतवान् ग्रन्थविस्तरम् ।
नाम्ना तन्त्रप्रदीपं यो (वि?व्या)कृतास्तेन धातवः ॥

आकृष्य भाष्यजलधेरथ धातुनाम
पारायणक्षपणपाणिनिशास्त्रवेदी ।
कालापचान्द्रमततत्त्वविभागदक्षो
धातुप्रदीपमकरोज्जगतो हिताय ॥

कुटतिः पुटतिः कुजतिर्गुजतिर्गुडतिर्डिमातिश्चुरतिस्फुटतिः । अटतिस्फुटतिर्जुटतिः कडतिर्घतिः हृतिकुडटयतिघुटयः ॥ (?) तुडि थुडतिरुडतिव्रुडतिस्फुडयः । स्फुडिरुडतिळडति स्फुलिस्तरिर्भुरती धुवतिगुध्रवातिकुण्डयः (?)

Colophon :

इति श्रीमैत्रेयरक्षितकृतौ धातुप्रदीपे ... ... ...
धातुप्रदीपश्च परिसमाप्तः ।
शुभम् ।

ओं नमः कृष्णाय । ओं नमो महेश्वराय । ओं नमो दुर्गायै

ओं नमः सूर्याय । ओं नमो गणपतये ।

लिखितमिदं श्रीरघुनन्दनशर्मणः पुस्तकमिदं केनचित् । शकाब्दाः १४९०--त्रिमत्रीय २६ आषाढस्य ।

Author—Maitreyarakṣita.

Remarks—The inflected forms of the present and past participles of each verbal root are explained in this work. The colophon contains the date of transcription as 26th Karkadagom 743 M. E. The verse beginning with "वृत्तिन्यासं" in the closing portion discloses that the author has composed another treatise by name Tantrapradīpa. The following verses occur just after the colophon:

कृष्ण कृष्ण यदुवंशवतंस
कंसनाशकर संसारसार ? ।
पादसरोजयुगं तव सरवा ?
नाथ नमामि नमामि नमामि ॥

निवार्यतामालि किमप्ययं बटुः
पुनर्विवक्ष........रिताधरम् ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥

कुमा० ५. ८३.

दग्धं दग्धं त्यजति न पुनः काञ्चनं शुद्धवर्णं
छिन्नश्छिन्नस्त्यजति न पुनः स्वादुतामिक्षुखण्डः ।

घृष्टं घृष्टं त्यजति न पुनश्चन्दनं चारुगन्धं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥

साधुरेव न जहाति साधुतां
दुर्जनेन सह सङ्गतावपि ।
जन्मतः प्रभृति काकसङ्गतः
पश्य रौति मधुरता? कोकिलः ॥

नीचो वदति न कुरुते न वदति कुरुते च सज्जनो लोकः ।
शरदि गर्जति न वर्षति वर्षति वर्षासु निःस्वनो मेघः ॥

॥ परपक्षखण्डनम् ॥

No. 475. PARAPAKṢAKHAṆḌANAM.

C. O. L. No. 615.

Substance—Paper. Size — $11\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—29. 16 lines per page and 19 letters per line Script—Devanāgarī. No. of Granthas—232.

Owner—C. O.

Subject—Authenticity of Pre-Pāṇinian grammatical treatises.

Beginning :

श्रीः ।

सुदर्शनसमालम्बी सोऽहं नारायणोऽधुना ।
वैनतेय भवत्पक्षमाक्रम्य स्थातुमारभे ॥

तत्रायं संग्रहः—

पाणिन्युक्तं प्रमाणं नतु पुनरपरं चन्द्रभोजादिशास्त्रं
केऽप्याहुस्तद्धुषिष्ठं न खलु बहुविदामास्ति निर्मूलवाक्यम् ।
बह्वङ्गीकारभेदो भवति गुणवशात् पाणिनेः प्राक् कथं वा
पूर्वोक्तिं पाणिनिश्चाप्यनुवदति विरोधेऽपि कल्प्यो विकल्पः ॥

अत्र तावद् इन्द्रचन्द्रकाशकृत्स्नापिशलिशाकटायनादिपुरातनाचार्यविरचितानां व्याकरणानामप्रमाणत्वमेव, मुनित्रयोक्तस्यैव प्रामाण्यमिति केचित् पण्डितम्मन्या मन्यन्ते । तदपहसनीयमेव । चन्द्रादिवचसामनाप्तप्रणीतत्वाभावेन प्रामाण्यनिश्चयात् । पुरुषवचसामप्रामाण्यं तावदनाप्तप्रणीतत्वहेतुकमेवेति चन्द्रादिशास्त्राणामप्रामाण्यं वदद्भिस्तेषामनाप्तत्वे प्रमाणं वक्तव्यम् ।

End :

यत्तु कौमुदीकारादिभिश्च स्वबुद्धिविस्ता(रं वा?रबो)धनार्थमेव मतान्तरप्रदर्शनं कृतं न प्रामाण्यादिति । तदप्यबद्धम् । अप्रमाणभूतस्य कथने स्वबुद्धिमान्द्यस्यैव प्रकाशनप्रसङ्गाद् इति । एवं परोक्तावस्मदुक्तविरुद्धोंऽशः खण्डितः ।

ततोऽन्यग्रन्थसन्दोहैर्मदुक्तान्येव साधयन् ।
वैनतेयो ममात्यन्तं बन्धुरेवेति शोभनम् ॥

Colophon :

हे श्रीमच्चोलदेशप्रथितबुधवराः शब्दशास्त्रान्तराणां
कोऽप्यप्रामाण्यमूचे किमपि निगदितं तत्र चास्माभिरेवम् ।
कौमुद्यां धातुवृत्त्यादिषु कथिततया वैदिकाङ्गत्वसाम्याद्
युष्माकं सम्मतं स्यादिति लिखितामिदं शोधयध्वं महान्तः ॥

श्रीसोमेश्वरदीक्षित.........विद्वत्कुलाग्रेसराः
मीमांसाद्वयशब्दतर्ककुशला युष्मानधृष्योन्नतीन् ।
तत्त्वज्ञान् करुणानिधीन् प्रशमिनः श्रुत्वेदमभ्यर्थये
यत्किञ्चिल्लिखितं मयात्र तदिदं स्वीकार्यमार्यात्मभिः ॥

युष्माभिः खलु कामदेवविजये व्यालेखि कक्ष्याक्रम-
स्तं द्रष्टुं भृशमुत्सुका वयमतः सम्प्रेष्यतां साम्प्रतम् ।
युष्मादृक्षविचक्षणोक्तिपदवीसंप्रेक्षणेन क्षणा-
दस्माकं खलु बुद्धिशुद्धिरुदयेदित्येष तत्राशयः ॥

प्रयुक्तहेतौ खलु कामदेव-
कृतोऽस्य भङ्गः पटुदर्शनेन ।
सोमेश्वराख्याग्रगणस्य चैतत्
सर्वज्ञभावस्य च युक्तरूपम् ॥

युष्मद्वंश्यधृतः खलु कटकभुवि त्रायते भोगिराजो
वाणी वेणीविधृतामपि सुस्मरितः कङ्कटीको जटायाः ।
इत्येवं यज्ञनारायणविबुधमहादीक्षिताः शत्रुवर्ग-
त्राणाहेतस्य तस्याप्यपहरथ धिया साधु सर्वज्ञगर्वम् ॥

युष्मास्वेव क्षितीशो विपुलनयनिधिस्तिष्ठते राज्यदृष्टौ
तिष्ठध्वे यूयमेव प्रथितबुधजने सन्दिहाने समेते ।
युष्मभ्यं तिष्ठते कश्चिदशगुरुसमानोऽपि युष्मादृगन्यः
प्रज्ञालो यज्ञनारायणविबुधमहादीक्षिता वीक्ष्यते कः (?) ॥

अस्वस्थाः केरलस्थाः स्वयमतिमृदवस्तत्र चाहं विशेषात्
सर्वे दूरप्रचारे खलु शिथिलधियः किं पुनर्देशभेदे ।
एवंभावेऽपि दैवात्क्वचन समये कल्यता कल्यते चेत्
प्रज्ञाब्धीन् यज्ञनारायणविबुधमहादीक्षितानीक्षिताहे ॥

Author—Nārāyaṇabhaṭṭatiri.

Remarks—Yajñanārāyaṇa, referred to in the colophon, was a Dīkṣita hailing from Coḷadeśa.

---

## ॥ परिभाषाप्रदीपार्चिः ॥

### No. 476. PARIBHĀṢAPRADĪPARCI.

C. O. L. No. 1256.

Substance—Palm leaf. Size—$14\frac{1}{2}''\times2''$. Leaves—44. 14 lines per page and 50 letters per line. Script—Grantha. No. of Granthas — 1925.

Owner—C. O.

Subject—Exposition of grammatic Paribhāṣas.

Beginning:

अमन्दहृदयानन्दनिदानं शिवयोश्चिरम् ।
नमस्कुरुत हेरम्बं निष्प्रत्यूहफलाप्तये ॥
वल्लकीपुस्तककरां पुण्डरीकासनास्थिताम् ।
शारदां नीरकुन्देन्दुधवलां भावयेतराम् ॥
कृत्वा पाणिनिसूत्राणां मितवृत्त्यर्थसङ्ग्रहम् ।
परिभाषाप्रदीपार्चिस्तत्रोपायो निरूप्यते ॥

तत्र तावत् परिभाषात्वं नाम लिङ्गवत्त्वे सति सन्दिग्धार्थनियामकत्वम् । दोधीवेवीटामित्यादेर्न धातुलोप इत्यादौ निषेधः किमिक्परिभाषाया उत गुणवृद्ध्योरिति सन्दिग्धार्थस्य नियामकत्वात् परिभाषात्वं स्यादतः सत्यन्तम् ।

End:

उत्तरपदाधिकारे निषेधस्त्वपञ्चम्या इति निषेधस्यैकदेशानु-

वादः । यदि तु परसप्तमीनिर्देशेऽपि षष्ठीनिर्दिष्टकार्यिणैवाकाङ्क्षा-निवृत्तेः पञ्चम्यन्तावधेरेवाकाङ्क्षाभावः, सुपि चेत्यादौ त्वङ्ग-स्येत्यनेनान्वयापत्तेर्न तदन्तविधिः, तदा घरूपेत्यत्रोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिनिषेधः । अत एव लेखग्रहणेन ज्ञापकेन भाष्ये पृथगेव साधितः सः । अपश्चम्या इति निषेधस्य तु रदाभ्यामित्यादावेव प्रयोजनमिति दिक् ।

Colophon :

परिभाषाप्रदीपार्चिष्युदयङ्करदर्शिते ।
प्रथमो व्याकृतोऽध्यायः सङ्गतः सङ्गतः सताम् ॥
न तुष्यन्ति मितोक्त्यैके परे मूढा बहूक्तिषु ।
करवाणि ततो वाणि सकलावर्जनेऽञ्जलिम् ॥

इति नानापाठकीयपरिभाषाप्रदीपार्चिषि प्रथमोऽध्यायः । हरिः । ओम् । शुभमस्तु । गुरवे नमः । श्रीअनन्तपद्मनाभाय नमः ।

Author—Udayaṅkaranāpāṭhaka.

Remarks— Bhaṭṭoji Dīkṣita, Śabdaratnākara, Rāmacandrācārya, Bhāskara, Kāvyaprakāśikā etc. are made mention of in the body of the work. The passage "विस्तरस्त्वस्मत्कृतबहुव्रीहिवादमञ्जिकायां स्पष्टः" seen at the end of the explanation of the Paribhāṣā "प्रधानाप्रधानयोः" indicates that the author must have composed Bahuvrīhivādamañjikā as well. It may be observed on page 65 (C. C. Vol. I.) that the author was a tutor in Benares and responsible for the inditement of several

other works viz. Jyotsnā (Śabdenduśekhara ṭīkā) Prādivaca, Laghuśabdenduśekharaṭīkā, Yogavṛttisaṅgraha etc. Only the 1st Adhyāya is embodied herein.

---

## ॥ परिभाषार्थसंग्रहः ॥

## No. 477. PARIBHĀṢĀRTHASAṄGRAHA.

C. O. L. No. 2372.

Substance—Palm leaf. Size—9" × 1½". Leaves—57. 9--11 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Owner—Tuppan Tuppan Nambūripād, Punnorkoṭṭu mana.

Subject—Beginning: Same as No. 733 A, DCSM MPL.

End :

पूर्वं धातुरुपसर्गेण युज्यत इति केचित् । अस्मिन् दर्शने संस्कृषीष्टेत्यत्र इडभावः । ऋतश्च संयोगादेरित्यत्रोपदेशपदानुवृत्त्योपदेशे संयोगादेः स्तृप्रभृतेर्ग्रहणात् संस्क्रियेत्यत्र गुणाभावः । नित्यं छन्दसीत्यतो नित्यग्रहणानुवृत्त्या गुणविधिसूत्रेण ऋतश्चेत्यनेन नि(त्य)संयोगादेः स्तृप्रभृतेर्गुणविधानात् ! इदं तु ध्येयम् । इमौ पक्षौ तत्र तत्र लक्ष्यानुरोधादाश्रीयेते इति । उभयथा भाष्ये व्यवहारो दृश्यत इति ।

Colophon :

इति श्रीमद्रत्नगिरिदीक्षितपुत्रेण वैद्यनाथशास्त्रिणा विरचितः परिभाषार्थसङ्ग्रहः सम्पूर्णः । स्थाणुमूर्तये नमः ।

अप्पादीक्षितनीतोऽयं पाण्ड्येभ्यः केरलाक्षरैः ।
रामेण लिखितो ग्रन्थः कोळम्बे पुण्यधीमिते ॥

महाराजपुरे चोलेष्वयं ग्रन्थः स्थितैः कृतः ।
रामभद्रमखिच्छात्रवैद्यनाथाख्ययज्वभिः ॥

शब्दशास्त्रमनधीत्य यः पुमान्
वक्तुमिच्छति वचः सभान्तरे ।
बन्धुमिच्छति वने मदोत्कटं
हस्तिनं कमलनाळतन्तुना ॥
श्रीविद्वच्छासाय नमः ।

Author--Same as No. 733 A, DCSMMPL.

Remarks—The following colophons seen at different places in the Ms. disclose that the work has another title Paribhāṣāmañjarī :

इति रत्नगिरिदीक्षितपुत्रस्य वैद्यनाथशास्त्रिणः कृतौ परिभाषामञ्जर्यां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

इति परिभाषामञ्जर्यां सप्तमस्य प्रथमः पादः ।

A commentary, Paribhāṣāmañjarī, by name, on Paribhāṣenduśekhara of Nagojibhaṭṭa, composed by Bhīma, has been referred to on page 329, CC. Vol. I. The author refers to the inditer of Manoramā and to works such as Śārīrakamīmāmsabhāṣya, Vajraṭaṅkam etc. in the course of the work. The verse beginning with "महाराजपुरे" indicates that the author belonged to Mahārājapura. The Ms. was written in 921

M. E. as expressed in the chronogram "कोलम्बे पुण्यधीमिते". The following portion :

"अधिकं परिभाषोपन्यासेऽस्मदीये द्रष्टव्यम् ।"

"अत्र विचारः शब्दकौमुदीव्याख्यानेऽस्माभिः कृतः" ॥

occurring on Fol. 40 and 8 respectively discloses that the author has composed two other works, Paribhāṣopanyāsa and Śabdakaumudīvyākhyā.

---

## ॥ परिभाषार्थसंग्रहः ॥

### No. 478. PARIBHĀṢĀRTHASAṄGRAHA.

C. O. L. No. 538.

Substance—Palm leaf. Size—7⅜"×1⅝". Leaves—120. 7—10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1440. Incomplete.

Owner—Subrahmoṇyan Śaṅkaran Mūttatu, Ettumānūr.

Subject etc.—Same as No. 477.

---

## ॥ परिभाषार्थसंग्रहः ॥

### No. 479. PARIBHĀṢĀRTHSAṄGRAHA.

C. O. L. No. 950.

Substance—Palm leaf. Size—9½"×1½". Leaves—63. 9 lines per page and 32 letters per line.

Script—Malayāḷam. No. of Granthas—1150. Incomplete.

Owner—Nārāyaṇan Nārāyaṇan, Vembanāṭṭillom, Ambalappuzha.

Subject—Beginning: Same as No. 477.

End:

अनित्या चेयं, सङ्ख्याव्ययादेरित्यादिग्रहणात् । तद्धि द्विविधोध्नीति त्रिपदबहुव्रीहौ ङीबर्थम् । यद्यनु(देब?वादे) परिभाषा न स्यात्, तदा संख्याव्ययादिति निर्देशेऽपि तस्मादित्युत्तरस्येत्यभावात् संख्याव्ययवात् परो य ऊधःशब्दस्तदन्ताद् बहुव्रीहेर्ङीबिति सू-(त्रोत्रे?त्रार्थे) द्व्यूध्नी द्विविधोध्नीति सिद्धे व्यर्थं स्यात् । अतोऽनित्या । तेन पञ्चम्या निर्देशे (य?त)स्मादिति परिभाषाप्रवृत्त्या द्व्यूध्नीत्यत्रैव स्यान्न तु द्विविधोध्नीति । आदिग्रहणे तु संख्याव्ययादिर्य ऊधश्शब्दान्तबहुव्रीहिरिति सूत्रार्थे इष्टं सिध्यति । अनित्यत्वफलमचो रहाभ्यामिति सूत्रे अजव्यवहितपराभ्यां रेफहकाराभ्यामव्यवहितस्य यरो द्वित्वमित्यर्थात् ... .... ....
... ... ..

Colophon:

इति परिभाषार्थसङ्ग्रहे सप्तमस्य द्वितीयः पादः ।

Author—Same as No. 477.

Remarks—This Ms. consists of 88 *Paribhāṣās* but the 20 *Paribhāṣās* from 28—48 are missing. The first 33 leaves are numbered and a fresh numbering is begun in the latter half beginning from the 48th *Paribhāṣā*.

## ॥ परिभाषावृत्तिव्याख्या ॥

### No. 480. PARIBHĀṢĀVṚTTIVYĀKHYĀ.

C. O. L. No. 105.

Substance—Palm leaf. Size—18″ × 1½″. Leaves—190. 8 lines per page and 54 letters per line. Script—Grantha. No. of Granthas—5200. Incomplete.

Owner—Karamana Padmanābha Aiyar.

Subject—Same as No. 477.

Beginning:

....श्रयणामिति भा... ... ... त्यभिव्यञ्जकावयव-संस्थाना...नात् अर्थाभावेऽपि कुक्कुटशब्दः स्त्रीप्रत्ययश्च... .... ... ... दिकारकमात्र इति प्रकृतेरनर्थकत्वेऽपि यथा स्वपोषं पुष्णाती .... त्युपगमे दोषमाह—एवमपीति । तदन्वितमिति । सिद्धान्ते तदन्वितत्वेनाभि.... .... ....

End:

ननु पूर्वं धातुरुपसर्गेण युज्यत इति पक्ष एव साधुः । कुतः । अत एव अधीते अध्येतीत्यत्र धातूपसर्गाभ्यामध्ययनस्मरणयोरुपलम्भः । पूर्वं धातुः साधनेन युज्यत इति पक्षस्तु नोपपद्यते । अधीते अध्येतीत्यत्र धातूपसर्गाभ्यां पृथगर्थानुपलम्भादिति ।

Colophon:

इति श्रीयज्ञरामदीक्षितपुत्रस्य रामभद्रदीक्षितस्य कृतौ परिभाषावृत्तिव्याख्यायां णौचङिपादः ।

Author--Rāmabhadra Dīkṣita, son of Yajña Rāma Dīkṣita.

Remarks—The leaves are much damaged. Both its beginning and end are missing. The work has been printed in Benares.

---

## ॥ परिभाषेन्दुशेखरव्याख्या ॥

## No. 481. PARIBHĀṢENDUŚEKHARAVYĀKHYĀ.

C. O. L. No. 1906.

Substance—Palm leaf. Size—15″ × 2″. Leaves—93. 12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—4500.

Owner—Vāsudeva Śarma, Suchindram.

Subject—Same as No. 477.

Beginning :

हरिः । श्रीगणपतये नमः । । अविघ्नमस्तु ।

विश्वेश्वरं गुरुं नत्वा ध्यात्वा च हृदि भारतीम् ।
विवृणोमि यथामेधं परिभाषेन्दुशेखरम् ॥

गुणान् गृह्णन्तु सुधियो मत्कृतौ दोषजुष्यपि ।
कठिनाश्मपरीतायां खनौ मणिगणानिव ॥

दोषान्वितोऽपि तनुते मत्प्रबन्धः सतां मुदम् ।
सुधायुक्तिभिराश्लिष्टकलङ्कोऽपि विधुर्यथा ॥

दोषभाजमपि मत्कृतिं बुधा
भूषयन्तु शिरसा हि सादरम् ।

दूपितामतनुकण्टकं रजो-
रूपितामपि सुकेतकीमिव ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थम् एतच्छास्त्र-मूलभूतचतुर्दशसूत्रोपदेष्टृत्वेन समुचितं साम्बशिवनत्यात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेति। ब्रह्मेति। बृंहेर्नो अच्चेति व्युत्पादितोऽयम्। कुरुत इति। यशमः शिष्याणामनायासज्ञानजन्यसुकृतस्य चात्मगामित्वेनात्मनेपदम्।

End:

ननु तद्भाष्यं यङ्लुग्विषयकमेवेति तत्र दोषोपन्यासेन तत्सि-द्ध्यर्थं श्रूयमाणकादीत्यर्थस्यैव अङ्गीकारेण सिद्धान्ते परिभाषावा-रणमित्याशय इति न भवदिष्टार्थसिद्धिरत आह—भाष्ये त्विति। उपक्रमे लोपपदेन (उप?)स्थानिवत्त्वाश्रयणेन चेत्यर्थः। ननु लो-पपदस्य व्यापकत्वात् नोपक्रमविरोधः। समाधानस्य लोपमात्रा-विषयत्वाद् नोपसंहारविरोधोऽपीत्यत आह—किञ्चेति। अदोषा-दिति। तत्र दोषानुपन्यासमूलकपरिभाषाङ्गीकारापत्तिरूपदोषाभा-वादित्यर्थ इति सर्वं शिवम्।

Colophon:

Author:

Remarks—Same as No. 357 b.

---

## ॥ परिभाषेन्दुशेखरव्याख्या ॥

## No. 482. PARIBHĀṢENDUŚEKHARAVYĀKHYA.

C. O. L. No. 2375.

Substance—Palm leaf. Size—14″×1¾″. Leaves—34

180. 10 lines per page and 62 letters per line. Script—Grantha. No. of Granthas—7000.

Owner—Kuñjiraru Godaru Nambūripād, Piravam.

Subject—Same as No. 477.

Beginning :

श्रीगुरुभ्यो नमः ।

गुरुं विश्वेश्वरं नत्वा ध्यात्वा च हृदि भारतीम् ।
विवृणोमि यथामेधं परिभाषेन्दुशेखरम् ॥
प्रवृत्तिमेतां दृष्ट्वा मे हसत्यात्मापि लज्जया ।
तथापि देशिकदया वाचालयति साम्प्रतम् ॥
दोषान्वितोऽपि तनुतां मत्प्रबन्धः सतां मुदम् ।
सद्युक्तिभिरनुश्लिष्टकलङ्कोऽपि विधुर्यथा ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये एतच्छास्त्रमूलभूतचतुर्दशसूत्रोपदेष्टृत्वेन प्राचार्यत्वात्साम्बशिवस्यैतद्ग्रन्थादौ समुचितं नत्यात्मकं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेत्यादिना । यशसः शिष्याणामनायासज्ञानजन्यसुकृतस्य चात्मगामित्वाद् आत्मनेपदम् । बालानामिति । बालत्वं च भाष्यादितः परिभाषार्थग्रहणसमर्थत्वे सति तद्व्युत्पित्सुत्वम् ।

End :

न चैवमपि उरःकेणेत्युपपदसमासे दोष एव । अत्रोत्तरखण्डेन सह केत्येतावन्मात्रस्य उपपदनिमित्तकैकार्थभावस्य नित्यत्वेन स्वातन्त्र्येण प्रयोगानर्हत्वेन तस्य नव्योक्तार्थवत्त्वाभावेन प्रातिपदिकत्वासंभवात् पदत्वयोग्यताया अप्यभावादिति वाच्यम् । मूलकेनोपदंशं भुङ्क्ते इत्यादौ 'तृतीयाप्रभृतीन्यन्यतरस्यामि'त्यनेन तृती-

याग्रभृत्युपपदानाममन्ताव्ययेन सह विकल्पेन समासविधानेन तत्र विषये कृदन्तोपपदसमुदाये एकार्थ... ... .... ...

Colophon :

Author :

Remarks—The last two leaves contain mantras in praise of the Goddess Sarasvatī. Two leaves in the middle are shorter in size. The work is identical with No. 1473 DCSM. Vol. III, wherein the title of the commentary is given as Sarvamaṅgalā and name of the author as Śeṣaśarmā a court pandit of Kṛṣṇarāya of Mysore.

॥ परिभाषेन्दुशेखरव्याख्या ॥

No. 483. PARIBHĀṢENDUŚEKHARAVYĀKHYĀ.

C. O. L. No. 2258.

Substance—Palm leaf. Size—17⅞″ × 1⅝″. Leaves—137. 10 lines per page and 72 letters per line. Script—Grantha. No. of Granthas—6000. Incomplete.

Owner—Gangādharan Rāma Varma Tirumulpād, Thekkavilakam, Prakkad.

Subject—Same as No. 477.

Beginning—Same as No. 482.

End :

प्राचीनमते लक्ष्यानुरोधेन व्यक्तिपक्षमाश्रित्य उपपदमतिङ् इत्यत्र उपपदशब्दे उपपदप्रकृतिकं सुबन्तमुपपदं सुबन्तमित्यर्थद्वयाङ्गीकारवद् अत्रापि लक्ष्यानुरोधेन क्वचिद् वाक्यभेदेन सुपेत्यस्य सम्बन्धेन कृदन्तप्रकृतिकसुबन्तेनापि समासाङ्गीकारेणानुरोधात् । नचैवमयःकृतीत्यादौ 'सोऽपदादावि'ति सत्वापत्तिरुत्तरपदे सुबुत्पत्त्यभावेनाकारस्यापदादित्वादिति वाच्यम् । 'कर्तृकरण' इति कारकेण समासस्यानित्यत्वेन क्रीतशब्दस्यापि स्वातन्त्र्येण प्रयोगार्हत्वेनार्थवत्त्वात् ।

Colophon :

Author :

Remarks—This Ms. extends only up to the 72nd *Paribhāṣā*.

---

## ॥ पाणिनीयसूत्रलघुविवृतिः ॥

No. 484. PĀṆINĪYASŪTRALAGHUVIVṚTI.

C. O. L. No. 537.

Substance—Palm leaf. Size—$10\frac{3}{4}'' \times 1\frac{7}{8}''$. Leaves—93. 11—12 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2645. Incomplete.

Owner — Nārāyaṇan Rāma Piṣāroḍi, Western Piṣaram, Kidaṅgūr.

Subject—Beginning: Same as No. 803, DCSMMPL.

End:

द्वौ षष्ठसप्तमौ भावे सावयं सयूभवम् ।
अन्यवश्येऽत्र नवमो शष्ठ्यादि ? इजि तत्परः ॥
एकादशोऽसौ मयटि भवेऽर्थयति तत्परौ ।
चतुर्दशो भवार्थेऽणि तत्परस्त्वाणि ङीपि च ॥
षोडशो मयटीत्येवं दिङ्मात्रमिह दर्शितम् ।

Colophon:

वृत्तावस्यां लघीयस्यां षष्ठाध्याये गतः स्फुटम् ।
तुरीयश्चरणः पद्यैरश्वाग्निशशिभिर्मितः ॥

Author—Same as No. 803, DCSMMPL.

Remarks—The Ms. extends up to the end of 6th chapter. The work is also known as Pāṇinīya-laghuvṛtti.

---

## ॥ पाणिनीयसूत्रलघुविवृतिः ॥

No. 485. PĀṆINĪYASŪTRALAGHUVIVṚTI.

C. O. L. No. 909.

Substance—Palm leaf. Size—$16\frac{1}{3}'' \times 2''$. Leaves—52. 14 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—3000.

Owner—Muñjira Maṭhom, Vilavancode.

Subject—Beginning—Same as No. 484.

End :

स्वरितो वाप्युदात्तो वा परो यस्य न तस्य तु ।
स्वरितोऽत्रानुदात्तस्य गार्ग्याद्यपरदर्शने ।
पूजार्थं मङ्गलार्थं वाप्यनेकाचार्यकीर्तनम् ॥

यथैवोदयशब्दोऽपि परार्थेऽत्र प्रयुज्यते ।
शास्त्रस्य मङ्गलान्तत्वसिद्ध्यर्थमिति तद्विदः ॥

मङ्गलादित्वसिध्यर्थमादौ वृद्धिपदं यथा ।
सावर्ण्यार्थमकारो यो विवृतोऽत्र प्रतिश्रुतः ॥

स तु संवृत एव स्यात् प्रयोगेष्वित्यदर्शयत् ।
उच्चार्यन्तेऽत्र भगवान् स्फुटं पाणिनिरद्वयम् (?)॥

Colophon :

वृत्तावस्यां लघीयस्यामध्याये पुनरष्टमे ।
तुरीयश्चरणः प्रायात् पद्यैः शैलाब्धिभिर्मितः ॥

उज्जह्रे पाणिनीयस्मृतिविषयमिदं काशिकागाधसिन्धोः
साधीयो वृत्तिरत्नं लघुधिषणमनोहारि सद्वृत्तरम्यम् ।
योऽसौ भूयोऽपि रामस्मृतिदलितसमस्ताशुभो रामशालि-
क्षेत्रावासीह कश्चिद् व्यधित लघुतरां वृत्तिमेनां द्विजन्मा ॥

हृद्यैः पद्यैरुदारां लघुमतिरमणीं पाणिनीयस्य लघ्वीं
वृत्तिं द्रागारचय्य क्षितिगगनवियच्चन्द्रसीतांशुमा-
[नाम् ।
भूयो लघ्वीं ततोऽपि स्फुटविषयपदार्थाशयां रामशालि-
क्षेत्रावासी द्विजन्मा समरचदिमां स्वाशियशैलाशिव-
[मुद्राम् ॥

भाष्याद्यैर्विप्रकीर्णं बहुविधमखिलं तन्त्रमेतद्विपश्चित्
संगृह्यैकत्र हस्तामलकमिव पुरोऽदर्शयत्काशिधामा ।
तत्तादृक्पद्यवृन्दैः प्रथममथ लघूकृत्य तद्ग्रामशालि-
क्षेत्रावासीह पश्चात्समललघुतरत्केरलेषु द्विजन्मा ॥

भूत्यै स्यादिन्दुमौलिर्जयति स भगवान् पाणिनिर्विश्ववन्द्यो
जीयात्कात्यायनोऽसौ दिशतु मम शुभं भाष्यकृद्योगिराजः ।
दद्याद्भद्रं दयालुर्हरिरमितमतिः कय्यटः कामदायी
भूयान्भूत्यैनितमास्ते गुरव इह मम श्रेयसे भूयसे स्युः ॥

पाणिनिवररुचिफणिनो हरिहरदत्तौ हरो जयादित्यः ।
वामनकय्यटभोजाः शास्त्रकृतोऽमी प्रसीदन्तु ॥

निशाचरतमोलीनजगदुन्मेषहेतवे ।
जानकीजानये तस्मै तेजसां निधये नमः ॥

समाप्तेयं लघुवृत्तिः ।

वन्दामहे महेशानचण्डकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥
श्रीमत्कण्डरमाणिक्यवास्तव्येन विपश्चिता ।
अलेखि राघवेणेयं लघिष्ठा वृत्तिरुत्तमा ॥

Author—Same as No. 484.

Remarks—The scribe's name is mentioned as Rāghava of Kaṇḍaramāṇikka Village, in the last verse of the colophon.

---

## ॥ पाणिनीयसूत्रलघुविवृतिः ॥

### No. 486. PĀṆINĪYASŪTRALAGHUVIVṚTI.

C. O. L. No. 1379.

Substance—Palm leaf. Size—14″ × 2″. Leaves—102. 9—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Owner—Tuppan Tuppan Nambūri, Punnarkottu Maṭhom, Kunnattunād.

Subject etc.—Same as No. 485.

Remarks—The last two verses in the colophon under No. 485 are missing in this Ms.

---

## ॥ पाणिनीयसूत्रलघुविवृतिः ॥

### No. 487. PĀṆINĪYASŪTRALAGHUVIVṚTI.

C. O. L. No. 1750.

Substance—Palm leaf. Size—16″ × 2″. Leaves—112. 9 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—3500.

Owner—Nārāyaṇan Nārāyaṇan Iḷayatu, Vembanāttu Illam, Ambalappuzha.

Subject etc.—Same as No. 485.

Remarks—Same as No.359 b.

---

## ॥ पाणिनीयसूत्रलघुविवृतिः ॥

No. 488. PĀṆINĪYASŪTRALAGHUVIVṚTI.

C. O. L. No. 324.

Substance—Paper. Size—$13\frac{1}{2}'' \times 3\frac{1}{2}''$. Pages—271. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—3000. Complete.

Owner—C. O.

Subject etc.—Same as No. 485.

## ॥ पाणिनीयसूत्रलघुविवृतिः ॥

No. 489 A. PĀṆINĪYASŪTRALAGHUVIVṚTI.

C. O. L. No. 2067 A.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—74. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2350. Incomplete.

Owner—Keśavan Narāyaṇan Nambūri, Maṅgalatu mana, Tiruvalla.

Subject—Same as No. 484.

Beginning :

.... ... ... वो नायो ग्रहेस्तु वा ।
ग्राहो ग्रहो भवो भावो भवतेरपि दृश्यते ॥

गेहे वाच्ये ग्रहः कः स्याद् गृहं वेश्म निगद्यते ।
धातोः शिल्पिनि वाच्ये ष्वुन् नर्तकः खनको यथा ॥

End etc.—Same as No. 485.

Remarks—This Ms. extends from the 1st *pāda* of the 3rd chapter to the 8th chapter. The first 19 leaves are missing. No. 484 may also be perused with advantage.

---

## ॥ कुवलयानन्दः ॥

### No. 489 B. KUVALAYĀNANDA.

C. O. L. No. 2067 B.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—19. 10 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—900. Incomplete.

Owner—Same as No. 489 A.

Subject—Definition and illustration of all the figures of speech based on sound and meaning.

Author—Appayya Dīkṣita, son of Raṅganāthādhvaryu.

Remarks—This Ms. begins on a fragment of the explanation of the figure "मिथ्याध्यवसिति". It is printed in the NSPB.

35 leaves embody a description in Malayāḷam on the planetary movements and sculpture. 10 more leaves containing the eulogies on Gaṇapati, Guru and Saraswatī are also attached to this Ms.

---

## ॥ प्रक्रियाकौमुदी ॥

### No. 490. PRAKRIYĀKAUMUDĪ.

C. O. L. No. 382.

Substance—Palm leaf. Size—$10\frac{1}{4}'' \times 1''$. Leaves—128. 10 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—3600. Complete.

Owner—Citran Nambūri, Vezhapparambu.

Subject—Beginning : Same as No. 739, DCSMMPL.

End :

नीचैःकृत्य नीचैःकारं वा अप्रियं ब्रूत इत्यादयः । दिङ्मात्रमेतदुक्तम् ।

Colophon :

इति प्रक्रियाकौमुदी समाप्ता ।

Author—Same as No. 738, DCSMMPL.

Remarks—The work has been published in the Bombay Sanskrit Series.

---

## ॥ प्रक्रियाकौमुदी (प्रसादाख्यव्याख्योपेता) ॥

### No. 491. PRAKRIYĀKAUMUDĪ
with the commentary, Prasāda.

C. O. L. No. 14.

Substance—Paper. Size—13″ × 8″. Pages—1476. 19 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—15300.

Owner—C. O.

Subject—Beginning: Same as No. 761, DCSMMPL.

End :

वातमज इति । शप् । मुम् । खित्य । पदाधिकारेऽपीह तदन्तग्रहणं स्यात् अनव्ययस्येत्येष(?)निषेधाद् ज्ञापकादित्यभिप्रेत्याह—खिदन्त इति। मुमा ह्रस्वबाधनं न । अन्यथा ह्रस्वविधानमनर्थकं स्याद् इत्याह—ततो मुमिति। शुनिन्धयतीति । (?) लीलां स्कन्दति । शप् । गन्धं जहातीति विग्रहः । नासिका । अल्पाच्तरस्यापूर्वनिपाताल्लक्षणव्यभिचाराद् ज्ञायते यथासङ्ख्यलक्षणस्याप्यत्र व्यभिचार इति चेतसि कृत्वाह—स्तनधेटः । नासिकायां ध्माधेटोरिति (?) ।

Colophon :

इति भावकर्मप्रक्रिया समाप्ता ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणप्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन् प्रसादे निरगमदमला प्रक्रिया ण्यन्तसंज्ञा ॥

Author—Text : Same as No. 739, DCSMMPL.

Com : Viṭṭhalācārya.

Remarks—The commentary is noticed as No. 1349 DCSM. Madras, Vol. III. The work has been published in Benares.

---

## ॥ प्रक्रियादीपिका ॥

## No. 492. PRAKRIYĀDĪPIKĀ.

C. O. L. No. 673.

Substance—Paper. Size—11″ × 9″. Pages—193. 20 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—2500. Incomplete.

Owner—C. O.

Subject—The derivation of words.

Beginning :

सृष्टिस्थित्यादिकर्तारमीश्वरं चाम्बिकामपि ।
नत्वा गणाधिपं वक्ष्ये प्रक्रियादीपिकां पराम् ॥

अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति प्रत्याहारसूत्राणि। प्रथममणित्येप प्रत्याहारो गृह्यते। अणिति प्रत्याहारे सति अइउणित्यास्मिन् सूत्रेऽकारमादिवर्णं विधाय तत्र सूत्रे णकारमन्त्यं च कृत्वान्त्यस्य णकारस्य हलन्त्यमितीत्सं-

ज्ञायां तस्य लोप इति लोपः प्रयोजनम् आदिरन्त्येन सहेतेति प्रत्याहारग्रहणम् ।

End :

युजिर्—युयोज युयुजतुः युयुजुः । युयोजिथ युयुजथुः युयुज । युयोज युयुजिव युयुजिम ।

युयुजे युयुजाते युयुजिरे इत्यादि ।

तनु—ततान तेनतुः तेनुरित्यादि ।

असंयोगान्तत्वात् कित्त्वम्... .... ....

Colophon :

Author :

Remarks—This is identical with No. 3073, TCM. Vol. IV. Part I A. Though No. 2541, TCM. Vol. III. Part I B also bears the same title the work therein is different and is attributed to one Appan Nainārya, son of Veṅkaṭārya of Śrīvatsagotra.

---

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 493 A. PRAKRIYĀSARVASVAM.

C. O. L. No. 205 A.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—191. 10 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—5372.

Owner—Pantalam Palace.

Subject—Same as No. 738, DCSMMPL.

Beginning etc.—Same as No. 743, DCSMMPL.

Remarks—The following portion occurs after the colophon :

കൊല്ലം തൊള്ളായിരത്ത ഇരുപത്തഏഴാമത വൃശ്ചികമാസം പതിനഞ്ചാന്തീയതി പൂരോരുട്ടാതിയും ശനിയാഴ്ചയും പൂൎവ്വപക്ഷത്തനവമിയുംകൂടിയ ദിവസം എഴുതിത്തീൎത്ത ഗ്രന്ഥമിത.

ഇത കൂട്ടായിലെ നീലകണ്ഠൻനമ്പൂതിരിടെഗ്രന്ഥം ഇട്ടിലിഖിതം പുസ്തകം.

राजराजगृहे नीलकण्ठेन लिखितमिदं पुस्तकम् ।

---

## ॥ नादरूपविवरणम् (केरलभाषाव्याख्योपेतम्) ॥

No. 493 B. NĀDARŪPAVIVARAṆAM
with Malayāḷam commentary.

C. O. L. No. 205 B.

Substance——Palm leaf. Size—$9\frac{1}{2}'' \times 2''$. Leaves—3. 9 lines per page and 42 letters per line. Script--Malayāḷam. No. of Granthas — 60. Incomplete.

Owner—Same as No. 493 A.

Subject—The origin of sound.

Beginning :

श्रीगणपतये नमः ।
यस्मादेते विस्फुटं प्रस्फुरन्तो
वर्णाः सम्भूयानुयातार्थयाताः ।

विश्वात्मत्वेनास्तिताावत् प्रपद्ये
ज्योतिर्मात्रावैभवं नादरूपम् ॥

അൻപത്തൊന്നക്ഷരവും പാഞ്ചഭൌതികമായിരിക്കുന്ന ഈ പ്രപഞ്ചവും ബ്രഹ്മാവിഷ്ണുമഹേശ്വരന്മാരും പരാശക്തിയും നാദരൂപികളാകയാൽ നാദരൂപത്തിന്നു് നമസ്കാരം. ഇതു് വസ്തുനിർദ്ദേശം. "ആശീർന്നമസ്ക്രിയാ വസ്തുനിർദ്ദേശോ വാപി തന്മുഖം." ആശിസ്സുതാൻ നമസ്ക്രിയതാൻ വസ്തുനിർദ്ദേശം താൻ ഗ്രന്ഥാരംഭത്തുങ്കൽ വേണ്ടുവതു്, അതിൽ വസ്തുനിർദ്ദേശമിതു്.

End :

ഷഡ്ജാദിസ്വരങ്ങൾ ഉണ്ടായ പ്രകാരത്തെ ചൊല്ലുന്നു.

वर्गाष्टकं तु सम्प्राप्य अकारादियशान्तकम् ।
वर्णमात्रासमायुक्तमुद्धरेत् स्वरसप्तकम् ॥

അകാരം ആദിയായി യകാരശകാരമന്ത്യമായിരിക്കുന്ന എട്ടു വർഗങ്ങളെക്കൊണ്ടു് വർണ്ണത്തോടും മാത്രയോടും കൂടെ ഉദ്ധരിക്ക സപ്തസ്വരങ്ങളെ. വർഗാഷ്ടകങ്ങളവറേ ചൊല്ലുന്ന ഇതു്. അ-ക-ച-ട-ത-പ-യ-ശ ഇവ വർഗാഷ്ടകങ്ങൾ. സ്വരങ്ങൾ അവർഗമാകുന്നതു് (കവർഗ്ഗം) ക-ഖ-ഗ-ഘ ങ. ചവർഗമാകുന്നതു് ച-ഛ-ജ-ഝ-ഞ. ടവർഗ്ഗം ട ഠ ഡ ഢ ണ. തവർഗ്ഗം ത-ഥ-ദ-ധ-ന. പവർഗ്ഗം പ-ഫ-ബ-ഭ-മ. യവർഗ്ഗം യ ര ല വാദികൾ. ശവർഗ്ഗം ശ ഷ സ ഹാദികൾ. ഇവ എട്ടു വർഗങ്ങളെക്കൊണ്ടും സ്വരങ്ങളെ ... ...

Colophon :

Author :

Remarks—The work consists of Sanskrit verses with Malayāḷam commentary. The name herein given is suggestive of the subject-matter. The different kinds of sounds and vocal chords etc. are described in this work.

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 494 A. PRAKRIYĀSARVASVAM.

C. O. L. No. 206 A.

Substance—Palm leaf. Size—13¾″ × 2⅛″. Leaves—237. 11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—7800. Incomplete.

Owner—Pantalam Palace.

Subject—Same as No. 738, DCSMMPL.

Beginning—Same as No. 745, DCSMMPL.

End etc.—Same as No. 746, DCSMMPL.

Remarks—After colophon the following portion occurs:

कविताकुतुकी स रामवर्मा कमलाक्षार्पितमानसो मनोज्ञम् ।
व्यलिखत्... ... ... ... ... ।

---

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 494 B. PRAKRIYĀSARVASVAM.

C. O. L. No. 206 B.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—30. 10—13 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—600. Incomplete.

Owner—Same as No. 494 A.

Subject—Same as No. 738, DCSMMPL.

Beginning :

.... ....न्दतिकमुरः, अच्छेदिकः, अवसीयः । असान्तापि । कययतोश्चातदर्थे । अतदर्थे वर्ति यत्तद्धितान्तं नञः परमन्तोदात्तं स्यात् । या अप.... .... .... ....यत् अदन्त्यम् । तादर्थ्ये तु अपाद्यम् । अज शक्तौ । अस्यां द्योत्यायामजन्तं कान्तं च नञः परमन्तोदात्तं स्यात् । अपचो रोगी । अविलिखो मूढः । शक्तौ त्वपचः, परिव्राट् । आक्रोशे च । असिन्द्योत्ये नञः परमन्तोदात्तं स्यात् ।

End :

अयस्मयादीनि च्छन्दसि । एतानि भपदकार्यवन्ति निपात्यन्ते । अयस्मयस्तमादामेति(?) । अयस्मयानि पात्राणीति । भत्वादुत्वाभावः । एवं चर्म्वोर्नभस्मयं(?)...वृषभः ककुद्मानित्यत्र तसौ मत्वर्थ इति भत्वं विना पदत्वाज्जश्त्वम् । स ऋक्क गणेनेत्यत्र पदत्वात् कुत्वं भत्वाज्जश्त्वं न इत्युभयम् । पुनश्च नमोऽच्छन्दसि गतित्वं वाच्यम् । पुनर्दायत्रह्मजायां उशिग्दू....(?) ....

Colophon:

Author—Same as No. 743, DCSMMPL.

Remarks—The title of the Ms. is based on its label. In the *Vaidikaprakaraṇa* ten leaves deal with *Kṛtswara* and twenty with *Taddhita*.

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 495. PRAKRIYĀSARVASVAM.

C. O. L. No. 253.

Substance—Palm leaf. Size—$9\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—246. 13—16 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—10000. Incomplete.

Owner—Valia Rāja, Edappally.

Subject—Beginning : Same as No. 743, DCSMMPL.

End :

आदत्ते भक्ष्यं कौति वा कुक्कुटः। आद्युक्तेर्मकुटस्थपुटादि।
बन्धेः कूटन्। क्तित्वान्नलोपः। बध्नाति हृदयं बधूटी। यु....
.... .... ....प्राग्वत् ङीप्। दुरिदो दुर च। दुर्युपपदे
द्रणातेः कूटन् दुरादेशश्च स्यात्। दुर्दुरूटो दुर्मुखः। दुरिकुलेः(?)
कूटनि रलयोरभेदाद्रत्वे दुर्दुरूट इति। ह.... .... ....
....पेरेट् च। चपेटश्चपेटा वा हस्ततलम्। ग्रो णित्। गारेटो
मुनिः। करोतेरोट् च। करो... ... ....न न भेदः
वकोटाक्षोटक.... .... .... ....क्षनाटाः।
आद्युक्तेः शकोटस्तरुः। लगिग्रोरुडच्। लगते हस्ते लगुडो
यष्टिः। गिर.... ... .... ।

Colophon—Same as No. 749, DCSMMPL.

Author—Same as No. 747, DCSMMPL.

Remarks—This Ms. consists of the 1st half and a

fragment of the second. A few leaves are missing both in the beginning and end.

---

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 496. PRAKRIYĀSARVASVAM.

C. O. L. No. 254.

Substance—Palm leaf. Size—13" × 2". Leaves—44. 11—12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Valia Rāja Avl., Edappally.

Subject—Same as No. 738, DCSMMPL.

Beginning:

हरिः ।

अथ छान्दसाः ।

शिरःकण्ठजिह्वाङ्घ्रितात्वनि मूर्धा

ततो ह्रस्यदन्ताङ्घ्रिदन्तास्तथोष्ठौ ।

मुखान्तर्विभागाः क्रमात् स्थानसंज्ञाः

समं नासयोक्ता दश(ह्यका?) प्रातिशाख्ये ॥

शे । शे इति सुपादेशश्छान्दसो वक्ष्यते । स प्रगृह्यसंज्ञः स्यात् । अस्मे इन्द्रा बृहस्पती । युष्मे इद्रः त्वे इति । संबुद्धौ शाकल्यस्येतावनार्षे । तन्मते अवैदिक इतौ परे सम्बुद्धावोत्प्रगृह्यसंज्ञः स्यात् ।

End:

सुब्रह्मण्यामन्त्रे प्रथमान्तस्य षष्ठ्यन्तस्य चान्त उच्चः स्यात् ।

नारायणो या जयते । विष्णोः पुत्रो याजयते । स्यान्तस्योपोत्तमं च । स्यशब्दान्तस्योपान्त्यमन्तश्च युगपदुच्चं स्यात् । गार्ग्यस्य पिता यजते । वा नाम्नः । नारायणस्य पिता यजते । एतत्सूत्रत्रयं हरभोजाभ्यामुक्तमिति । देवब्रह्मणोरनुदात्तः । मन्त्रे देवब्रह्मणोः स्वरस्यानुच्चः स्यात् । देवा ब्रह्माणः । अत्र द्वयोरामन्त्रि-तयोराद्यम् ।

Colophon :

എടപ്പള്ളിമഠത്തിലെ ഗ്രന്ഥമിതു.

इति तृतीयः पादः ।

Author—Same as No. 743, DCSMMPL.

Remarks—This Ms. contains a portion of the Chāndasaprakaraṇa.

---

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 497. PRAKRIYĀSARVASVAM.

C. O. L. No. 1921.

Substance—Palm leaf. Size—14″ × 2″. Leaves—267. 12 lines per page and 65 letters per line. Script—Devanāgarī. No. of Granthas—12800. Incomplete.

Owner—Valia Rāja, Eṇṇakkaṭṭu Koṭṭāram.

Subject—Same as No. 738, DCSMMPL.

Beginning—Same as No. 743, DCSMMPL.

End—Colophon : Same as No. 746, DCSMMPL.

Author—Same as No. 743, DCSMMPL.

Remarks—Only up to the 239th Fol. the Ms. is arranged in order. The horoscopes of two children born in the years 833 and 836 M. E. respectively are set forth in 1½ leaves. Thereafter the names and stars of persons for whom Śrādha should be performed every year are made note of. After colophon the following verses occur :

करीन्द्रजीमूतवराहशङ्ख-
मध्याब्धिशुक्तयुद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषां तु शुक्त्युद्भवमेव भूरि ॥

धवलीकृतादिशः स्मितश्रिया शीलसंकलितलोकमानसाः ।
क्वापि केऽपि भुवि सन्ति सन्त इत्याकलय्य परमायुरर्थये ॥
वक्त्रं व्याकरणद्विपस्य कतिचि.........शुण्डा...... ।
.......ष्ठाः कतिचित् परे तु सदयं चुम्बन्ति गण्डस्थलीम् ॥
अध्यारुह्य सुनिर्दयेन भवता नारायणक्ष्मा....      .... ।
प्रत्यष्टम्भि न कुम्भिनीतलजुषामेषा धृतिर्दृश्यते ॥

परमेश्वरशर्मणा लिखितम् ।

---

## ॥ प्रक्रियासर्वस्वम् ॥

### No. 498 A. PRAKRIYĀSARVASVAM.

C. O. L. No. 2220 A.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—12. 12 lines per page and 32 letters per line.

Script—Malayāḷam. No. of Granthas—288.

Owner—Subrahmaṇyan Śaṅkaran Mūtatu, Kulaṅgara Illam, Kidaṅgūr.

Subject—Same as No. 738, DCSMMPL.

Beginning:

हरिः ।

न सर्वं सर्वस्य प्रियमपि भवेदप्रियमपि
क्वचित् केचित् किञ्चिद्दधति यदि सार्था मम कृतिः ।
न वा गृह्णन्त्यन्ये तदपि पदपीयूषलहरी-
परिक्रीडानन्दः फलमिदमिदानीं मम न किम् ॥

शुभमस्तु ।

बुध......युक्तौ ये रूपसिद्धावपि क्वचित् ।
तान् न्यायानेकतो वक्ष्ये भोजराजोक्तवर्त्मना ॥

विवक्षातः कारकाणि । कर्मादिकारकाणि प्रयोक्तुर्विवक्षामनुसृत्य यथार्हं स्युः । परशुश्छिनत्तीति करणस्य कर्तृत्वम् ।
स्थाली पचति, स्थाल्यां पचतीत्यधिकरणस्य कर्तृत्वकरणत्वे ।
कारकादन्यत्रापि वक्तुर्विवक्षापूर्विका शब्दवृत्तिर्ज्ञेया ।

End:

समासवृत्तिस्तद्धितवृत्त्या बाध्यते । अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी । समुदाये प्रवृत्ताः शब्दा अवयवेऽपि प्रवर्तन्ते ।
नैकमुदाहरणं योगारम्भं प्रयोजयति ।

Colophon:

इति श्रीमत्केरलवलयभूषणदेवनारायणधरणीपतिकरुणाशरणेन

नारायणचरणपरिचरणपरायणेन नारायणकविना विरचिते प्रक्रियासर्वस्वे न्यायखण्डः । समाप्तश्चास्य पूर्वभागः ।

आस्तामन्यदिहार्थशब्दपटलीतच्चिन्तनादिक्रियाः
शब्दव्याकृतिजन्यपुण्यनिवहं पापं च वाग्दोषजम् ।
सर्वं तत्प्रजुहोमि नन्दतनये मन्दस्मितार्द्राननने
पूर्णब्रह्मणि तूर्णमेष करुणासिन्धुर्मयि प्रीयताम् ॥

भूखण्डे केरलाख्ये सरितमिह निलामुत्तरेणैव नावा-
क्षेत्राद्गव्यूतिमात्रे पुनरुपरिनिवग्रामनाम्नि स्वधाम्नि ।
धर्मिष्ठाद्भट्टतन्त्राद्यखिलमतपटोर्मातृदत्ताद्द्विजेन्द्रा-
ज्जातो नारायणाख्यो निरवहदतुलां देवनारायणाज्ञाम् ॥

मीमांसादीन् पितुः स्वान्निगममविकलं माधवाच्चार्यवर्यात्
... ... .... .. ... ... ।
तेषां कारुण्ययोगात् किमपि च कवितां प्राप्तवं सर्वमेतद्
भूयात् कृष्णार्पणं मे भवतु च सततं धीरघारेः कथायाम् ॥

शुभमस्तु । श्रीगुरुभ्यो नमः ।

नारायणाय नमः ।

Author—Same as No. 743, DCSMMPL.

Remarks—The Ms. contains only the Nyāya-khaṇḍa.

॥ सिद्धान्तकौमुदी ॥

No. 498 B. SIDDHĀNTAKAUMUDĪ.

C. O. L. No. 2220 B.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—111. 12 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1300. Incomplete.

Owner—Same as No. 498 A.

Subject—Author : Same as No. 463 B.

Remarks—This Ms. embodies a portion of Uttarārdha. The last 11 leaves contain fragments on logic.

---

॥ प्रक्रियासर्वस्वम् ॥

No. 499. PRAKRIYASARVASVAM.

C. O. L. No. 466.

Substance—Paper. Size—13½″ × 3″. Pages—262. 18—20 lines per page and 22—24 letters per line. Script—Devanāgarī. No. of Granthas—4000. Incomplete.

Owner—C. O.

Subject—Same as No. 738, DCSMMPL.

Beginning :

भोजोक्तिद्वयदण्डनाथविवृती भट्टचादिकाव्यत्रयं
त्रिस्वश्चामरकोशनामविवृतीः संक्षिप्य संक्षिप्यते ।

अथ तद्धिताः ।

ङ्याप्प्रातिपदिकात् (४.१.१.) इतः परं ङ्यन्तादाबन्तात् प्रातिपदिकाच्च परे प्रत्यया उच्यन्ते । तद्धिताः (४.१.७६.) इत ऊर्ध्वं प्रत्ययास्तद्धिताख्याः ।

End :

देवब्रह्मणोरनुदात्तः (१.२.३८.) मन्त्रे देवब्रह्मणोः स्वरस्यानुच्चः स्यात् । देवाः ब्रह्माणः । अत्र द्वयोरामन्त्रितयोराद्यु ... ...

Colophon :

इति तिङन्तस्वराः ।

Author—Same as No. 743, DCSMMPL.

Remarks—The Ms. extends from Taddhitakhāṇḍa up to the end of Tiṅantasvara.

---

## ॥ प्रक्रियासर्वस्वम् ॥

No. 500. PRAKRIYĀSARVASVAM.

C. O. L. Nos. 172 A, B, C and D.

Substance—Paper. Size—13″ × 8½″. Pages—975. 25 lines per page and 14 letters per line. 20 lines per page and 22 letters per line in B, C & D,

Script—Malayāḷam. No. of Granthas—13400. Complete.

Owner—C. O.

Subject—Same as No. 738, DCSMMPL.

Beginning—Same as No. 743, DCSMMPL.

End—Colophon—Same as No. 746, DCSMMPL.

Author—Same as No. 743, DCSMMPL.

Remarks—Same as No. 359 b.

---

॥ प्रक्रियासर्वस्वव्याख्या ॥

No. 501 A. PRAKRIYĀSARVASVAVYĀKHYĀ.

C. O. L. No. 1843 A.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—19. 9—11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—550. Incomplete.

Owner—Brahmadattan Nambūri, Kudallūr.

Subject—A commentary on the Prakriyāsarvasva.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

चारणोद्गीतचरितं दारणं विघ्नभूभृताम् ।
कारणं जगतामेकं वारणास्यमुपास्महे ॥

पश्यन्त्यादिस्वरूपा पदकमलजुषामान्तरध्वान्तहन्त्री
वीणाकोणाभिरामा दिवि दिविजकुलैः स्तूयमानापदाना ।
देवी देवासुरालीमकुटतटमणीराजिनीराजिताङ्घ्रिः
कल्या कल्याणदा मे सततमुरुकृपा मानसे लालसीतु ॥

मुनित्रयपदाम्भोजपरागपटली मम ।
विमलीकुरुताच्चेतोमुकुरं मुहुरञ्जसा ॥

नत्वा श्रीगुरुपादाब्जं स्मृत्वा स्मृत्वा च तद्गिरः ।
प्रक्रियापूर्वसर्वस्वव्याख्यास्माभिर्विलिख्यते ॥

अथ ग्रन्थकारः प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं शिष्टाचारानुमितश्रुतिचोधितकर्तव्यताकं श्रीमन्नारायणस्मरणलक्षणं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—रासविलासेति ।

End :

एवमर्धमात्रालाघवानुरोधेन यथान्यायस्य सौष्ठवात् । उभयथाप्येकस्य गौरवस्य सोढव्यत्वादिति । एतेनास्येत्संज्ञकत्वे बहुषु यणुघटितेषु सूत्रेष्वर्धमात्रालाघवानुरोधाद्यप्रत्याहारेणैव व्यवहरेदिति ग्रन्थोऽपि परास्तः । तस्मात् कैयटादिसकलग्रन्थकृत्सम्मतं लणसूत्रस्थाकारस्यानुनासिकत्वं प्रामाणिकमेवेति बोध्यम् ॥

Colophon :

श्रीब्रह्मदत्तगुरुपादकटाक्षवीक्षा-
दूरीकृतात्महृदयाखिलकिल्बिषेण ।
नारायणेन लिखिता मतिमान्द्यभाजा
शोध्यास्तु दोषसहिता यदि पत्रिका स्यात् ॥

शुभमस्तु ।

Author :

Remarks—The Ms. extends up to the refutation of the Rapratyāhāra. This commentary is noticed under No. 2710, TCM. Vol. III. Part I C.

---

॥ प्रक्रियासर्वस्वव्याख्या ॥

501 B. PRAKRIYĀSARVASVAVYĀKHYĀ.

C. O. L. No. 1843 B.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—63. 8—11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Owner—Subject—Beginning—Same as No. 501 A.

End :

स इत्यस्येति । लोपे चेत् पा.... .... ....
दौ लोपे सत्यपि पादपूरणसम्भवे सुलोपं विना प्रयोगोऽनुपपन्न इति वाच्यम् । पूर्वसूत्राद् बहुलग्रहणानुवृत्त्या तस्य क्वचित् प्रवृत्तिर्नेत्याश्रयणात् । एवं चैतदर्थे लोपे सत्येव पूर्येतेत्यवधारणपरतया व्याख्यानं व्यर्थमिति शब्देन्दुशेखरे स्थितम् । तेनेति । पादग्रहणेनेत्यर्थः । ऋक्पाद एव गृह्यत इति वामनः । अविशेषात् श्लोकपादोऽपीत्यपरे ।

Colophon :

इति संहिताखण्डः ।

Author :

Remarks—The *Samhitā Khaṇḍa* brings this Ms. to its end. Just after its close a few lines are written unconnected with the main theme.

---

## ॥ प्रतिवादिनिग्रहः ॥

No. 501 C. PRATIVĀDINIGRAHA.

C. O. L. No. 1843 C.

Substance—Palm leaf. Size—13½″ × 2″. Leaves—10. 10—13 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—450. Incomplete.

Owner—Same as No. 501 A.

Subject—A refutation of the defects in the verse beginning with "यत् त्वाम्".

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरुप्रसादोदितबोधरत्न-
प्रदीपदीप्र रसनाग्ररङ्गे ।
ममानिशं सम्यगचिन्त्यशक्तिः
सरस्वती नर्तनमातनोतु ॥

यत्पादाम्बुजसेवनेन तरसा श्रीशङ्करार्योदित-
श्रीमद्भाष्यपयोनिधिं समतरल्लोकाः समस्ता अपि ।

आविर्भूतपरानुभूतिविकसद्वक्त्राम्बुजन्मा सुधीः
सोऽयं शिष्यसुरद्रुमो विजयते श्रीजातवेदोयतिः ॥

यत्त्वामित्यादिके पद्ये यतीश्वरविनिर्मिते ।
प्रतिवाद्युद्गृहीतार्थं निगृह्णामि सतां मुदे ॥

अर्थान्ता (?) इत्याद्यमरकोशात् सर्वनाम्नां परोपगत्वं वाच्यम् । परोपगत्वं च स्वपरामृश्यार्थप्रतिपादकशब्दान्तरसमानलिङ्गत्वमिति ग्रन्थमनूद्यात्रोच्यत इत्यारभ्य विभाव्यतामित्यन्तेन ग्रन्थेन लक्षणस्थप्रतिपादकपदस्य यथाश्रुतत्वे 'दारान् पाग्रभवान् वन्दे देवता त्रायतां स मामि'त्यादिष्वेव प्रयुक्ते सर्वनाम्न्यतिप्रसङ्गः ।

End :

अस्ति चेदं केवलान्वयिनीति न्यायसिद्धान्तमञ्जरीस्थप्रयोगः । पुरीतत्येव तत्परं नास्तीति कोण्डुभट्टप्रयोगश्च । तदपि सुधा । यत्समानाधिकरणाः सर्वे साध्यसमानाधिकरणाः तत्त्वं व्याप्तिरित्यत उत्तरो ह्यस्ति चेदं केवलान्वयिनीति ग्रन्थः । तथाच तत्त्वपदार्थस्येदमपरामर्शनीयत्वं स्पष्टमेव । इडानाड्यां त्वक्सत्वेऽपीत्यादित उत्तरं पुरीतत्येव तत्परं नास्तीति वाक्यम् । तथाच त्वक्सत्त्वपदार्थपरामर्शी क्लीबं तच्छब्द इत्यपि स्फुटमेव । त्वगिन्द्रियमित्यर्थ इति कोण्डु......

Colophon :

Author—A disciple of Jātavedayati.

Remarks—The author refers to Nyāyasiddhāntamañjarī and Kondubhatta in this work.

## ॥ प्रक्रियासर्वस्वव्याख्या ॥

## No. 502. PRAKRIYĀSARVASVAVYĀKHYĀ.

C. O. L. No. 741.

Substance—Paper. Size—11½″ × 9″. Pages—257. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3200. Incomplete.

Owner—C. O.

Subject—Beginning: Same as No. 501 A.

End etc.—Same as No. 501 B.

---

## ॥ प्रक्रियासारः ॥

## No. 503. PRAKRIYĀSĀRA.

C. O. L. No. 654.

Substance — Paper. Size—11″ × 9″. Pages — 165. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1250.

Owner—C. O.

Subject—Derivation of words.

Beginning:

प्रक्रियासारः ।

वाच्यवाचकरूपाय प्रकृतिप्रत्ययात्मने ।
नमः शब्दार्थनिश्चये हरये परमात्मने ॥

संप्रणम्य गणाधीशं गुरून् वाणीं च पाणिनिम् ।
आचार्यान् भाष्यकारादीन् प्रक्रियासार उच्यते ॥

अत्रादौ प्रत्याहारसूत्राण्युच्यन्ते । अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति । इहागमादेशधातुगणपाठप्रत्ययप्रत्याहारसूत्राण्युपदेशः । उपदेशेऽजनुनासिक इत् इत्यधिकारे । हलन्त्यम् । उपदेशेऽन्त्यं हल् इत्संज्ञं स्यात् । इति णकारस्य इत्संज्ञा ।

End :

भुवो भावे । भूधातोः सुबन्त उपपदे भावे क्यप् स्यात् । भावग्रहणमुत्तरार्थम् । देवभूयं देवत्वमित्यर्थः । इत्यादि ज्ञेयम् । इत्यादिकृत्याः ।

ण्वुल्तृचौ । धातोः ण्वुल्तृचौ स्तः कर्त्रर्थे । णलावितौ । युवोरनाकौ । युव् इत्येतयोरनुनासिकयोर्यथासंख्यं अन अक इत्येतावादेशौ स्तः । णित्वाद् वृद्धिः । भवतीति भावकः । करोतीति कारकः । भविता, कर्ता । स्त्रियां भाविका भवित्री, कारिका कर्त्री । गाङ्कुटादिभ्योऽञ्णिन्ङित् । गाङिति गादेशो गृह्यते, न गाङ् गताविति । कुटादयः कुट कौटिल्य इत्यारभ्य यावत् कुञ् शब्द इति । एतेभ्यो गाङ्कुटादिभ्यः परे ञ्णितोऽन्ये प्रत्यया ङितः स्युः । कुट कौटिल्ये । पुट संश्लेषणे, कुटिता कोटकः, पुटिता, पोटक इत्यादि सर्वं सूत्रान्तरैर्ज्ञेयम् ।

Colophon :

इति कृदन्तः ।

प्रक्रियायाश्च सर्वस्वं प्रक्रियाकौमुदीं तथा ।
रूपावतारं चालोक्य प्रक्रियासार ईरितः ॥

बालेन केनापि बुधोत्तमानां
पन्थानमालोकितुमुत्सुकेन ।
व्यधाय्ययं व्याकरणानुसारी
ग्रन्थः सुधीन्द्रैः सुविशोधितोऽस्तु ॥

प्रक्रियासारः समाप्तः ।

अलेखि प्रक्रियासारो नारायणबुधोदितः ।
कैलासनाथसुधिया जातवेदोनियोगतः ॥

Author—Nārāyaṇa.

Remarks—The colophon testifies that the author had mastered Prakriyāsarvasva, Rupāvatāra, Prakriyākaumudī etc. Hence it is certain that he is posterior to Nārāyaṇa Bhaṭṭatiri. The last portion of the transcript indicates that Prakriyāsāra of Nārāyaṇa has been transcribed by Kailāsanātha at the bidding of Jātaveda. In CC. (P. 348) a Prakriyāsāra is noticed but it is attributed to Kāñcīnātha. In DCSM-MPL, a Prakriyāsāra is noted as No. 755, but it is quite a different work.

---

॥ प्रत्ययान्तधातुव्याख्या ॥

No. 504. PRATYAYĀNTADHĀTUVYĀKHYĀ.

C. O. L. No. 272.

Substance—Paper. Size—13½" × 8". Pages—112.

21 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1450.

Owner—C. O.

Subject etc.—Same as No. 757, DCSMMPL.

Author—Mādhavācārya.

Remarks—This is but a portion of the Mādhavīya-dhātuvṛtti. The complete work has been published in the "Pandit" and reprinted later at Benares. The printed book designates this portion as Mādhavīyanāmadhātuvṛtti.

---

## ॥ प्रवेशकः ॥

## No. 505. PRAVEŚAKA.

C. O. L. No. 717.

Substance—Paper. Size—11" × 8½". Pages—53. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—530. Incomplete.

Owner—C. O.

Subject—Description of the rules of Sanskrit grammar in verse.

Beginning :

प्रवेशकः ।

विनायकमहं वन्दे जगतामेकनायकम् ।
गङ्गाप्रवाहतुल्यां मे वाग्विभूतिं करोतु सः ॥

महर्षिं पाणिनिं नत्वा मन्दमध्यगमेधसाम् ।
महाशास्त्रप्रवेशार्थं मार्गं वक्ष्ये प्रवेशकम् ॥

इक्षुं खादन्ति नादन्ता रसं शर्करया विदुः ।
प्रवेशकेन जानन्ति शब्दान् व्याकरणाक्षमाः ॥

दर्पणे पाणिमात्रेऽपि दन्ती प्रतिफलेद्यथा ।
अथाल्पेऽपि प्रकरणे महद् व्याकरणं स्फुरेत ॥

वर्णागमो वर्णविपर्ययश्च
द्वौ चापरौ वर्णविकारलोपौ ।
धातोस्तदर्थातिशयेन योगो
यत्रास्ति तद्व्याकरणं निरुक्तम् ॥

पाठक्रमः प्रसिद्धोऽत्र पश्चाशद्वर्णसन्ततेः ।
स्वराः षोडश तत्राद्या अच इत्यपि संज्ञिताः ॥
कादयोऽन्ये हलाख्याश्च व्यञ्जनाख्याश्च कीर्तिताः ।

End :

दुहः क्यप् स्यादुपपदे सुष्यन्तस्य च घो भवेत् ॥
धेनुः कामदुघा वाक् च जीमूतश्च पयोदुघः ।
प्रत्यया बहवः सन्ति धातौ धातौ पृथक् पृथक् ॥

## ॥ वाक्यपदीयपद्धतिः ॥

### No. 540. VĀKYAPADĪYAPADDHATI.

C. O. L. No. 307.

Substance—Paper. Size—11½″ × 9″. Pages—268. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—4500. Complete.

Owner—C. O.

Subject—A commentary on the Vākyapadīya.

Beginning :

सर्वप्रपञ्चरूपं विगताशेषप्रपञ्चजालमलम् ।
जयति जगतां निमित्तं भवबन्धच्छिदि (?) ब्रह्म ॥

विमलचरितस्य राज्ञो विदुषः श्रीविष्णुगुप्तदेवस्य ।
भृत्येन तदनुभावाच्छ्रीदेवयशास्तनूजेन ॥

बन्धेन विनोदार्थं श्रीवृषभेण स्फुटाक्षरं नाम ।
क्रियते पद्धतिरेषा वाक्यपदीयोदधेः सुगमा ॥

यद्यपि टीका बह्व्यः पूर्वाचार्यैः सुनिर्मला रचिताः ।
सन्तः परिश्रमज्ञास्तथापि चैनां ग्रहीष्यन्ति ॥

द्वावुपादानशब्देष्वित्यतःप्रभृति प्रकरणं प्रवर्तिष्यते । तस्य त्वनाख्यातसम्बन्धाभिधेयप्रयोजनस्य प्रेक्षापूर्वकारिणामनुपादेयतैव स्यादिति कथयितव्यस्तत्र सम्बन्धः प्रमाणप्रयोजनयोर्हेतुहेतुमद्भावलक्षणस्तदन्तर्गतत्वाद् न पृथगुक्तः ।

End :

स तु तद्द्वारेणैव प्रतिपादयति । अभ्यासात् तु स तथा निरूढे, येन ततो द्रागिति प्रत्ययः । यथाक्षिकाचादिभ्योऽभ्यासादर्थेषु द्रागिति प्रतिपत्तिः शब्दव्यवहिता । सम्प्रत्ययमाररमिति? प्रतीतिमात्रमेतत् । नन्वेवं वाचकतेति । नन्वयनपरिभवजाभिर्विकलीकृतमानसस्य पीडादिभिर्दुरुदितमिह भवतीति प्रयोगे नैव तदाश्रयम् । सूक्ततरं निकालकाविनापि ध्यापा(?) प्रायो विद्वाद्भिः संज्ञेया भवति । विप्रबन्धुपदानाम् ।

Colophon :

इति वृषभरचितायां वाक्यपदीयपद्धतौ प्रथमं काण्डं समाप्तम् ।

आ कैलासादनल्पप्र......तलालुप्तविल्वप्रवाला-
दा सेतो रामचापक्षतविवरलसद्वीचिमालाकलापात् ।
आ शैलाभ्यामुभाभ्यां रविरजनिकरध्वंसजन्मास्पदाभ्यां
पक्वाः पाण्डित्यमार्गे वयामिव विरलाश्चक्रवाले धरायाः ॥

इति वाक्यपदीयपद्धतौ प्रथमं काण्डम् ।

Author—Vṛṣabha.

Remarks—Vṛṣabhadeva, son of Devayaśas, was a dependant of king Viṣṇugupta. He wrote the work in obedience to the king's command. It comprises the whole of the first kāṇḍa.

---

## ॥ वाररुचसंग्रहः ॥

### No. 541. VĀRARUCASAṄGRAHA.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—52 18 lines per page and 16 letters per line. Script—Devanāgari. No. of Granthas—400. Complete.

Owner—C. O.

Subject—The rules binding upon cases and case-endings.

Author :

Remarks—This work has been printed in TSS. as No. 33. It is of immense service to students.

---

## ॥ विभक्त्यर्थनिर्णयः ॥

No. 542. VIBHAKTYARTHANIRṆAYA.

C. O. L. No. 2390.

Substance—Paper. Size—11″ × 9″. Pages — 293.
7—10 lines per page and 48 letters per line.
Script—Devanāgarī. No. of Granthas—8350.

Owner—C. O.

Subject—Description of grammatical cases.

Beginning :

श्रीमहागणपतये नमः ।

बहुविधरूपपरिग्रहजगदभिनटनमिहाकाङ्क्षन् ।
स्वयमपि नटति सुकुतुकी यस्तस्मै शंभवेऽस्तु नमः ॥

ध्रुवोऽपाये कर्मेहितफलसहितः साधकतमः
सदाधारोऽभीष्टः परफलकभावेन जगताम् ।
स्वतन्त्रः कर्तासि स्फुटवलयशेषः प्रथमया
सुलिङ्गः ख्यातस्त्वं विशदय विभक्तीर्गिरिश ताः ॥

इह खलु सर्वेषां विभक्त्यर्थानां भगवत्यन्वय इति विभक्त्यर्थो निरूप्यते

End :

कर्मप्रवचनीययोगे न षष्ठी । यथानुहरिं सुराः । उपसुरेषु हरिः । अपात्रिगर्तेभ्यो वृष्टो देवः । आ कडारादेका संज्ञेत्यादौ । यत्र तु योग्यता, तत्र षष्ठी भवत्येव । अत एव 'उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय' इत्यादौ शेषे षष्ठी संगच्छते इति ।

Colophon :

इति विभक्त्यर्थनिर्णये कारकसप्तम्यर्थनिर्णयः इति सप्तमी-
विवरणं समाप्तम् ।

अन्वीक्षानलिनीप्रमोदनरविः सूत्रादिविद्यापगा-
पाथोधिः प्रथितोऽर्थिकल्पविटपी वागीशनामा सुधीः ।
गौरीतुल्यगुणा विदेहविषये देवी जयन्ती च यं
प्रासूत प्रहतैनसं गिरिधरं तस्येयमासीत्कृतिः ॥

तर्केऽथ जैमिनिगिरि स्फुटशब्दविद्या-
भ्यासे निसृत्वरधियः शुचिशान्तरूपाः ।
धीरा इमां मम कृतिं करुणारसेन
पूर्णे मनस्यविरतं परिचिन्तयन्तु ॥

श्रीवासुदेवो जयतु । श्रीविश्वेश्वराय नमः । श्रीकार्तवीर्यार्जुनो
जयतु । श्रीभागीरथ्यै नमः ।

Author—Giridharopādhyāya.

Remarks—The work is printed in Benares.

---

## ॥ वृत्तिदीपिका ॥

### No. 543. VṚTTIDĪPIKĀ.

C. O. L. No. 1013.

Substance—Palm leaf. Size—$10\frac{5}{8}'' \times 2''$. Leaves—58. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Owner—Cirakkal Rājā.

Subject—Elucidation of Vṛtti, Śakhi etc.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सजलजलदकालं सर्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाभ्यक्तफालम् ।
पिहितदुरितजालं फुल्लराजीवनालं
विलम्बितवनमालं नौमि गोपालबालम् ॥

ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
मौनिश्रीकृष्णभट्टेन क्रियते वृत्तिदीपिका ॥

इह सकलजनाभिलषितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्त्वम-स्यादिमहावाक्यार्थबोधजन्यत्वच्छाब्दबोधे च वृत्तिग्रहजन्योप-स्थितेर्हेतुत्वाद् वृत्तिर्निरूप्यते ।

End :

नचेष्टापत्तिः । भवत्सिद्धान्तभङ्गापत्तेः । इत्थं निरूपिताः पञ्च व्यक्तिस्फोटाः । वैयाकरणेन तु शक्ततावच्छेदिका जातिरेव वाचिकेत्युक्तम् । जातिश्च आविधिको धर्मविशेषः । तथाच वर्णजातिस्फोटः, पदजातिस्फोटः इति तन्मते स्फोटत्रयं सिद्धम् ।

Colophon :

इति मौनिकुलतिलकायमानभट्टात्मजरघुनाथभट्टसुतश्रीकृ-ष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ।

श्रीगुरुभ्यो नमः ।

Author—Kṛṣṇa Bhaṭṭa, son of Raghunāthabhaṭṭa.

Remarks—Same as No. 359 (b).

---

॥ वृत्तिदीपिका ॥

No. 544. VṚTTIDĪPIKĀ.

C. O. L. No. 60.

Substance—Paper. Size—13″ × 8½″. Pages — 79. 18 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas — 900.

Owner—C. O.

Subject etc.—Same as No. 543.

---

॥ वैयाकरणमञ्जूषाविवृतिः (कला) ॥

No. 545. VAIYĀKARAṆAMAÑJŪṢĀVIVṚTI. Kalā.

C. O. L. No. 667.

Substance—Paper. Size—11″ × 8½″. Pages—222. 20 lines per page and 24—28 letters per line. Script—Devanāgarī. No. of Granthas—3600.

Owner—C. O.

Subject — Elucidation of Vyākaraṇamañjūṣā of Nāgeśabhaṭṭa.

Beginning:

वैयाकरणमञ्जूषाविवृतिः ।

रामं वामघनश्यामं निकामं हृदयङ्गमम् ।
कामं वन्दे जगद्धाम विश्रामं वचसां शनम् (?) ॥

अमन्दगुणमन्दिरं विमतरतविद्याङ्कुरम्
कलाधरकृतादरं कलितचि...सादरम् ।
शिरोधृतनदीवरं शिवकरं रमोमावरं
नमामि दुरिताहृदं? गुरुवरं सनागेश्वरम् ॥

मञ्जूषास्थस्य मुक्तादेर्न लाभः कलया विना ।
वैयाकरणसिद्धान्तज्ञानस्यापि यथा तथा ॥

अतस्तदाख्यां विवृतिं मञ्जूषायाः प्रयत्नतः ।
पायगुण्डो वैद्यनाथभट्टः कुर्वे स्वबुद्धये ॥

कर्तुं न जाने रचनां समर्थां
न चाप्यलं सा बुधबोधनाय ।
अहं प्रवृत्तोऽस्मि तथापि ...
विश्वप्रणो .... शणं हृदिस्थः ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं स्वेष्टदेवतानमस्काररूपं मङ्गलम् आचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुपङ्गतो मङ्गलाय च निबध्नाति -- नागेति ।

End:

सा आख्यातवाच्येति । तन्न । कर्तरि कृदित्यतः कर्तृग्रहणस्य लः कर्मणीत्यत्र अनुवृत्त्या तिङ्कृतोर्वैपम्यस्य दुरुपपादत्वात् । यत्नातिरिक्तः फलानुकूलो व्यापारो धात्वर्थः । यत्न आख्यातार्थः ।

धात्वर्थे कारकान्वय इति गुरुमतम् । तत्तु समन्वयादिति सूत्र-स्थवा

Colophon :

Author—Vaidyanātha Bhaṭṭa, disciple of Nāgeśa Bhaṭṭa.

Remarks—The statement "ഇതിന്മേൽ ൱൫ ൮ാ എന്ന ഓല കാണുന്നില്ല" occurring after page 157 shows that a leaf is missing in the middle. The author refers to Ānandagiri, Rāmānanda, Appayyadīkṣita and Sanatsujātīyabhāṣyācārya in the course of the work. The work is noticed under Nos. 585 and 5852 of DCSM. Tānjore, Vol. X.

---

## ॥ वैयाकरणसर्वस्वम् ॥

### No. 546. VAIYĀKARAṆASARVASVAM.

C. O. L. No. 830.

Substance—Paper. Size—11″ × 8½″. Pages—114. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1400. Incomplete.

Owner—C. O.

Subject—Elucidative exposition of Pāṇini's sūtras.

Beginning :

वैयाकरणसर्वस्वम् ।

देशे श्रीमति वङ्गनाम्नि नगरे श्रीकालिकत्ताभिधे
श्रीमत्तामसहेन्टकः कुलपुरुक्साहेवदत्ताज्ञया ।
प्रारब्धं धरणीधरेण विदुषा व्याख्यानकं पाणिनेः
सूत्राणां समनुक्रमेण च महाभाष्येण तट्टीकया ॥

कौमुद्यापि च काशिकासहितया संयुक्तकं वार्त्तिकै-
स्तद्वत्सर्वगणैः सहैव च परीभाषो(?)ष्टभिर्मिश्रितम् ।
गौरीपुत्रमुखर्तुनागधरणीसंवत्सरे वैक्रमे
भूवैश्वानरसप्तचन्द्रकमिते शाके तपस्ये सिते ॥

पक्षे सूर्यतिथौ विधौ सुदिवसे विप्रस्तु सारस्वतो ।
बाह्वरामसमाख्ययातिविदितो मुद्राक्षरैर्न्यस्तवान् ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

विदितसकलशास्त्रख्यात हे निष्कुलन्बूक्
नृपतिभिरभिरूपैर्वामदेवस्वरूपैः ।
मुनिमनमवलोक्य ज्ञापितः सूत्रपाठं
रचितुमचलचित्तः संशयच्छित्तयेऽस्मि ॥

प्रतिचरणविरामा सूत्रसङ्ख्यैव चादौ
तदनु विशदलिप्या सूत्रमग्रे प्रदेशः ।
विनिहित इह तस्याध्यायपादस्वकाङ्का
झटिति मिलतु कौमुद्यन्तरे तत्तु सूत्रम् ॥

End :

विरामोऽवसानम् ।

संज्ञाप्रदेशः ८.३.१५.,८.४.५६.कौ० सु० सं०। वर्णानामभावो-ऽवसानसंज्ञः स्यात् । गमः । अभावेऽवसानसंज्ञिन्युपर्यभाव-ग्रहणं कर्तव्यम् । वर्णोऽन्त्यो वावसानम् इति। ५५ सूत्राणि। भाष्ये १.४.४ गतार्थानि ।

Colophon :

इति सूत्रपाठ प्रथमाध्यायस्य चतुर्थः पादः ।
अथ द्वितीयाध्यायस्य प्रथमः पादः ।

Author—Dharaṇidhara.

Remarks—This work is a compendium of eight treatises such as Bhāṣya Kāśika etc. At the beginning it may be seen that its composition in the year 1731 (Śaka era) was undertaken at the instance of Thomas Henry belonging to the city of Calcutta and printed by a Sārasvata Brahmin named Bāhū Rāma. It extends up to the 4th pāda of the 1st chapter.

## ॥ वैयाकरणसिद्धान्तसंग्रहः ॥

## No. 547. VAIYĀKARAṆASIDDHĀNTA-SAMGRAHA.

C. O. L. No. 994.

Substance—Paper. Size—11½" × 9". Pages — 95. 20 lines per page and 16 letters per line,

Script—Devanāgarī. No. of Granthas — 950. Incomplete.

Owner—C. O.

Subject—A commentary on Pāṇini's Sūtras in verse.

Beginning:

वैयाकरणसिद्धान्तसंग्रहः ।

यथावद् गुरुपादाब्जं समाराध्य तदाज्ञया ।
वैयाकरणसिद्धान्तसंग्रहोऽयं विरच्यते ॥

वैयाकरणसिद्धान्ताः क्वामी क्वाहं च मन्दधीः ।
अस्मद्गुरुकृपैवात्र जल्पाकयति हन्त माम् ॥

नमो भट्टोजिभट्टाय मुनित्रयमयात्मने ।
सिद्धान्तकौमुदी येन प्रणीता करुणात्मना ॥

माहेश्वराणां सूत्राणामन्त्या इत इतीरिताः ।
णकौ ङचौ टणमञाष्षशौ वयरलाः क्रमात् ॥

End:

क्रियार्था कारिकाप्येवं कारिकाकृत्य तद्भवेत् ।
तथानितिपरं चानुकरणं हि झणत्कृतम् ॥

तथादरानादरयोः स्यातां सदसती क्रमात् ।
अलं तु भूषणेऽप्येतत् त्रयीकृञ्विषया स्वतः ॥

तथापरिग्रहेऽप्यन्तरन्तर्हत्य रिपुं गतः ।

... ... .... ....

Colophon:

इति कारकप्रकरणम् ।

Author :

Remarks—The author's name is given as *Srī Rājarāja* on the cover of the transcript. The Ms. begins on a portion of *Avyayībhāvasamāsa*.

---

॥ व्याकरणपर्यायपदावली ॥

No. 548. VYĀKARAṆAPARYĀYAPADĀVALĪ.

C. O. L. No. 905.

Substance—Paper. Size—11" × 8½". Pages — 38. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—760.

Owner—C. O.

Subject—The inflected forms of roots and their synonyms.

Beginning :

व्याकरणपदावली ।

नमः शिवाय कन्दर्पदर्पहारिदृगग्नये ।
गिरीन्द्रतनयासक्तमानसायेन्दुमौलये ॥
गोविन्दं गोपगोपीनां नन्दनं नन्दनन्दनम् ।
वृन्दारकमुनिव्रातैर्वन्द्यं वन्दामहे वयम् ॥
पूजितं विघ्नभीतेन शिवेनापि पुरद्विषा ।
सर्वसम्पत्करं देवं नमामि गणनायकम् ॥

प्रणम्य विदुषः सर्वान् पदानां धातुजन्मनाम् ।
उच्यते वासुदेवेन पर्यायाणां मयावली ॥
प्रसिद्धानप्रसिद्धांश्च लौकिकान् वैदिकान् ब्रुवे ।
लट्प्रत्ययान्तान् पर्यायान् केवलांश्चोपसर्गजान् ॥
प्रत्याहारांश्च सूत्राणि प्रक्रियां बहुविस्तराम् ।
मुक्त्वा प्रयस्यतेऽस्माभिः पर्यायपदसंग्रहे ॥

End :

रूढाश्च योगरूढाश्च विशेष्या एव सर्वदा ।
तथैव यौगिकाः शब्दा भवन्त्येव विशेषणाः ॥
क्रियापदान्वयः किञ्चिदेवमत्र प्रदर्शितः ।
लडन्तेष्वपि पर्यायाः प्रदर्श्यन्ते यथाक्रमम् ॥

Colophon :

त्रयोदशः परिच्छेदः ।

Author—Vāsudeva.

Remarks—This work contains 13 Paricchedas. The inflected forms of roots and their synonyms, both Vedic and non-Vedic, are given herein in detail.

---

## ॥ शब्दकौमुदी ॥

### No. 549. ŚABDAKAUMUDĪ.

C. O. L. No. 512.

Substance—Palm leaf. Size—15″ × 1⅛″. Leaves—145. 7—9 lines per page and 36 letters per line.

Script—Grantha. No. of Granthas — 3150. Incomplete.

Owner—Kuttala Śāstrial, Shencotta.

Subject—A dissertation on the inflected forms of words and their application.

Beginning :

.... .... .... ....

का. . . . . .चनं. .. .. .. .. .. .शब्दः प्रत्येकं सम्बध्यते । प्रातिपदिकार्थमात्रादप. . . . . . . . . . . . . . . . . . . . .स्योदाहरणम् । उच्चैर्नीचैः कृष्णः श्रीः ज्ञानम् । मात्रग्रहणात् सम्बोधने चेत्यारभ्याध्यायिक. . . .. ... ... ..लिङ्गग्रहणम् ... ...नियतलिङ्गा उदाहरणम् । तटः । तटी । तटम् । यदा द्रोणादयः परिमाणवाचिनः... ... ... ... .. न्ति । ... तदा व्यभिचारात् परिमेयस्य प्रातिपदिकार्थत्वं नास्तीति परिमाणग्रहणम् । द्रोणः । द्रोणी । .... .... .... ...तत्परिच्छिन्नो.... ... ..रि त्यर्थः । एकादिभिरुक्तेष्वप्येकत्वादिषु विभक्तिर्यथा स्यादिति वचनग्रहणम् ।

End :

.... ....तीत्यर्थः । रुहः पोऽन्यतरस्याम् । णौ रोपयति । रोहयति । ऊदुपधाया... ... ... ... ऊत् । दूषयति । वा चित्तविरागे । विरागोऽ-

प्रीतता । चित्तं दूषयति । दोषयति वा । . . . मकारानुबन्धका इत्यर्थः । .... त्यन्ये । मितां ह्रस्वः । घट चेष्टायाम् । घटयति ।
उ.... .... ....
.... .... ....
घट सङ्घात इति चौरादिकस्य । व्यथयति.... ....

Colophon:

इति कौशिककुलककुदसब्रह्मचारिभाष्यकृद्द्वादशाहयाजिपुत्र-श्रीचोक्कनाथदीक्षितविरचितायां शब्दकौमुद्यां प्रथमः परिच्छेदः ।

Author—Cokkanātha Dīkṣita, son of Dvadaśāhayājī.

Remarks—The Ms. extends up to a portion of "ण्यन्तप्रक्रिया". It is damaged beyond the possibility of decipherment. The script is legible. The work is noticed as No. 3316, TCM. Vol. IV. Part I B extending up to the Samāsāśrayavidhi.

---

## ॥ शब्दकौमुदीव्याख्या (शाब्दिकरक्षा) ॥

## No. 550. ŚABDAKAUMUDĪVYĀKHYĀ.

### Śābdikarakṣā.

C. O. L. No. 1858.

Substance—Palm leaf. Size—14¼" × 2". Pages—171. 8—10 lines per page and 64 letters per line. Script—Malayālam. No. of Granthas—6156. Incomplete.

Owner—Brahmadattan Nambūripad, Kūḍallūr.

Subject—Elucidative exposition of the Śabda-koumudī with illustrations.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

यस्य किल मूर्तिभेदाः पाणिनिवररुचिपतञ्जलयः ।
तस्मै नमः परस्मै धाम्ने श्रीचोक्कनाथमन्त्रिनाम्ने ॥

साम्राज्यस्वाधर्मो मार्गारभुजगमायूरेः ।
यं दलितारि श्रौत्रं ववन्दिरे रूपमिन्द्रका देवाः (?)॥

भाष्यपरिश्रमशंसी टीकाव्याजेन शब्दकौमुद्याः ।
भट्टोजिकृतिषु किञ्चिद् व्याकुलयिष्ये यथार्थबोधाय ॥

मद्वचनव्याकुलिता भट्टोजिसुधीशिखामणेर्ग्रन्थाः ।
दास्यति रसं बुधानां दुग्धाम्बुधिरिव गिरिषु भूतः ॥ (?)

अन्तर्दृशा विमलया पदशास्त्राम्भोधिपारदृश्वा यः ।
एकोऽपि स यदि शृणुयादिमां कृतिं स्यान्मम श्रमः सफलः ॥

अविदित्वा पातञ्जलमनवेक्ष्य निबन्धनानि चान्यानि ।
ग्रन्थेऽबुधैः कृतास्मिन्निन्दा निन्दा न नुतिरपिर्न्ननुति ॥

अवर्णिते हन्त मदन्तरन्धतां
स्तुवन्ति ये मे निशमय्य भारतीम् ।
ब्रुवन्तु दोषानिह ये दुरुद्धरान्
भवन्ति नूनं गुरवस्त एव मे ॥

अथ ग्रन्थकारः स्वाचरितं ग्रन्थपरिसमाप्तये गुरुदेवतानमस्कारूपं मङ्गलं शिष्यशिक्षायै निबध्नन् प्रेक्षावत्प्रवृत्तये विषयं निर्दिशति—

End :

धत्वजश्त्वे। अजग्रधुरिति। सिजभ्यस्तेति जुसि, जुसि चेति गुणस्त्विगन्तस्येति हनः सिची ... त्यादिगुणे रपरे हल्ङ्यादिलोपे भषिजश्त्वे च अजर्घर्द् इति स्थिते रुत्वलोपदीर्घाः। रुत्वस्य विकल्पितत्वात् पक्षे प्राग्वदजर्घर्दत् इत्यपि रूपं सिद्धम्।

जगच्चर्कर्त्ति बर्भर्ति संजर्हर्ति च योऽव्ययः।
भवं मृडं हरं शम्भुं तं त्यागेश्वरमाश्रये ॥

Colophon :

इति कौशिककुलतिलकसञ्चारिभाष्यश्रीद्वादशाहयाजिपुत्रेण शब्दतन्त्रस्वतन्त्रश्रीचोक्कनाथाध्वरीन्द्रेण विरचितायां शाब्दकौमुदीव्याख्यायां शाब्दिकरक्षाख्यायां यङ्लुगन्तप्रक्रिया समाप्ता।

ओं शुभमस्तु।

फणिग्रामण(?)वाग्गुम्भप्राणनाडयदुक्तये।
कलये शब्दकौमुद्याः कवये गुरवे नमः।

श्रीगुरुभ्यो नमः। शुभमस्तु।

Author—Same as No. 549.

Remarks—This Ms. extends up to the "यङ्लुगन्तप्रक्रिया," or frequentatives. In continuation of this work eight leaves are appended in different size containing the commentary on the Sūtra "निपात एकाजनाङ्".

## ॥ शब्दकौमुदीव्याख्या (शाब्दिकरक्षा) ॥

### No. 551. ŚABDAKAUMUDĪVYĀKHYĀ.

### Śābdikarakṣā.

C. O. L. No. 214.

Substance—Paper. Size—13″ × 8½″. Pages—712.
18 lines per page and 20 letters per line.
Script—Devanāgarī. No. of Granthas—8000.
Inomplete.

Owner—C. O.

Subject—Same as No. 550.

Beginning :

गणाधीशमहं वन्दे गजराजाननं विभुम् ।
समाश्लिष्टतनुं देव्या तपनीयनिभाङ्गया ॥

दीर्घायुरासीद्यदुपासनेन
मृकण्डुजन्मा महितो मुनीन्द्रः ।
स चन्द्रलेखाकृतशेखरो नः
पायादपायादुमया समेतः ॥

यन्नाममात्रजपधूतसमस्तपापो
वल्मीकभूमुनिवरो जगति प्रतीतः ।
यद्दासभावजनितोत्तमश्रीर्हनूमान्
कोदण्डमण्डितकरः स चकास्तु चित्ते ॥

दयापूर्णां देवीं द्रुहिणरमणीं पाणिनिमहं
महादेवाल्लब्ध्वा निरवधिकृपां व्याकुरुत यः ।

कृतं वाक्यं येन प्रचुरपदसिद्ध्यै वररुचिं
तमीडे भाष्येण स्फुरितवदनं भोगिनमपि ॥

अद्वैतविद्याविभवान् गोविन्दाध्वरिशेखरान् ।
तद्भाग्यभूतं वन्देऽहं लिङ्गाध्वरिवरं मुदा ॥

वार्त्तिकाभरणेनाग्र्यान् यः परिष्कुरुते बुधान् ।
श्रीविश्वटेश्वरमखी तं वन्दे लोकदेशिकम् ॥

पितृव्यो यस्य श्रीगणपतिबुधः ख्यातमहिमा
श्रुतौ शास्त्रे काव्ये स्मृतिसमुदये चातिनिपुणः ।
वदन्तीमं केचित् सुरगुरुमथान्ये च पाणिनिं (?)
कुमारं केऽप्याहुर्वटनिकटवासीशमपरे ॥

अन्नप्रदानात् प्रथितो मखीन्द्रो
नारायणो यस्य पिता जनन्याः ।
श्रीरङ्गनाथाभिधदीक्षितेन्द्रो
यमाकुलो भाष्यविदग्रगण्यः (?) ॥

जीवातुभूतां पदसाधुतायाः
यः शब्दरत्नावलिमाततान ।
पितामहं तं शिरसा नमामि
श्रीद्वादशाहक्रतुभूषिताख्यम् ॥

तस्य सत्त्रारिभाष्यस्य द्वादशाहादियाजिनः ।
वेदाटवीशपुत्रस्य नार्चिकागृहमेधिनः ॥

श्रीवाणं नाथ (?) जामातुः सूनुं पित्रतिशायिनम् ।
पितरं चोक्कनाथाख्यं साम्यं शाब्दिकसत्तमम् ॥

नत्वा तस्य दयाभूम्ना पितामहसमाह्वयः ।
अतिबालोऽतिगम्भीरां व्याख्यास्ये शब्दकौमुदीम् ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिपूरणाय शिष्टाचारपरिप्राप्तं विशिष्टेष्टदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—सोमास्कन्दत्वोदितम् । शास्त्रस्य यत् परमं प्रयोजनं तदस्यापीति सूचितम् । अत एव शब्दज्ञानस्य च यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपसंयोगं स्वर्गमोक्षादिहेतुत्वं चाह वाक्यपदीयकारः ।

End :

ननु दक्षिणो हस्तो यस्मिन् मार्गे इति विग्रहे दक्षिणशब्दस्य सर्वनामत्वात् पूर्वनिपातेन भाव्यम् । अत आह—भाष्यकारेति । षष्ठी स्थानेयोगेत्यत्राप्युम्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्य इति भाष्ये प्रयोगादयं साधुरित्यर्थः । ननु प्रियविश्व इत्यादौ सर्वनामत्वा... ... ... .... .... ....

Colophon :

इति शब्दकौमुदीव्याख्यायां शाब्दिकरक्षायां द्वादशाहयाजीयायां स्त्रीप्रत्ययाः ।

Author—Dvādaśāhayājī.

Remarks—The commentary is abstruse and exhaustive. Many leaves in the middle are damaged. Pages 441—450 are missing. The Ms. ends abruptly on the portion dealing with *Bahuvrīhi* compound.

## ॥ शब्दकौस्तुभप्रभा ॥

No. 552. ŚABDAKAUSTUBHAPRABHĀ.

C. O. L. No. 1257.

Substance—Paper. Size — 10″ × 4½″. Pages — 60. 11 lines per page and 56 letters per line. Script—Devanāgarī. No. of Granthas—1100. Incomplete.

Owner—C. O.

Subject—Explication of the Śabdakaustabha of Bhaṭṭoji Dīkṣita.

Beginning:

श्रीगणेशाय नमः । शिवाय साम्बाय नमः । श्रीगुरुभ्यो नमः ।

आनन्दकन्दं मुनिहृन्मिलिन्दं स्वच्छन्दगोविन्दपदारविन्दम् ।
वन्दे सुरेन्द्रादिमदादिदन्तद्वन्द्वापवादं(?) गुणनन्दनन्दम् ॥

वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ॥

प्रारिप्सितग्रन्थानिर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय निबध्नाति---विश्वेशमित्यादिना । तत्रादौ व्यापकत्वेन स्वेष्टदेवतात्वेन च भगवतस्तदाह—विश्वेशमिति ।

End:

अत एव बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत इति काव्यप्रकाशकृदुक्तिः स-

ङ्गच्छते । नन्वेवमष्टानामपि मुख्यत्वापत्तिरत आह । यद्यपीति । सिद्धा-
न्तग्रन्थेष्वित्यर्थः । तत्रापि वाक्यस्फोटेष्वपि । पूर्वेति । पूर्वपूर्ववो-
द्ध्रेपक्षयोत्तरोत्तरवोद्धुस्तत्तद्व्यापकवोद्धृवृत्तिधर्माश्रयत्वादिति भा-
वः । यद्वा आकाङ्क्षादिना स्वसंसर्गलाभ इति वर्णस्फोटपदस्फोट-
वादिनोस्तत्तदुपमर्दकत्वं वाक्यस्फोटस्य संसर्गस्य वाक्यशक्यत्व-
मिति ।

Colophon :

Author—Vaidyanāthapāyaguṇḍe, disciple of Nageśa.

Remarks—The Ms. is damaged. It is identical with No. 2304, TCM. Vol. III. Part I A.

---

## ॥ शब्ददीपिका ॥

### No. 553. ŚABDADĪPIKĀ.

C. O. L. No. 548.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—86. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1000. Incomplete.

Owner—Kumāran Kumāran Mūsatu, Nārāyaṇamaṅgalam, Kiḍaṅġūr, Ettumānūr.

Subject—The derivation of words in consonance with grammatical rules.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रणम्य परमात्मानं पाणिन्यादिमुनित्रयम् ।
गुरूंश्च बालबोधाय क्रियते शब्ददीपिका ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इमान्यणादिसंज्ञासूत्राणि । हलन्त्यम् । आद्योच्चारणे अन्त्यं हल् इत्संज्ञं स्यात् । हलिति आद्यन्तानुकरणद्वारा हकारादिलकारान्तवर्णसमुदायस्यानुकरणम् ।

End :

तद्वस्तु स्वस्ति तनुताद्यतोऽनन्यदिदं जगत् ।
प्रबोभवीति बोभोति तिरोबोभूयतेऽखिलम् ॥

पूर्वार्धे कथिताः प्रातिपदिकात्प्रत्यया अथ ।
कथ्यन्ते प्रत्यया धातोस्तत्रादौ दश लो मुने ॥

लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । लेट् छन्दस्येव । वर्तमाने लट् । वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् । अटावितौ । लः कर्मणि च भावे चाकर्मकेभ्यः । लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो धातुभ्यो भावे कर्तरि च स्युः ।

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् । एते अष्टादश लस्यादेशाः स्युः । लः परस्मैपदम् । लादेशाः परस्मैपदसंज्ञाः स्युः । त.... .... .... ....

Colophon :

इति यज्ञेश्वरदीक्षितविरचितायां शब्ददीपिकायां पूर्वार्धं समाप्तम् ।

Author—Yajñeśvara Dīkṣita.

Remarks—The Ms. consists of the 1st half and the beginning of the 2nd.

---

॥ शाब्दिकचिन्तामणिः ॥

No. 554. ŚĀBDIKACINTĀMAṆI.

C. O. L. No. 755.

Substance—Paper. Size—13″ × 8″. Pages—1353. 24 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—20300.

Owner—C. O.

Subject—The inflected forms of words and their application.

Beginning :

श्रीरस्तु । अविघ्नमस्तु । श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत-
श्रीरामचन्द्रपरब्रह्मणे नमः ।

शाब्दिकचिन्तामणिप्रारम्भः ।

वन्दे सर्वेश्वरं सर्वशक्तिं सर्वार्थदायिनम् ।
सर्वज्ञं ज्ञानवपुषं विष्णुं सर्वार्थसिद्धये ॥

पाणिन्यादिमुनीन्द्राणां समष्टिं लोकविश्रुतम् ।
श्रीरामभद्रमखिनं वन्दे वाग्वृद्धये गुरुम् ॥

प्रणम्य परमात्मानं पाणिन्यादीन् गुरूनपि ।
चिन्तामणिं शाब्दिकानां कलये विदुषां मुदे ॥

विद्वत्प्रियेण विजयरघुनाथमहीभृता ।
पोषितः सर्वसत्कारैः पूर्णभक्तिप्रयोजितैः ॥

गोपालकृष्णशर्माहमिष्टसर्वार्थदायिनीम् ।
गुरुभक्तिं पुरस्कृत्य ग्रन्थान् कर्तुं समुत्सहे ॥

अथ यत्सप्रयोजनं तदेव प्रेक्षावदुपादेयम्, व्याकरणं तु न तथेति नारम्भणीयम् । अविहितत्वाच्च । न । विश्वजिन्न्यायेन कल्पनं स्यात् । उच्यते । प्रयोजनाभावेऽप्यवश्याध्येयं व्याकरणम् । 'ब्राह्मणेन निष्कारणेन धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चे'ति आगमात् ।

End :

यद्यपि तत्र वृक्षोऽपि कश्चित् स्यात्, तथापि मल्लग्रामवत् स्त्रीभिरेव व्यपदेशो भवतीति कैयटः । अत्र ग्राम्यादिषु तु मिश्रत्वात् सङ्घस्य पुंस एव शेषासिद्धिः ।

Colophon :

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकौशलस्य गोपालकृष्णशास्त्रिणः कृतौ शाब्दिकाचिन्तामणौ प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकम् । पादश्च समाप्तः । श्रीः । श्रीः ।

Author—Gopālakṛṣṇa Śāstrī, son of Vaidyanātha and disciple of Rāmabhadradīkṣita.

Remarks—The verse beginning with 'विद्वत्प्रियेण'' in the introductory portion unravels that the author was a poet at the court of the King Raghunātha. The work is noticed as No. 1355 TCM. Vol. II. Part I B.

## ॥ शाब्दिकाभरणम् ॥

## No. 555. ŚĀBDIKĀBHARAṆAM.

C. O. L. No. 613.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—95. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Owner—Mitran Mitran Nambūri.

Subject—A disquisition upon the correctness of words.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

विद्यानिधिं नमस्कृत्य सर्वदेवमयं हरिम् ।
शाब्दिकानामलङ्कारः क्रियते हरियोगिना ॥

अथ शब्दानुशासनम् । केषां शब्दानाम् । वैदिकानां (लौकिकानां) च । अथ किमात्मकं शब्दमभ्युपगम्येदं शब्दानुशासनमारभ्यते । तावद्वर्णात्मकमिति ब्रूमः । वर्णाः पुनरानित्या नित्या वा । तावन्नित्या इति वदामः । कुत एवं नित्यतावगतिः । प्रत्य-

भिज्ञानात् । तथापि यं यमहमश्रौषं गकारं तमेतर्हि शृणोमीति प्रतिसन्धानमुत्पद्यमानं दृष्टम् । न चेदमनित्यत्वे वर्णानां घटते । अर्थप्रतीत्यन्यथानुपपत्त्या वर्णानां नित्यत्वमभ्युपगन्तव्यम् ।

End :

द्यतेः गातिस्थेति नित्यं सिज्लुक् । अदादात् । (छो) णौ चङि शाच्छासाह्वाव्यावेपां युगिति युक् । अचिच्छयत् । छे चेति तुक् । अचिच्छयत् । अनित्यमागमशासनमिति पक्षे दीर्घो लघोः । अचीच्छयत् । दीर्घादिति वा तुक् अचीच्छयत् । असीसयत् । द्यतेः पुक् । अदीदपत् । छास्यतीत्यादि पूर्ववत् । द्यतेः सनि

Colophon :

परस्मैभाषा ।

Author—Hariyogi.

Remarks—The inflected forms and Prakriyas of Parasmaipada and Ātmanapada verbs are dealt with herein.

---

## ॥ सरस्वतीकण्ठाभरणम् ॥

No. 556. SARASVATĪKAṆṬHĀBHARAṆAM.

C. O. L. No. 522.

Substance--Paper. Size—13″ × 8″. Pages — 112. 24 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—2000. Complete.

Owner—C. O.

Subject—Sanskrit grammar revised on modern lines.

Beginning :

प्रणम्यैकात्मतां यातौ प्रकृतिप्रत्ययाविव ।
श्रेयःपदमुमेशानौ पदलक्ष्म प्रचक्ष्महे ॥

अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् ।

सिद्धिः क्रियादेर्लोकात् । भूवादिः क्रियावचनो धातुः

End :

असूयासंमतिकोपकुत्सनाक्षियाशीःप्रैषत्याख्यानेषु स्वरितः । उदात्तादनुदात्तः । उदात्तस्वरितपरश्च वा यणः । एकादे... .... अपादादौ पादाके(?) वाक्ये । स्वरितस्यैकश्रुतौ सिद्धिः ।

Colophon :

इति सरस्वतीकण्ठाभरणनाम्नि व्याकरणे अष्टमोऽध्यायः समाप्तः । श्रीः ।

श्रीमहाराजाधिराजपरमेश्वरभोजदेवविरचितं सरस्वतीकण्ठाभरणाख्यं व्याकरणं सम्पूर्णम् ।

शुभमस्तु ।

Author—Bhojadeva.

Remarks—Same as No. 359 b.

---

## ॥ सरस्वतीकण्ठाभरणम् (सवृत्तिकम्) ॥

No. 557. SARASVATĪKAṆṬHĀBHARAṆAM with Vṛtti.

C. O. L. No. 1846.

Substance—Palm leaf. Size—$11\frac{3}{8}'' \times 1\frac{3}{8}''$. Leaves—49

64. 7—8 lines per page and 28—36 letters per line. Script—Malayāḷam. No. of Granthas—960. Incomplete.

Owner—Brahmadattan Nambūri, Plakkattari.

Subject—Same as No. 556.

Beginning :

... ... ...कृवापाजिमिस्वदिसाध्यशूभ्य उण्। बहुलं कर्तरि वर्तमाने संज्ञायामिति वर्तते । कृवादिभ्यः संज्ञायां कर्तरि बहुलमुण्प्रत्ययो भवति । कारुः शिल्पी । वायुः पवनः । पायुः अपानम् । जायुः औषधम् । मायुः पित्तम् । गोमायुः सृगालः । स्वादुः मधुरः । साधुः श्रेयान् । आशुः शीघ्रः । णकारो वृद्ध्यर्थः ।

End :

लिङ् चोर्ध्वमौहूर्तिके । ऊर्ध्वमुहूर्ताद् भवे भविष्यत्कालविशिष्टे लोडर्थलक्षणेऽर्थे वर्तमानाद्धातोर्लिट्प्रत्ययो भवति । लुट् च वा । ऊर्ध्वं मुहूर्ताद् उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा । अथ त्वं छन्दो व्याकरणं निरुक्तं मीमांसां चाधीष्वेति ।

माङि लुङ् ।

माङ्युपपदे भविष्यत्कालविशिष्टेऽर्थे वर्तमानाद्धातोर्लुङ्प्रत्ययो भवति । मा कार्षीः । ङकारः किम् मा भवतु तस्य पापम् ।

स्मपरे लङ् च ।

स्मोत्तरे मा... ... ... ... ।

Colophon :

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य वृत्तौ हृदयहारिण्यां द्वितीयस्याध्यायस्य तृतीयः पादः ।

Author—Text: Bhojadeva.

Com:—Dandanātha Nārāyaṇa Bhaṭṭa.

Remarks—This Ms. begins on a portion of the 1st *pāda* of the 2nd chapter and ends on that of the 4th *pāda* of the same chapter. The last 18 leaves are blank. The work is being published in the TSS.

---

## ॥ सरस्वतीकण्ठाभरणम् (सवृत्तिकम्) ॥

No. 558. SARASVATĪKANṬHĀBHARAṆAM with Vṛtti.

C. O. L. No. 262.

Substance—Paper. Size—$13\frac{1}{4}'' \times 8\frac{3}{8}''$. Pages—1067. 14 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—9000. Incomplete.

Owner—C. O.

Subject—Same as No. 556.

Beginning :

अथ पञ्चमाध्यायः ।

प्रथमः पादः ।

प्राग्वतेष्ठञ् ।

तेन तुल्यं क्रिया चेद्वतिः इति वक्ष्यति । प्रागेतस्माद्वतिसंशब्दनात् येऽर्थास्तेषु ठञ् प्रत्ययोऽधिकृतो वेदितव्यः । वक्ष्यति—पारायणतुरायणचायणभ्योनाद्रे वर्तयति । पारायणिकः । तौरायणिकः चान्द्रायणिकः ।

End :

संज्ञाप्रत्ययविधानादेः पूर्वे वा.... .... ....मध्ये पूर्वोपादिष्टसंज्ञाद्युद्देशानतिक्रमेणोपदेशोऽत्र द्रष्टव्यः, ते 'विप्रतिषेधे परं कार्यमि'ति 'प्राग्युवोरलुग्युत्रासिद्धम्' समानाश्रये पूर्वत्रासिद्धं, 'प्राग्जितादणित्यादेः प्रत्याहाराधिकारादेश्च समस्तस्याभीष्टस्य विधिः सिद्धिर्भवति ।

Colophon :

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य वृत्तौ हृदयहारिण्यां सप्तमोऽध्यायः समाप्तः ।

शुभम् ।

Author—Same as No. 557.

Remarks—The Ms. extends from the beginning of the 5th chapter up to the end of the 7th. The preceding portion is available in print.

---

## ॥ सर्वप्रत्ययमाला ॥

### No. 559. SARVAPRATYAYAMĀLĀ.

C. O. L. No. 969.

Substance—Paper. Size—11" × 9". Pages — 121.

20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1200. Incomplete.

Owner—C. O.

Subject—A collection of synonyms and compounds derived from roots with affixes.

Beginning:

अभङ्गुरकलादानस्थूललक्षत्वमीयुषे ।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः ॥

शिवात्मजमविघ्नाय सुरासुरसुपूजितम् ।
सर्वक्रियादौ सर्वार्च्यं वन्दे गणपतिं प्रभुम् ॥

गोविन्दं गोपगोपीनां नन्दनं नन्दनन्दनम् ।
वन्दे वृन्दारकैर्वन्द्यमिन्दिरानन्दकारिणम् ॥

प्रत्ययग्रथितैः शब्दैः पर्यायैः सर्वधातुजैः ।
शङ्करार्यानुजो मालां शङ्करार्यैः करोम्यहम् ॥

क्रियाक्रमोक्तशब्दानां पर्यायपदविस्तृता ।
सर्वप्रत्ययमालेयं बालशिक्षार्थमुद्धृता ॥

दशाध्यायस्थभूवादिसर्वधातुक्रियाक्रमम् ।
श्लोकाष्टकेन वक्ष्यामि शतात्प्राक् सकलाः क्रियाः ॥

End:

अन्वतिष्ठासत्सनि चैदेधतावर्धताह्वयत् ।
आप्यायतास्थायत चापुष्णादुपायत तं पिता ॥

कर्मण्युपानीयतान्वशासच्चाशिक्षदादरात् ।
अन्वशासयदन्यैर्णिच्यशिक्षयदशिक्ष्यत ॥

यक्यन्वशास्यतामामनद्वेदमपठत् सदा ।
आम्नापयद्वेदमध्यापयच्चापाठयण्णिचि ॥

आम्नायतापठ्यत च समशेत व्यतर्कयत् ।
व्यचिकित्सतान्वयुङ्क्तापृच्छद् गुरुरपृच्छयत ॥

अन्वयुज्यत पर्यन्वयुज्यतासावचिन्तयत् ।
अध्यायदध्यायत चातर्कयच्च न्यरूपयत् ॥

.... .... .... .... ....

Colophon :

इति सर्वप्रत्ययमालायां लङ्माला नाम नवमोऽध्यायः ।

Author—Śaṅkarārya, younger brother of Śaṅkarārya.

Remarks—The introduction to the work and the colophon of the first chapter disclose the name of the author as Śaṅkarārya and Śaṅkarācārya respectively. This work is noticed on p. 702, CC. Vol I.

---

॥ सारस्वतप्रक्रिया ॥

No. 560 A. SĀRASVATAPRAKRIYĀ.

C. O. L. No. 895 A.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1''$. Leaves—46. 8—9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Owner—Swāmiār Maṭham, Muñcira.

Subject etc.—Same as No. 823, DCSMMPL.

Remarks—The Ms. is much injured.

---

## ॥ पुरुषकारः ॥

## No. 560 B. PURUṢAKĀRA.

C. O. L. No. 895 B.

Substance—Palm leaf. Size—15¼″ × 2″. Leaves—86. 8—9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Owner—Same as No. 560 A.

Subject—A commentary on grammar.

Beginning:

हरिः श्रीगणपतये नमः । श्रीकृष्णलीलाशुकेभ्यो नमः ।

प्रकृतिप्रत्ययाभ्यां यद् ब्रह्मतत्त्वं विवर्तते ।
तदेतत्कृष्ण इत्यादिमूर्त्या किञ्चिद्विविच्यते ॥

तत्र तावद् ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वे.... ....ध्येय "इत्येकश्शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवती"ति चागमान्नित्यतया काम्यतया चाध्येये व्याकरणे लाघवेन तत्प्रवृत्त्यर्थमणाद्याः प्रत्याहारा उच्यन्ते । तदर्थञ्च विशिष्टतमानुबन्धाभ्यां लोकसिद्धा वर्णा उपदिश्यन्ते ।

End :

पाणिनिस्त्विष्ठस्य यिट् चेत्याह । बहोः परस्यास्य यिट् स्यात् । भूश्च बहोः । उच्चारणार्थ इः । तदा बहयति । इष्ठनि हि यत् फिपः कार्यं तत् णाववतिदिश्यते । न चेष्ठनि यिट् । नापि फिपः । भूश्च यिट्सन्नियोगशिष्टत्वान्न । न्यासे तु भावयति । चिन्त्याप्तिः? श्येनीमाचष्टे श्येतयति । याचि तद्धिते । अस्मिन् विषये स्त्री पुंवत् स्यात् । श्येतैतहरितरोहिताद्वा नश्च । एभ्यः स्त्रियां ङीब् वा स्यात् । नश्चैषां तकारस्य ।

Colophon :

इति श्रीकृष्णलीलाशुकेभ्यो नमः ।

Author :

Remarks—The Fol. numbered "गौ" contains the following verse :

एतत्सुबन्धसाम्राज्यमेधितं नयसम्पदा ।
कृष्णचन्द्राज्ञया गुप्तं कृतार्थयतु सज्जनान् ॥

The author of this work is probably Kṛṣṇalīlāśukamuni (Vide prefatorial note to the Daiva, No. 1. TSS.

---

## ॥ सिद्धान्तकौमुदीव्याख्या (मितवादिनी) ॥

No. 561. SIDDHĀNTAKOUMUDĪVYĀKHYĀ.
Mitavādinī.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—449. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—5600. Incomplete.

Owner—C. O.

Subject—A commentary on the Siddhānta Kaumudī.

Beginning:

अविघ्नमस्तु ।

मितवादिनी ।

सिद्धान्तकौमुदीव्याख्या ।

नेल्लूरुस्वामिनं नत्वा पळ्ळिकोण्डाख्यमच्युतम् ।
सिद्धान्तकौमुदीव्याख्यां करोमि मितवादिनीम् ॥

सिद्धान्तकौमुदीव्याख्या प्रसिद्धास्ति मनोरमा ।
तत्र द्वेधाकृतं मूलं तन्मात्र प्रतिपद्यते ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नन्नेव विकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । त्रयो अवयवा यस्य त्रयम् । संख्याया अवयवे तयप् (५ २ ४२) इत्यवयववाचिसंख्यावाचिनस्त्रिशब्दादवयविन्यर्थे तयप् । अवयवीत्यत्र समुदाय एव ।

End:

उपमानानि उपमीयते येन तदुपमानम् । उपपूर्वान्माङः करणे ल्युट् । प्रादिसमासः । उपपूर्वको माङ् सादृश्यहेतुके परिच्छेदे रूढः ! येन वस्त्वन्तरसादृश्येन परिच्छिद्यते, तदुपमानमित्यर्थः । यथा गौरिव गवयः । अत्र हि गौः करणं सादृश्यं हेतुः पुरुषः परिच्छेत्ता । स हि गोसादृश्येन गवयं परिच्छिनत्ति । सामान्यवचनैरिति । समान एव सामान्यम् । चातुर्वर्ण्यादित्वात् ष्यञ् स्वार्थे । उपमानोपमेयसाधारणो यो धर्मस्तद्विशिष्टवचनैरित्यर्थः । न तु साधारणधर्ममात्रवचनैरिति । एतच्च वचनग्रहणाल्लभ्यते सामान्यमुक्तवन्तः सामा-

न्यवचनाः । बाहुलकात् कर्तरि भूते ल्युट् । ये पूर्वं सामान्यमुक्त्वा तद्गति द्रव्ये... ... ... ...

Colophon:

इति मितवादिन्यामव्ययीभावप्रकरणम् ।

Author:

Remarks—The commentary is lucid and exhaustive. It extends up to a portion of the *Tatpuruṣa compound.* The benedictory verse beginning with 'नेल्लूरुस्वामिनं' bears out that the author belonged to Nellore. The work is noticed as No. 2801, TCM. Vol. III. Part I C.

---

## ॥ सिद्धान्तकौमुदीव्याख्या (विलासः) ॥

No. 562. SIDDHĀNTAKAUMUDĪVYĀKHYĀ.
Vilāsa.

C. O. L. No. 1826.

Substance—Palm leaf. Size—14"×1". Leaves—111. 6 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2664. Incomplete.

Owner—Brahmadattan Nampūri, Kūḍallūr.

Subject—Same as No. 561.

Beginning:

श्रीः । हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीलक्ष्मीनरसिंहाख्यं शब्दब्रह्ममयं हरिम् ।
नमामि परमात्मानं सच्चिदानन्दविग्रहम् ॥

यत्पादपांसुप्लवमाश्रयन्तः
पातञ्जलाब्धिं तरसा तरन्ति ।
पतञ्जलिं यं प्रवदन्ति सन्त-
स्तं रामभद्रं गुरुमानतोऽस्मि ॥

अस्ति लक्ष्मीनृसिंहाख्यो रामाम्बागर्भसम्भवः ।
तेन सिद्धान्तकौमुद्या विलासोऽयं विभाव्यते ॥

इह खलु भगवान् पाणिनिरेकः शब्दः सम्यग् ज्ञातः सुष्ठु-प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति फलश्रवणात् नापभ्रंशितवै न म्लेच्छितवै नानृतं वदेदित्यादिनिषेधात् हेलयो हेलय इति वदन्तोऽसुराः पराबभूवुः । यथेन्द्रशत्रुः स्वरतोऽपराधाद् इत्यादि-निन्दाश्रवणाच्च सुशब्दा अपशब्देभ्यो विविक्ततया ज्ञात्वा प्रयोक्त-व्या नान्यथेत्यवगमात् तदर्थं लोकानुजिघृक्षया परमेश्वरमाराध्य शब्दतत्त्वं ज्ञात्वा सुशब्दापशब्दविवेचकानि सूत्राणि प्रणिनाय । तत्र विशकलिततया विद्यमाननानासूत्रसङ्कलनेन शब्दस्वरूपस्य मन्दप्रज्ञैः ज्ञातुमशक्यतया तदनुग्रहाय श्रीमान् भट्टोजिदीक्षितः सकलकलाप्रवीणः नानासूत्रसङ्कलनेन प्रक्रियाप्रदर्शकं प्रकरणं प्रणि-नीषुः 'मङ्गलादीनि मङ्गलमध्यानि, मङ्गलान्तानि शास्त्राणि प्रथन्ते । वीरपुरुषाणि चायुष्मत्पुरुषाणि चे'त्यादिमहाभाष्यवचनमनुसृत्य कृतं गुरुनमस्काररूपं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नंश्चिकी-र्षितं प्रतिजानीते—मुनित्रयमिति ।

End :

एकत्र विषयसप्तमी । अन्यत्र परसप्तमीति मनसि निधायाह—

नाभाव इति । कृते चेति ततश्च मुत्वस्यासिद्धत्वाददन्तत्वमाश्रित्य सुपि चेति दीर्घो नेति भावः । अमूभ्यामिति विभक्तिकार्ये दीर्घादौ कृते अनन्तरमेव मुत्वस्य प्रवृत्तेरिति भावः । अमुष्मा इति । (स्याया)- द्यादेशे पत्वमिति भावः । उपनह्य इति विग्रहे उपपूर्वाण्णह बन्धन इत्यस्माद्धातोः सम्पदादित्वात् क्विपि नहिवृतीत्यादिना पूर्वपदस्य दीर्घे तत.... ...

Colophon :

इति हलन्तपुंलिङ्गाः ।

Author—Lakṣmī Narasimha, son of Rāmāmbā and disciple of Rāmabhadra.

Remarks—This Ms. contains only a portion extend up to the end of *Halanta*. The style is elegant and simple. The work is noticed as No. 1446, DCSM. Vol. III.

॥ सिद्धान्तकौमुदीव्याख्या (सुबोधिनी) ॥

No. 533 A. SIDDHĀNTAKAUMUDĪVYĀKHYĀ.

Subodhinī.

C. O. L. No. 2534 A.

Substance—Palm leaf. Size—13½″ × 1½″. Leaves—80. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Owner—Vāsudeva Śarma, Vaṭṭappaḷḷi, Śucīndram.

Subject—Same as No. 561.

Author—Jayakṛṣṇa, son of Rāynātha, son of Govardhana Bhaṭṭa of Maṇikula.

Remarks—This work is intended to supplement Tattvabodhinī, which ends with the Kṛdantaprakaraṇa. It covers Vaidikaprakaraṇa & Svaraprakaraṇa. Thus these two works, the Tattvabodhinī (dealing with Kṛdantaprakaraṇa) and Subodhinī relating to Vaidikaprakaraṇa & Svaraprakaraṇa) constitute a complete commentary on the Siddhāntakaumudī. The work is pr n ed in the NSPB.

---

॥ वैयाकरणमञ्जूषाविवृतिः (कला) ॥

No. 563 B. VAIYĀKARAṆAMAÑJŪṢĀVIVṚTI (Kalā).

C. O. L. No. 2534 B.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—39. 9 lines per page and 56 letters per line. Script—Malayālam. No. of Granthas—1150. Incomplete.

Owner—Same as No. 563 A.

Subject—Beginning: Same as No. 545.

End:

अत्र वचनाद्युपदेशादिरूपतया परिणमति । तदाह—सम्बोध्य-
त्वेति । आदिना स्वतन्त्रोच्चारयितृत्वादि । अग्रे तनाप्तत्वा-

साधारणज्ञानवत्त्वैकवाक्यार्थापन्नसमुदायत्वाप्रतापत्वसावधानस्थिति-
त्वपरिग्रह.... ... .... ...

Colophon :

Author—Same as No. 545.

Remarks—The Ms. is mostly inaccurate.

---

## ॥ सुप्तिङन्तसाम्राज्यम् ॥

### No. 564. SUPTIṄANTASĀMRĀJYAM.

C. O. L. No. 1850.

Substance—Palm leaf. Size—$15\frac{3}{4}'' \times 1\frac{5}{8}''$. Leaves—150. 6 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Owner—Brahmadattan Nambūrippād, Kūḍallūr.

Subject etc.—Same as No. 560 B.

Remarks—This Ms. consists of Subantasāmrājya and Tiṅantasāmrājya. The following lines occur after the colophon :

श्रीवासुदेव धरणीधर चक्रपाणे
वारा.... ....नन्दन पद्मनाभ ।
श्रीकृष्ण राम मधुसूदन देवदेव
देवेश केशव सुरेश हरे नमस्ते ॥
नमः शिवाय ।

## ॥ सोपसंख्यानम् ॥

### No. 565. SOPASAMKHYĀNAM.

C. O. L. No. 1700.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—85. 7 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—1100.

Owner—Keśava Pillai, Kaduthuruthi, Kailāsapuram, Vaikom.

Subject—The rules of Sanskrit grammar.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

अइउण् । अकारस्य विवृतोपदेश आकारग्रहणार्थो विवारभेदात् । ऋलृक् ।

End :

अ अ इति । दीर्घप्लुतयोस्तु विवृतेनाकारेण ग्रहणं नेष्यते । संवृतेन च सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते । ह्रस्वमवर्णं प्रयोगे संवृतं दीर्घप्लुतयोस्तु विवृतत्वं तेषां सावर्ण्यप्रसिद्ध्यर्थम् अकार इह शास्त्रे विवृतः प्रतिज्ञायते ।

Colophon :

इत्यष्टमोऽध्यायः । समाप्तं चेदं सोपसंख्यानं सूत्रम् । सङ्गमग्रामेवासिना रामेण लिखितमिदं पुस्तकम् ।

हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छया ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
धाञ्क्रुञोस्तनिह्योश्च बहुत्वेन शौनाकिः (?) ॥

रसिकजनचकोरचन्द्रिकायमानेन कृपया पिण्डीकृतेन ।
पश्य मातुलमिति प्रदर्शिता
यामिनीषु गगने यशोदया ।
आजुहाव वलितेन पाणिना
शीतभानुमरविन्दलोचनः ॥

Author—Sūtra:—Pāṇini.
Vartika:—Vararuci.

Remarks—The last few leaves deal with smoe stanzas taken from Amarakcśa.

---

## ॥ स्फोटप्रतिष्ठा ॥

### No. 566 A. SPHOTAPRATIṢTHĀ.

C. O. L. No. 688 A.

Substance—Paper. Size—13" x 8". Pages—21. 16 lines per page and 24 letters per line. Script—Devanāgaıī. No. of Granthas—255. Complete.

Owner—C. O.

Subject—Substantiation of the enternity of sound.

Beginning :

श्रीकेशवकविविरचिता स्फोटप्रतिष्ठा ।

शब्दब्रह्माधिगमे कारणमात्रं समाश्रयद्विदुषाम् ।
शब्दब्रह्म नमामो नानाभिव्यञ्जकव्यक्तम् ॥

अथ शब्दानुशासनम् इति शास्त्रे, शब्दादर्थं प्रतिपद्यामहे इति च लोके किमात्मकं शब्दमभिप्रेत्यायं शब्दव्यवहार इतीदानीं विचार्यते। प्रयोजनं चास्य विचारस्य व्याकरणारम्भसिद्धिः । तथाहि—यदि शक्ष्यामो वर्णपदातिरिक्तः स्फोटाख्यो नित्यः शब्दोऽस्ति काल्पनिकस्त्वयं वर्णपदव्यवहार इति साधयितुं, तदा स्फोटाख्यशब्दाभिव्यक्त्यर्थं निबद्धस्वप्रक्रियाविशेषसाध्यपदव्युत्पादनार्थं व्याकरणारम्भः सप्रयोजनः ।

End :

नन्वेवंविधस्य शब्दस्य नानुशिष्टिः शक्या कर्तुमिति व्याकरणारम्भानुपपत्तिः प्रसज्येत । नैवम् । काल्पनिकप्रकृतिप्रत्ययादिप्रविभागमाश्रित्यानुशासनस्य कर्तुं सुकरत्वादिति सर्वमनवद्यम् ।

Colophon :

आन्ध्रक्षोणीपरिवृढगुरोः श्रीप्रतापार्यसूरे-
भूयो भूयो वचनरचनप्रेरणेनाचिरेण ।
स्मारं स्मारं किमपि किमपि स्मर्तुमेवैकतानो
यत्किञ्चिद्वालिखमिदमहं तद्विशोध्यं सुधीभिः ॥

अष्टव्याकरणीप्रबन्धचतुरः साहित्यरत्नाकरः
सत्तर्कप्रसरः कवित्वमधुरस्तन्त्रद्वयेऽपि स्थिरः ।

छन्दोवित्प्रवरः परोन्मदहरः षट्शास्त्रधौरन्धरः
श्रीमान् केशवसत्कविर्व्यरचयत् स्फोटप्रतिष्ठामिमाम् ॥
इति श्रीकेशवकविविरचिता स्फोटप्रतिष्ठा सम्पूर्णा ।

Author—Keśava Kavi.

Remarks—The author explodes the theory of Naiyāyikas against *sphoṭavāda* and confirms his own. The colophon discloses that this work is composed at the instance of Pratāpāryasūri, preceptor of the King of Āndhradeśa.

## ॥ स्फोटतत्त्वम् ॥

No. 566 B. SPHOṬATATTVAM,

C. O. L. No. 688 B.

Substance—Paper. Size—13″ × 8″. Pages — 32. 16 lines per page and 21 letters per line. Script—Devanāgarī. No. of Granthas—336. Complete.

Owner—C. O.

Subject—Same as No. 566 A.

Beginning:

श्रीः ।

श्रीशेषकृष्णविरचितं स्फोटतत्त्वम् ।

शब्दब्रह्म चिदानन्दमधिष्ठानमुपास्महे ।
यस्य वर्णाः पदं वाक्यं विवर्ताः सञ्चकासति ॥

महाभाष्यमतं भर्तृहरिणापि प्रकाशितम् ।
आलोक्य सर्वतन्त्राणि स्फोटतत्त्वं निरूप्यते ॥

इह खलु पदाद्वाक्याच्चार्थप्रतिपत्तिः सर्वानुभवसिद्धा सर्ववादि-सम्मता च । तत्र वर्णा न प्रत्येकमर्थमभिदधति । प्रथमवर्णादेवार्थावगतौ वर्णान्तरवैयर्थ्यापत्तेः ।

End :

तस्मात् पदस्फोटाद्वाक्यस्फोटाद्वा स्फोटादेवार्थप्रत्यय इति स्थितम् । अत एव शब्दप्रभवत्वमाख्यायते जगत इत्यन्यत्र विस्तरः । अत एवागमेऽपि—

"शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः ।"

इत्यलमतिविस्तरेण ।

Colophon :

प्राक्तन्त्रसूक्तिरत्नानां माला कृष्णविनिर्मिता ।
विदुषामद्विषां कण्ठे भासतामसतामपि ॥

क्रियाकारकभावेन यत् सर्वत्रानुभूयते ।
तत् प्रत्यगात्मा जयति शब्दब्रह्ममयं महः ॥

शब्दब्रह्माभिधानं श्रीभाष्यकारादिसम्मतम् ।
श्रीशेषकृष्णविदुषा स्फोटतत्त्वं निरूपितम् ॥

विद्वद्भिः सदसद्व्यक्तिकारिभिः सारहारिभिः ।
रागविद्वेषरहितैर्दूषितं वास्तु भूषितम् ॥

इति स्फोटतत्त्वं सम्पूर्णम् ।

Author—Śeṣa Kṛṣṇa.

Remarks—This Ms. consists of 17 verses and their commentary. It is noticed on P. 745, CC. Vol. I.

---

## ॥ स्फोटसिद्धिः ॥

### No. 5[illegible]7. SPHOṬASIDDHI.

C. O. L. No. [illegible]2.

[illegible]—Paper. Size—13″ × 8″. Pages — 43. 1[illegible] lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas — 600. Complete.

Owner—C. O.

Subject—Same as No. 566 A.

Beginning:

योगदान्तैकदृश्यात्मा यो गदान्तकरो नृणाम् ।
तत्त्वावस्थाणवे तस्मै तत्त्वावस्थाणवे नमः ॥

दुर्विदग्धैरपक्षिप्ते दर्शने पददर्शिनाम् ।
यथाक्रमं यथाप्रज्ञं न्यायलेशो निदर्श्यते ॥

किं पुनरिदं नाम । शब्दः । कः पुनरिह शब्दोऽभिप्रेतः । वर्णाः । नेत्याह । अपि तु

अर्थावसायप्रसवनिमित्तं शब्द इष्यते ।

End:

अर्थग्रहणसापेक्षत्वे च दर्शितमितरेतराश्रयत्वम् । ततः सर्वं मनोहरम् ।

निरस्तभेदं पदतत्त्वमेतद्
व्यदर्शि युक्त्यागमसंश्रयेण ।
विधूतभेदग्रह एतयैव
दिशा परं संप्रतियन्तु भेदम् ॥

सान्द्राविद्यातिमिरपटलाच्छादितान्तर्दृशो ये
दृष्टिं मन्दा वरमुनिमते कुर्वते सावमानम् ।
तेभ्योऽविद्यातिमिरपटलोल्लेखनी संहितेयं
स्पष्टन्यायैर्घटितसुमतिर्दर्शिता स्फोटसिद्धिः ॥

Colophon:

इति मण्डनमिश्राणां कृतिः स्फोटसिद्धिः समाप्ता ।

Author—Maṇḍanamiśra.

Remarks—This work comprises 37 verses and their commentary composed by the author himself. The text is rewritten on 5 pages after the colophon.

---

## ॥ स्फोटसिद्धिव्याख्या (गोपालिका)॥

### No. 568. SPHOṬASIDDHIVYĀKHYĀ (Gopālikā)

C. O. L. No. 1772.

Substance—Palm leaf. Size—$13\frac{3}{4}'' \times 1\frac{3}{8}''$. Leaves—213. 6—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5500. Complete.

Owner—Nārāyaṇan Nambūrippād, Sabhāmaṭham, Kiḷimaṅgalas.

Subject—A commentary on the Sphoṭasiddhi of Maṇḍanamiśra.

Beginning:

श्रीः । गणपतये नमः ।

(अभिवन्द्य महादेवं) महादेवं गणेश्वरम् ।
कृतिर्मण्डनमिश्राणां स्फोटसिद्धिर्विविच्यते ॥

प्रकरणमारभमाणोऽविघ्नपरिसमाप्त्यादिसिद्ध्यर्थं गुणसङ्कीर्णलक्षणतया स्तुत्या कायवाङ्मनःप्रह्वतालक्षणया प्रणत्या च विशिष्टदेवतां पूजयति—

योगदान्तैकदृश्यात्मा यो गदान्तकरो नृणाम् ।
तस्मात्स्थाणवे तस्मै तस्मात्स्थाणवे नमः ॥

इति । तस्मै स्थाणवे नमः । कस्मै । योगदान्तैकदृश्यात्मा यो भवति । योगाद् दान्तः उपरतः । एको दृश्यस्यात्मा यस्य योगः संयोगः परामर्शः । एकः केवलो दृशिः द्रष्टा पुरुषः । दृशिस्वरूपस्य पुरुषस्य कर्मविषयतामाह—हेतुरिति ।

End:

एतच्च दुर्विदग्धैरवक्षिप्त इत्यत्रोक्तस्य प्रपञ्च इति वेदितव्यम् । तथाहि दर्शने न्यायलेशो निदर्श्यत इत्युक्तम् । तदेवात्रोपसंहृतं स्पष्टं न्याययतीत्यादिना पूर्वांशेन । तत्रत्यः पूर्वार्धो विवृतः इति प्रतिज्ञानं सर्वमविकलमेव प्रतिष्ठितम् ।

Colophon:

इति स्फोटसिद्धिव्याख्यायां गोपालिकाख्यायां सप्तत्रिंशः श्लोकः समाप्तः ।

तत्त्वबिन्दौः कृता येन व्याख्या तत्त्वविभावना ।
तेनेयं रचिता व्याख्या नाम्ना गोपालिका स्मृता ॥

शब्दानां पालकं ह्येतदस्या मूलं निबन्धनम् ।
एषा व्याख्येयशब्दानामुपादानाच्च पालिका ॥

नन्दगोपसुता देवी वेदारण्यनिवासिनी ।
मात्रा गोपालिका नाम्ना सेवितास्मदपेक्षया ॥

तत्प्रसादादियं व्याख्या मया विरचिता किल ।
इति गोपालिकासंज्ञामस्या ह्याचक्षते बुधाः ॥

मण्डनाचार्यकृतयो येष्वतिष्ठन्त कृत्स्नशः ।
तद्वंश्येन मयाप्येषा रचिताराध्य देवताम् ॥

ब्रह्मविष्णुमहेशानरूपिणीं विश्वमातरम् ।
अपि पितरमानम्य भवदासमनन्तरम् ॥

गुरूनन्यांश्च रचिता व्याख्येयं क्षम्यतां बुधैः ।
यन्न्यूनमतिरिक्तश्च दुरुक्तश्चेह किञ्चन ॥

परमेश्वर एवास्याः कर्ता साक्षान्निरञ्जनः ।
नायं जनस्तु तन्नामा साञ्जनो मन्दचेतनः ॥

यथोक्तं भट्टपादैः—

यदीयशक्त्यनाविष्टं जगत् स्पन्दितुमक्षमम् ।
युक्तिभिस्तमपह्नोतुं कः शक्तः परमेश्वरम् ॥ इति ॥

Author—Parameśvara, son of Bhavadāsa.

Remarks—The author expresses explicitly that he wrote this commentary by the inspiration of

the Goddess of Vedāraṇya. Hence it may be inferred that he was a native of Vedāraṇya near Tanjore. 37 verses on Sphoṭasiddhi with their commentary are extant herein. The work is noticed as No. 3966. TCM. Vol. IV. Part I C. A work with the same title is published as No. 89 in TSS. It is different from this Ms. as it is attributed to Bharatamiśra.

---

## ॥ स्फोटसिद्धिव्याख्या (गोपालिका) ॥

### No. 569. SPHOṬASIDDHIVYĀKHYĀ (Gopālika.)

C. O. L. No. 705.

Substance—Paper. Size—13″×8″. Pages—301. 24 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—5500. Complete.

Owner—C. O.

Subject etc.—Same as No. 568.

---

## ॥ स्वरसिद्धान्तचन्द्रिका ॥

### No. 570. SVARASIDDHĀNTACANDRIKĀ.

C. O. L. No. 879.

Substance—Paper. Size—$13\frac{1}{2}''\times 8\frac{1}{2}''$. Pages—327. 22 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—5400. Complete.

Owner—C. O.

Subject—Beginning: Same as No. 836, DCSMMPL.

End—Colophon: Same as No. 837, DCSMMPL.

Author—Same as No. 836, DCSMMPL.

Remarks—The work is identical with No. 1023, DCSM, Madras, Vol. II.

---

*(To be continued)*

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE